विधेयः = मन्त्रः, तर्कः = मीमांसादर्शनञ्च समेत्य वेदवाङ्मय इत्यर्थः । 'अग्निहोत्रं जुहोति' 'दध्ना जुहोति' 'उद्भिदा यजेत पशुकामः' इति यथाक्रममुत्पत्तिगुणविध्योः फलोद्देशेन तथा गुणविधेरुदाहरणं बोध्यम् । एतादृशं वेदवाक्यजातं शास्त्रेऽस्मिन् व्युत्पाद्यते (= विचार्यते) इत्यतो **वाक्यशास्त्र**मिति लोकेऽस्य व्यवहारः । शासनात् (=उपदेशात्) शास्त्रमुच्यते । भारतीयैतिह्यानुसारेण सर्वशास्त्रस्याद्योपदेष्टा भगवान् ब्रह्मा । ब्रह्मणः परवर्त्ती उपदेशः **प्रवचन**मुच्यते । वाक्यात्मकमीमांसाशास्त्रस्य धर्मप्रवचनार्थं प्रवृत्तिरित्यनुपदं स्पष्टीभविष्यति ।

पूर्वं वेदवाक्यार्थविचारो मीमांसाशब्दस्यार्थ इत्युक्तम् । विचारश्च स्वविषयकार्थनिर्णयकारणं भवतीति लोके ज्ञायते । अतो वेदार्थविचारेण वेदार्थनिश्चयो भवति । वेदाध्यायनानन्तरं वेदार्थज्ञाननिमित्तं श्रुतौ विचारस्य कर्त्तव्यता प्रदर्शिता । **'स्वाध्यायोऽध्येतव्यः'** (तैत्तिरीयारण्यके २/१५/१) इति विधिवलाद् वेदाध्यनं कर्त्तव्यतयोच्यते । स्वाध्यायः = वेदोऽथवा वेदत्रयान्तर्गतस्वस्वसम्प्रदायानुसृता एका शाखा । वेदार्थस्य ज्ञानलाभार्थं द्विजातिर्गुरोः वेदं शृणुयात् वेदार्थञ्च विचारपूर्वकं जानीयादित्युक्तश्रुतेस्तात्पर्यम् । उपनयनानन्तरं ब्राह्मणक्षत्रियवैश्यैः गुरुगृहमुपोष्य स्वपुरुषानुक्रमेणाधीतवेदो वेदशाखा वावश्यमधीतव्येति विधिः । विधेरस्य लङ्घनात् पापो भवति । वेदाध्ययनानन्तरं समावर्त्तनात्पूर्वं गुरुगृहमेवोपोष्य धर्मस्वरूपं वेदार्थविचारात्मकं मीमांसाशास्त्रमधीतव्यम् । यतः श्रुतेर्यथार्थतात्पर्यानुपलब्धौ वेदाध्ययनं निष्प्रयोजनं स्यात् ।

(क) **स्वाध्यायप्रयोजनम्** । अध्ययनशब्दस्यार्थस्तावत् गुरोरुच्चारणश्रवणेन तदनुरूपोच्चारणं कुर्वतस्तत्तद्वेदवाक्यानां तत्सदृशरूपेण स्वायत्तीकरणम् । इदमक्षरग्रहणमुच्यते । तत्र वेदाध्यनस्य किं तावत् फलमिति शङ्कायां केचिदाहुः – विधिसामर्थ्यात् स्वर्गो वेदाध्ययनस्य फलमिति विश्वजिन्न्यायेन स्वीकर्त्तव्यः । 'विश्वजिता यजेते'ति श्रुतौ विश्वजिद्यागस्य कर्त्तव्यता विहिता । न तत्र कस्यचित् फलस्योल्लेखो वर्त्तते । ततः कथं विश्वजिद्यागे लोकाः प्रवर्त्तेरन् । न हि निष्फले कर्मणि कश्चित् प्रवर्त्तते । किञ्च वेदविधेर्निष्फलकर्मणि प्रवर्त्तकत्वमपि न सम्भवति । तथा सति निष्फलपदार्थप्रतिपादकत्वेन वेदस्याप्रामाण्यं स्यात् । अतो जैमिनिना न्यायः कृतः 'स स्वर्गः स्यात्सर्वान् प्रत्यविशिष्टत्वादि'ति (मी॰ सू॰ ४/३/१५, पृ॰ ५४६) । स्वर्गो नाम निरवच्छिन्नसुखात्मको देशः । स च सर्वेषामीप्सितः । अतो विश्वजिद्यागस्य स्वर्ग एव फलं कल्प्यते । अन्यथा विधेः स्वरूपहानिः स्यात् । विधेः स्वरूपं तावत् प्रवर्त्तकत्वम्, न हि निष्फले कर्मणि विधिः कञ्चिदपि पुरुषं प्रवर्त्तयितुं शक्नोति । अतो विश्वजिद्यागेन स्वर्गं भावयेदित्यर्थकरणात् (अर्थात् विश्वजिद्यागे स्वर्ग एव फलं कल्प्यते इत्यर्थकरणात्) तादृशविश्वजिन्न्यायेन यत्र यत्र वेदविधौ फलं

न दृश्यते तत्र तत्र स्वर्गः फलत्वेन कल्प्यत इति न्यायः । एवं 'स्वाध्यायोऽध्येतव्यः' इत्यत्रापि अध्ययनविधौ फलाश्रुतौ विश्वजिन्न्यायेन अध्ययनस्य स्वर्गफलं कल्प्यते । अत उक्तं तैः -- 'विनापि विधिना ज्ञानलाभान्न हि तदर्थता । कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवत् ॥' इति । अयमर्थः – वेदाध्ययनेन स्वाध्यायसंस्कारद्वारा अध्ययनस्यार्थज्ञानहेतुत्वं विधिं विनैवानुमानप्रमाणेन लभ्यत इति अर्थज्ञानार्थम् अध्ययनविधेरानर्थक्यं भवतीत्यतो विधिसामर्थ्यात् वेदाध्ययनस्य स्वर्गफलं कल्प्यत इति पूर्वपक्षे सिद्धान्तः कृतः ।

'स्वाध्यायोऽध्येतव्यः' इत्यत्र अध्ययनविधिर्न तावत् अपूर्वविधिः । प्रमाणान्तरेणाप्रप्तो विधिरपूर्वविधिरिति अग्रे वक्ष्यते । 'वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वात् भारताध्ययनवदि'ति प्रमाणान्तरेण अध्ययनस्यार्थज्ञानहेतुत्वं प्राप्तम् । अतः प्राप्तविषये नापूर्वविधिः सम्भवति, अप्राप्ते शास्त्रस्यार्थवत्त्वात् । उक्तस्थले परिसंख्याविधिरपि न प्राप्यते । यतोऽनेनान्यत् किञ्चिदध्ययनं न निषिध्यते । परन्तु अध्ययनविधेर्नियमार्थत्वमुपपद्यते । स्वाध्ययविधिना न केवलमक्षरग्रहणात्मकमध्ययनं विहितम्, अक्षरग्रहणात्मकाध्ययेन सह अर्थग्रहणमपि विहितम् । यतोऽर्थावधारणमेवाध्ययनस्य दृष्टफलम् । उक्तञ्च -- 'लभ्यमाने फले दृष्टे नादृष्टफलकल्पना' । इति । यतोऽर्थज्ञानरूपप्राप्तस्य परित्यागे अप्राप्तस्वर्गरूपफलकल्पनायाञ्च कृतनाशोऽकृताभ्यागमश्च दोषौ प्रसज्येते । यद्यपि अध्ययनविधेर्ज्ञानस्वरूपे क्रत्वर्थपूर्वो नियमो न सम्भवति तथापि अशेषक्रतुजन्यम् अपूर्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यस्यापूर्वस्य कल्पकं भविष्यतीति नियमविधिः सार्थक्यं प्राप्नोति । अतो दृष्टफलेऽर्थज्ञाने सम्भवति अदृष्टस्य कल्पयितुमशक्यत्वात् अर्थज्ञानमेव अध्ययनस्य फलं कल्प्यते, न चाध्ययनस्यार्थज्ञानजनकत्वं प्रमाणान्तरेण प्राप्यत इति विधेरानर्थक्यमिति वाच्यम् । अपूर्वविध्यभावेऽपि अध्ययनविधेर्नियमार्थत्वात् नानर्थक्यं भविष्यति । ततश्च वेदवाक्यार्थविचारो वैध एव भवतीति मीमांसाशब्देन विचारयेदेव लभ्यते ।

२· **मीमांसायाः प्रयोजनम्** । स च विचारो यद्यपि वेदवाक्यार्थविषयकस्तथापि वेदमूलकस्मृत्यादिवाक्यार्थविचारोऽपि संलक्ष्यते । विचारेण हि वाक्यार्थनिश्चयः सम्पद्यते । अर्थज्ञानं विना केवलं वेदाध्ययनं भष्मनि घृताहुतिवत् वैयर्थ्यं सम्पद्यते । उक्तञ्च निरुक्ते शाखान्तरगतं वचनद्वयं यास्काचार्येण - 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधुतपाप्मा ॥ यद्गृहीतमविज्ञानं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥' (नि· १/३/७/१, पृ· १६४) इति । तत्र यदि कश्चित् चोदयति

व्याकरणनिगमनिरुक्ताध्ययनेन वेदार्थज्ञानस्य सम्भवादर्थज्ञानार्थं मीमांसाशास्त्रं विचारात्मकं व्यर्थमिति चेत् ? तत्राह – व्याकरणादिज्ञानेन वेदवाक्यानामर्थज्ञानमात्रं सम्भवति, न त्वर्थनिश्चयः, निश्चयस्य विचारसापेक्षत्वात् । तद्यथा – 'अक्ताः शर्करा उपदधाती'त्यत्र शर्कराणामञ्जनं घृतेन वा तैलेन वेति निश्चयो व्याकरणादिना न सम्भवति, मीमांसाशास्त्रेण तु 'तेजो वै घृतमिति वाक्यशेषात् घृतेनाञ्जनमिति निश्चयो भविष्यति । अतो मीमांसाशास्त्रस्यावश्यकत्वम् । मीमांसाशास्त्रे विभिन्नाधिकरणेषु ये विभिन्ना न्यायाः संस्थापितास्ते प्रत्येकं वेदवाक्यमवलम्ब्य प्रवृत्ता अपि तत्तुल्येषु लौकिकवाक्येषूपयुक्ता भवन्तीति निश्चप्रचम् । किञ्च व्यवहाराधिकरणेषु वादिप्रतिवादिनोर्न्यायनिर्णयार्थमधुना या विचारपद्धतिर्दृश्यते सा मीमांसातः समागता इति मन्तुं नासाम्प्रतम् । एवञ्च वेदान्तादिशास्त्रान्तरेषु मीमांसाया उपयोगोऽस्तीत्यन्यत्र वक्ष्यते ।

३. **मीमांसाशास्त्रस्य प्रकाशः** । इदं मीमांसाशास्त्रं न प्रथमं जैमिनिनोपज्ञातम्, किन्तु वेदस्य ब्राह्मणभागे एव मीमांसाशब्दो विचारार्थकत्वेन परिदृष्टः । तद्यथा — 'ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमांसाञ्चक्रुः, को न आत्मा, किं ब्रह्मेति ?' (छा. उ. ५/११/१, पृ. ४४४) । 'सैषा आनन्दस्य मीमांसा भवति' (तै. उ. २/८) इति । एवमन्यत्रापि मन्त्रस्यार्थनिर्णयः क्वचित् क्वचित् स्थले ब्राह्मणभागे प्रदर्शितः । अतो बहुप्राचीनकाले वेदवाक्यार्थनिर्णयो ब्राह्मणभागेन उपनिषदा च प्रदर्शितः । ततो बहुषु कालेष्वतीतेषु अध्येतॄणां बुद्धिमान्द्यात् निश्चितवेदार्थत्वात् अधीतसर्ववेदा ऋषयः कल्पसूत्राणि मीमांसासूत्राणि च कृतवन्तः । तैश्च तदानीन्तनानां वेदार्थनिर्णयोऽभूत् । ततः परं महर्षिजैमिनिः पूर्वाचार्यविरचितानि मीमांसासूत्राणि कल्पसूत्राणि च पर्यालोच्य तत्तच्छास्त्रप्रतिपादितान् न्यायान् युक्तीश्चाभ्युपेत्य वैज्ञानिकरीत्या सर्वमन्त्रब्राह्मणात्मकवेदानां मीमांसासूत्रं द्वादशाध्यायीरूपं प्रणिनाय । पश्चाच्च तेन संकर्षकाण्डात्मकं चतुरध्यायीरूपं शास्त्रं निर्मितम् । तथापि द्वादशाध्याय्या एवाध्ययनाध्यापनादिकं बाहुल्येन प्रचलितमभूदित्यतो द्वादशाध्यायी मीमांसाशास्त्रत्वेन लोके ख्याता । तस्मात् वेदवाक्यार्थनिश्चयं प्रति अधीतवेदः करणं, मीमांसा तु व्यापाररूपा इतिकर्त्तव्यता च सम्पादिकेति । अतो भट्टपादैरुक्तम् – 'धर्मे प्रमीयमाणे हि वेदेन करणात्मना । इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति ॥' इति तन्त्ररहस्ये बृहट्टीकात उद्धृतः (त. र., पृ. ३६) ।

'ब्रह्मा प्रजापतये मीमांसां प्रोवाचे'ति वचनपरम्परायामेकवचने मीमांसायाः प्रयोगाद् ब्रह्माणमारभ्य पूर्वकाले कर्मकाण्डज्ञानकाण्डप्रतिपादकवेदवाक्यानां परस्पराविरोधेन तात्पर्यमासीत् । भारतीयपरम्परायां ब्रह्मा सर्वशास्त्राणामाद्योपदेष्टा मन्यते । श्लोकवार्त्तिकटीकायां सुचरितमिश्रेण च माहेश्वरं मीमांसाशास्त्रमुल्लिखितम् ।

पार्थसारथिमिश्रमतेन ब्रह्मणा प्रजापतये मीमांसाशास्त्रमुपदिष्टम् । सुचरितमिश्रमतेन महेश्वरेण प्रजापतये मीमांसाशास्त्रमुपदिष्टम् । प्रजापतिरिन्द्राय इन्द्र आदित्याय आदित्यो वशिष्ठाय वशिष्ठः पराशराय पराशरः स्वपुत्राय कृष्णद्वैपायनाय कृष्णद्वैपायनश्च स्वशिष्याय जैमिनये मीमांसाशास्त्रं प्रोवाच । कृष्णद्वैपायनस्य नामान्तरं बादरायणः ।

मीमांसाशब्देन पूर्वमीमांसा उत्तरमीमांसा च परामृश्यते । तत्र उत्तरमीमांसा नाम वेदान्तदर्शनं शारीरकमीमांसा वा , पूर्वमीमांसा च कर्ममीमांसा इति व्यपदिश्यते । मीमांसाशब्देन तु प्रायेणैव कर्ममीमांसा लोके लोकायतीकृता । पुरा कर्मज्ञानोपासनात्मकवेदवाक्यार्थस्य मीमांसा (= विचारः) प्रचलितासीत् । जैमिनिः 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (मी॰ सू॰ १/२/१ पृ॰४३) इति सूत्रेण कर्मकाण्डस्य प्राधान्यं प्रतिपादितवान् , तेन च ज्ञानकाण्डं कर्मकाण्डस्याङ्गं सहायकमिति बोध्यते । बादरायणो जैमिनिप्रतिपादितपद्धत्यैव ज्ञानकाण्डस्य प्राधान्यं स्थापयन् ब्रह्मसूत्रं प्रणयाञ्चकार । एवञ्च पूर्वोत्तराभ्यां मीमांसाया भागद्वयं समायातम् । द्वादशाध्यायात्मिकायां पूर्वमीमांसायां धर्मस्यालोचना प्रपञ्चिता । ततश्चास्मिन्नेव दर्शनशास्त्रे त्रयोदशाध्यायात् षोडशाध्यायं यावदिति चतुष्टयाध्यायात्मके संकर्ष(ण)काण्डे देवताकाण्डापरनामके उपासना आलोचिता । चतुरध्यायात्मिकामुत्तरमीमांसामादाय विंशाध्यायं मीमांसाशास्त्रं सम्पद्यते । तदुक्तं प्रपञ्चहृदयनामकग्रन्थे – 'तदिदं (= मीमांसाशास्त्रं) विंशत्यध्यायनिबद्धम् । तत्र षोडशाध्यायनिबद्धं पूर्वमीमांसाशास्त्रं पूर्वकाण्डस्य धर्मविचारपारायणं जैमिनिकृतम् । तदन्यदध्यायचतुष्कम् उत्तरमीमांसाशास्त्रम् उत्तरकाण्डस्य ब्रह्मविचारपारायणं व्यासकृतम् ।' (पृ॰ ३८-३९) इति । तथाच पूर्वोत्तरमीमांसयोरेकशास्त्रता समानतन्त्रता वा । निरुपपदा मीमांसा पूर्वमीमांसेति बोध्यते । सप्तमशतकात् प्रभृति सैव लोकायतीकृता मीमांसा नाम दर्शनं भाट्टप्राभाकरनाम्ना द्विधा विभक्तम् । भाट्टप्राभाकरनामानौ कुमारिलभट्टस्य प्रभाकरमिश्रस्य चोभयोर्वेदसंस्थाकयोः प्रस्थानद्वयं बोधयतः ।

सम्प्रति सम्प्राप्तं सूत्रात्मकं मीमांसादर्शनं महर्षिणा जैमिनिना उपज्ञातमित्युक्तम् । जैमिनेः पूर्वमपि बहव आचार्या वेदार्थविचारं बहुधा कृतवन्तः । एतद्धि जैमिनेर्मीमांसासूत्रात् विस्पष्टं बोध्यते । पूर्वाचार्या खल्वासन् (१) आत्रेयः (४/३/१८,६/१/२६), (२) आलेखनः (सं॰ २/२/४१), (३) आश्मरथ्यः (६/५/१६), (४) औडुलोमिः (वे॰ १/४/२१,३/४/४५,४/४/६), (५) ऐतिशायनः (३/२/४३, ३/४/२४, ६/१/६), (६) कामुकायनः (११/१/५६, ६१) (७) काशकृत्स्नः (काशकृत्स्निर्वा), (८) कार्ष्णाजिनिः (४/३/१७, ६/७/३५), (९) लाबुकायनः (६/७/३७), (१०) बादरायणः (१/१/५, ५/२/१९, ६/१/८,

१०/८/४४, ११/१/६३), (११) बादरिः (३/१/३, ६/१/२७, ८/३/६, ९/२/३३)। तेषां केषाञ्चन मतं स्वमतस्थापनाय अन्येषाञ्च मतं खण्डनाय जैमिनिना स्वसूत्रेषूल्लिखितम्। जैमिनेर्निजमतं ३/१/४, ६/३/४, ८/३/७, ९/२/३९, १२/१/७ इत्यादिसूत्रेण प्रकाशितम्। अधुना प्राभाकरमतरूपेण यत् समुपलभ्यते तस्य प्रथमप्रवक्ता बादरिरिति केषाञ्चन विदुषां मतम्। किञ्च परवर्त्तिकाले कुमारिलभट्टः प्रभाकरमिश्रश्च स्वस्वबुद्धिचातुर्येन सुस्पष्टं परस्परविरुद्धं प्रस्थानद्वयं प्रकाशं नीत्वा प्रसिद्धिमवाप्तौ। ततः प्रभृति मीमांसादर्शने भाट्टमतं प्राभाकरमतं चेति समायातम्। परन्तु भाट्टमतस्य प्रथमप्रवक्ता जैमिनिः प्राभकरमतस्य च बादरिरिति तेषां विदुषामिष्टम्।

तत्र द्वे मूलतत्त्वे तयोर्जैमिनिबादर्योर्मतभेदहेतू स्तः। तद्यथा – बादरिसम्प्रदायाः सर्वे वैदिका अवैदिकाश्च महाजनोपदेशाः फलनैरपेक्ष्येण मान्या महाजनवाक्यत्वादिति मन्यन्ते। जैमिनिसम्प्रदायाः एतन्मतं प्रत्याचष्टिरे प्रत्यपादयंश्च तादृशाः सर्वे उपदेशाः फलवत्त्वेन पालयितव्या इति। तत्र बादरयः चोदनालक्षणस्योपरि गुरुत्वमाददिरे, जैमिनीयास्तु तत्रत्यार्थशब्दस्योपरि। अन्यच्च मूलतत्त्वं येन कारणेन भेदं प्राप्नोति तत् वेदार्थजिज्ञासा वेदाध्यनस्य फलं भवतीति बादरिशिष्या मन्यन्ते, जैमिनीयास्तु धर्मजिज्ञासैव वेदाध्ययनस्य फलं गणयामासुः। शबरस्वामी कुमारिलभट्टश्च बादरेर्मतं प्रत्याख्यायन्तौ धर्मज्ञानं मीमांसाशास्त्रस्य विषयः प्रयोजनं च तदुचतुः। प्रभाकरस्तु भवति बादरिमतानुयायी। अथ एतादृशं मूलपार्थक्यं सुविपुलं प्राप्तं सम्प्रदायद्वयं पुष्णाति। ततः प्रभृति सप्तमशतकात् तत् सम्प्रदायद्वयं भाट्टः प्राभाकरश्चेति नाम्ना प्रख्यातम्। किन्तु साधारणजनाः प्रात्यहिककृत्येषु संकल्पपूर्वककार्यकरणात् भाट्टमत-माद्रितवन्तः। अत इदं स्पष्टं प्रभाकरशिष्याः साधारणजनस्य मनस्तत्त्वं ज्ञातुमशक्ता आसन्, येन च मीमांसापरम्परायां प्राभाकरमतं लोके न बह्वमन्यत।

४. मीमांसकानामितिहासः

जैमिनिः (खृ॰ पू॰ ४००)। जैमिनेः कालमधि विवादे सत्यपि राधाकृष्णान्मतेन खृष्टपूर्वे चतुर्थशतके स्वीकृतेऽपि खृष्टजन्मनो द्वित्रशतवर्षेभ्यः प्राक् काल एव भवितुमर्हति। तस्य पितुर्नाम न ज्ञायते। तथापि 'जैमिनि' इति प्रयोगात् तस्य पितुर्नाम जिमिन जेमिन् वेति भवितुं शक्यते। 'सिंहो व्याकरणस्य कर्त्तुरहरत् प्राणान् प्रियान् पाणिनेः, मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्। छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिंगलम्, अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः॥' (प॰ त॰, पृ॰ २२२) इति श्लोकात् ज्ञायते जैमिनिः हस्तिपदपीडनेन प्राणान् त्यक्तवानिति। जैमिनिः सामवेदियं जैमिनीयं श्रौतगृह्यसूत्रयोश्च प्रवचनं कृतवान्। संकर्षकाण्डसहिता

षोडशाध्यायी मीमांसाशास्त्रं तेन कृतम् । अस्मिन् २७४४ सङ्ख्यकानि सूत्राणि द्वादश अध्यायाः सहस्राधिकाणि अधिकरणानि च सन्ति । चिरं प्रचलिते यज्ञीयकर्मकाण्डे विप्रतिपत्तयः समजायन्त, शाखानां ब्राह्मणग्रन्थानाञ्च कर्मकाण्डपरकाणां वचनानां तात्पर्यज्ञाने मतभेदोऽजायत । अतो विप्रतिपत्तीः दूरीकर्तुं शाखाब्राह्मणवचनतात्पर्यं च यथावत् प्रकाशयितुं मीमांसाशास्त्रस्य प्रवचनं जैमिनिना कृतम् । ग्रन्थेऽस्मिन् नाना यागास्तेषां प्रयोजनम् अपूर्वं तथा दार्शनिकसिद्धान्ता आलोच्यन्ते । तत्र प्रथमाध्यायस्य तर्कपादनामके प्रथमपादे ज्ञानतत्त्वं (epistemology) वेदप्रामाण्यञ्च विवृतम् । किञ्च 'अनर्थका हि मन्त्राः' (नि॰ १/१५) इति कौत्ससदृशानां महायाज्ञिकानां घोषना तेनैव निराकृतात्र ।

प्रपञ्चहृदये विशंत्यध्यायात्मिकायाः पूर्वोत्तरमीमांसाया उपरि बोधायनः, उपवर्षः, देवस्वामी, भवदासः शबरस्वामी चेति पञ्च व्याख्यातार उल्लिखिता दृश्यन्ते । तद्यथा – 'तस्य विंशत्यध्यायनिबद्धस्य मीमांसाशास्त्रस्य कृतकोटिनामधेयं भाष्यं बोधायनेन कृतम् । तद् ग्रन्थबाहुल्यादुपेक्ष्य किञ्चित् संक्षिप्तमुवपर्षेण कृतम् । तदपि मन्दमतीन् प्रति दुष्प्रतिपादं विस्तीर्णत्वादित्युपेक्ष्य षोडशलक्षणपूर्वमीमांसाशास्त्रमात्रस्य देवस्वामिनातिसंक्षिप्तम् । भवदासेनापि कृतं जैमिनीयभाष्यम् । पुनर्द्विकाण्डे धर्ममीमांसाशास्त्रे पूर्वस्य तन्त्रकाण्डस्याचार्यशबरस्वामिनातिसंक्षेपेण संकर्षकाण्डं द्वितीयमुपेक्ष्य कृतं भाष्यमि'ति ।

बोधायनः (खृ॰ पू॰ २००) । बौधायनः इति पाठान्तरं कुत्रचित्स्थलेषु दृश्यते । रामानुजेन वेदान्तसूत्रव्याख्यायां बोधायनवृत्तिमुल्लिख्योक्तम् 'तन्मतानुसारेण (= बोधायनपथेन) सूत्राक्षराणि व्याख्यायन्ते ।' (श्रीभाष्ये १/१/१) । बोधायनस्य शैली ब्राह्मणप्रवचनशैलीसदृशी । अनेन कृतं श्रौतसूत्रस्य विस्तृतम् ।

उपवर्षः (खृ॰ पू॰ २००) । भगवानुपवर्ष आचार्यपाणिनेर्गुरोर्वर्षस्य अनुजः । मीमांसादिग्रन्थे वृत्तिकारनाम्ना उपवर्षः परामृश्यते । तद्यथा – 'वृत्तिकारस्तु अन्यथेमं ग्रन्थं वर्णयाञ्चकारे'ति (मी॰ भा॰ १/१/५, पृ॰ ८), 'तच्चैतद्वृत्तिकारेणोदाहरणोपदेशेनाख्यातमि'ति (मी॰ भा॰ २/१/३२, पृ॰ १३७), 'वृत्तिकारस्तु शिष्यहितार्थं प्रपञ्चितवानि'ति (मी. भा. २।१।३३, पृ. १३८)' एवम् 'अथ गौरित्यत्र कः शब्दः ? गकारौकारविसर्जनीया इति भगवानुपवर्षः' (मी॰ भा॰ १/१/५, पृ॰१५) इति वृत्तिकारस्य उपवर्षस्य मतमुल्लिखितं शबरस्वामिना । पार्थसारथिनाप्यस्योल्लेखः कृतः ।

देवस्वामी (खृ॰ पू॰ १०० ?) । १९६५ खृष्टाब्दे माद्रासविश्वविद्यालयतो देवस्वामिना कृता संकर्षकाण्डस्य व्याख्या प्रकाशिता । केचन देवस्वामिनं भवस्वामिनमाहुरिति ।

भवदासः (खृ॰ १००)। शबरस्वामिना भवदासस्य मतं खण्डितमित्येवं कथयद्‌भिः कुमाररिलभट्टपार्थसारथिमिश्रप्रमुखैः भवदासः परामृष्टः (द्र॰ श्लो॰ वा॰, पृ॰ १९)। सोऽपि वृत्तिकार इत्याख्यायते।

शबरस्वामी (खृ॰ १००)। शबरस्वामिना संकर्षकाण्डवर्जं द्वादशाध्याय्या मीमांसाया उपरि भाष्यं कृतमासीत्। कस्यांश्चित् शबरपल्ल्यां जैनोत्पातभयादात्मगोपनं चकारेति कृत्वा भाष्यकारस्य नाम शबरस्वामीति ख्यातम्। तस्य प्रकृतं नामासीत् आदित्यदेवः। प्रतिसूत्रं विशिष्टतया एतद्भाष्यं विराजते। एतस्मिन् भाष्ये च सूत्रव्याख्यानमुखेन उदाहरणप्रदर्शनेन च पूर्वपक्षसिद्धान्तवर्णनरीत्या विषया उपपादिताः।

भर्तृमित्रः (खृ॰ ६००)। भर्तृमित्रेण विंशत्यध्यायात्मकं मीमांसाशास्त्रमवलम्व्य व्याख्या कृता। भट्टोम्बेकपार्थसारथिमिश्राभ्यां भर्तृमित्रस्य नामोल्लिखितम्।

भर्तृहरिः (खृ॰ ६००)। वाक्यपदीयस्य रचयित्रा भर्तृहरिणा कृतं विंशत्यध्यायात्मकमीमांसाया भाष्यमिति यमुनाचार्येन सिद्धिनामके ग्रन्थे उक्तम्।

'अतः परं षट् सुत्राणि भाष्यकारेण न लिखितानि। तत्र व्याख्यातारो विवदन्ते। केचिदाहुः - विस्मृतानि, लिखितो ग्रन्थः प्रलीन इत्यपरे, फल्गुत्वादुपेक्षितानीत्यन्ये, अनार्षेयत्वादित्यपरे (त॰ वा॰) इति कुमारिलवचनात् ज्ञायते शबरभाष्यस्य बह्वो व्याख्याकारा आसन्निति, परन्तु तेषां ग्रन्थोऽधुना नोपलभ्यते।

कुमारिलभट्टः (खृ॰ ६००-६६०)। कुमारिलभट्टो युगप्रवर्त्तको भवेत्। मण्डनमिश्रः उम्बेकाचार्यः प्रभृतयः प्रसिद्धा मीमांसका अस्य छात्रा आसन्। कुमारिलभट्ट उत्कलसीमान्ते जयमंगलग्रामे समजायत, आन्ध्रस्तैत्तिरीयशाखाध्येता चासीत्। अस्य पितुर्नाम यज्ञेश्वरः मातुश्च चन्द्रगुणा। स बौद्धगुरोः सकाशात् अधीत्य बौद्धदर्शनं खण्डयामास। तेन च धर्मभीरुरसौ गुरुद्रोहस्य प्रायश्चित्तार्थं तुषानलेन प्राणान् त्यक्तवान्।

शबरभाष्यानन्तरं कुमारिलभट्टेन मीमांसकवर्गेषु आचार्येति संज्ञया प्रसिद्धेन वार्त्तिकं विरचितम्। तद्वार्त्तिकञ्च न द्वादशस्वध्यायेष्वेकविधम्, परन्तु प्रथमाध्यायप्रथमपादे यद् वार्त्तिकं तत् श्लोकवार्त्तिकमिति प्रसिद्धम्। श्लोकैरेव भाष्यव्याख्यानमुखेन सूत्रमपि व्याख्यातम्। क्वचित् स्थले भाष्यकारस्य मतापेक्षया स्वातन्त्र्येण स्वं मतमुपदर्शितम्। किञ्च अस्मिन् श्लोकवार्त्तिके प्राधान्येन बौद्धानां मतं विस्तरतो निराकृतम्। यद्यपि चार्वाकमतं न्यायवैशेषिकादिमतं च स्थले स्थले निराकृतं तथापि बौद्धमतमेव विस्तरेण पर्युदस्तमिति दृश्यते। अस्मिन् श्लोकवार्त्तिके न केवलं कर्मकाण्डात्मकं मीमांसकमतं व्याख्यातम्, अपितु दार्शनिकरीत्या ज्ञानकाण्डपद्धतौ प्रमाणानां प्रामाण्यस्य स्वतस्त्वपरतस्त्वादिकं दार्शनिकानां प्रसिद्धपदार्थविषये तथा

प्रमाणविषये एवं प्रतिपादितं येन एतच्छ्लोकवार्त्तिकं दार्शनिकानां सर्वेषां शब्दसाहित्यशास्त्रिणां चोपजीव्यमिति दृश्यते । यतः कुमारिलस्य उत्तरकालीनशास्त्रकाराणां स्वस्य ग्रन्थेषु एतद्वार्त्तिकवाक्यं बहुषु च स्थलेषु दृश्यते । यथा कुमारिलकालोत्तरं प्रणीतेषु जैनग्रन्थेषु बौद्धग्रन्थेषु वेदान्तग्रन्थेष्वपि सर्वत्र श्लोकवार्त्तिकोद्धृतिः परिदृश्यते । एवं मीमांसाशास्त्रस्य प्रथमाध्याये प्रथमपादे श्लोकवार्तिकविरचनानन्तरं मीमांसाशास्त्रस्य प्रथमाध्यायस्य द्वितीयपादात् तृतीयाध्यायान्तं यावत् तन्त्रवार्त्तिकं विरचितमाचार्यपादैः । तन्त्रवार्त्तिके गद्यानि पद्यानि च मूलतया दृश्यन्ते । तन्त्रवार्त्तिके प्राधान्येन मीमांसकमतं प्रदर्शितम् । क्वचित् प्रसंगेन मतान्तरं निराकृतमिति लक्ष्यते । ततश्चतुर्थाध्यायात् द्वादशाध्यायान्तं यावत् गद्येन टुप्टीकेति व्याख्या कृता । सा च संक्षिप्तेति टुप्टीका नाम्ना ज्ञायते । एतद्व्यतिरेकेण शाबरभाष्यस्योपरि बृहट्टीका नामैका व्याख्या तेन विरचिता भवेत् । सा चाधुना प्रायशो न परिदृश्यते । कुत्रचित् ग्रंन्थागारेऽस्तीति कर्णपरम्परया श्रूयते । एवञ्च मध्यमटीका नामेति ग्रन्थस्तस्य नाम्ना प्रचलति । अन्ये केचन ग्रन्था आचार्यविरचिताः सन्तीति श्रूयन्ते । परन्तु तेषां नामानि अधुनास्माभिः संग्रहीतुं न शक्यानि ।

एवं मीमांसादर्शने वार्त्तिकग्रन्थविरचनानन्तरं वार्त्तिकस्य व्याख्याग्रन्थास्तथाधिकरणप्रदर्शनमुखेन स्वतन्त्रा मीमांसाग्रन्था बहवो विरचिता आसन्नुत्तरकाले । वार्त्तिकव्याख्याग्रन्थेषु त्रयः प्राधान्यं प्राप्नुवन् । प्रथमा उम्बेकभट्टकृता तापर्यटीकेति नाम्ना व्याख्या श्लोकवार्त्तिकस्योपरि दृश्यते । द्वितीया सुचरितमिश्रस्य काशिका व्याख्या श्लोकवार्त्तिकस्योपरि विद्यते । पार्थसारथिमिश्रकृता न्यायरत्नाकरनाम्ना व्याख्या परिदृश्यते । जयमिश्रकृता शर्करिका नाम टीकाप्यसम्पूर्णा समुपलभ्यते । टुप्टीकोपरि वेङ्कटेश्वरेण कृतं वार्त्तिकाभरणमिति ।

प्रभाकरमिश्रः (खृ. ६१० - ६९०,६२० - ७००) । यावन्तं प्रभाकरस्य प्रभावं पश्यामो न तावन्तं तस्य सांस्तविकं किञ्चिज्जानीमः । अपितु जनश्रुतिः समायाति 'अत्र तुनोक्तम्, तत्रापिनोक्तम्' इत्यस्य प्रकृतपाठं बोद्धुं यदा न समर्थोऽभवत् कुमाररिलस्तदा तस्य शिष्यः प्रभाकरः 'अत्र तुना उक्तम्' 'तत्र अपिना उक्तम्' इत्येवं पाठं कृत्वा स्वबुद्धिचातुर्यं प्रकाशितवान्, तेन च प्रीतः गुरुः कुमारिलस्तं प्रभाकरं गुरुशब्देनालञ्चकार । ततः प्रभृति स 'गुरुः' इत्यनेन परिचीयते । प्रभाकरमिश्रेन प्रतिपादितं मतं मीमांसासम्प्रदाये गुरुमतनाम्ना प्राभाकरमतनाम्ना च व्यवह्रियते । प्रभाकरेण द्वे टीके लिखिते शाबरभाष्यस्योपरि । टीकाग्रन्थद्वयस्य नाम बृहती लघ्वी च । प्रथमाया नामान्तरं निबन्धनम् द्वितीयायाश्च विवरणम् । ते च कुमारिलभट्टमतान्मतान्तरव्याख्यात्वेन ज्ञायेते । येन मीमांसाजगति भाट्टमताद् भिन्नं गुरुमतमिति ख्यायते । स्वगुरोः कुमारिलभट्टस्य मतनिरसनं तत्र ग्रन्थद्वये वर्त्तते । प्रभाकरः

मण्डनमिश्रस्य उम्बेकभट्टस्य च समसामयिकः सतीर्थश्चासीत्। तदुक्तम् - 'उम्बेकः कारिकां वेत्ति तन्त्रं वेत्ति प्रभाकरः। मण्डनस्तूभयं वेत्ति नोभयं वेत्ति रेवणः॥' इति।

मण्डनमिश्रः (खृ ६१५ - ६९५, ६२० - ७१०)। कुमारिलभट्टस्यानुयायिषु मण्डनमिश्रस्य नामोल्लेखनीयम्, यं मण्डनमिश्रं विजित्य शङ्कराचार्यः कर्ममीमांसातो ब्रह्ममीमांसायाः श्रेष्ठत्वं विशदीचकारेति दन्तकथा प्रचलिता। कुप्पुस्वामिनो मते तस्य कालः ६१५ खृष्टाब्दात् ६९५ खृष्टाब्दः। पि॰वि॰ कानेमते तु ६२० - ७१० इति। स नैष्कर्म्यसिद्धेः कर्त्ता मानसोल्लासादीनां च रचयिता, मण्डनमिश्रोऽसौ परवर्त्तिकाले सुरेश्वराचार्यनामा शङ्करशिष्योऽभवत्। स च कुमारिलभट्टस्यापि शिष्य आसीत्। स बादरिसम्प्रदायमतं प्रत्याख्यायतां जैमिनिसूत्राणामुपरि उपश्लोकितं विवादास्पदविषय-मधिकृत्य विधिविवेक-भावनाविवेक-विभ्रमविवेकान् ग्रन्थान् रचायामास। ग्रन्थत्रयेऽ-स्मिन् यथासंख्यं प्रभाकरस्य कार्यपरवाक्यवादो नियोगवाक्यार्थवादोऽख्यातिवादश्च निरस्तः।

अत्रेदं स्मर्त्तव्यम् – वाचस्पतिमिश्रः स्वग्रन्थे न्यायकणिकायां विधिविवेकस्योपरि टीकां कुर्वण् उट्टंक्तिवान् प्रभाकरः स्वनाम्ना प्रचलितमतस्यादिप्रवक्ता न स्यात्, परन्तु **वृद्ध**मीमांसकानां तादृशमतं विधिभावनाविभ्रमवादेष्वासीदिति। मण्डनमिश्रस्य मीमांसानुक्रमणिका अद्वैतवेदान्ते च ब्रह्मसिद्धिर्नाम ग्रन्थद्वयमस्ति।

उम्बेकभट्टः (खृ॰ ६७०-७५०)। किम्वदन्त्यनुसारेण स कुमारिलस्य छात्रः प्रसिद्धनाट्यकारो भवभूतिरेव। स मण्डनमिश्रस्य भावनाविवेकस्योपरि व्याख्यां कृत्वा मीमांसकवर्गेषु स्वस्थानमकरोत्। तत्कृता श्लोकवार्त्तिकस्योपरि टीका स्फोटवादान्तं यावत् मुद्रापिता। वार्त्तिकस्योपरि टीकामन्वाख्यायता तेनोम्बेकपादेन कुमारिलभट्टाक्षिप्तं पूर्वपक्षिमतं परिश्चक्रे। ततः परं प्रभाकरस्य कुमारिलाक्षिप्तं मतमभिनवतयोपस्थाप्य तदेव स पूर्वपक्षिमतं शबरस्वामिसम्मतमिति कृत्वा प्रत्यपादयत्। भिन्नभिन्नप्रसंगेषु उम्बेकपादः (१) सत्कार्यवादः, (२) कारणगुणप्रक्रमेण कार्ये गुणारम्भः, (३) प्रामाण्यं नाम परिच्छेदात्मिका शक्तिः, (४) बोधकत्वं नाम प्रामाण्यम्, (५) बोधात्मकत्वमात्रं प्रामाण्यम् (६) श्रोत्रवृत्तिरेव शब्दः समीपं गच्छतीति सिद्धान्तान् दृढतयावहेलयत्।

शालिकनाथमिश्रः (खृ॰ ६९०-७६०)। प्राभाकरपरम्परायां शालिकनाथोऽतीव श्रेष्ठः प्रवक्तासीत्। 'प्रभाकरगुरोर्भावे मितगम्भीरभाषिणा' (बृ॰ व्या॰, पृ॰ १) इति दृष्ट्वा केचन तं प्रभाकरस्य साक्षाच्छिष्यं मन्यन्ते। स प्रभाकरस्य लघ्वीबृहतीटीकयोः क्रमेण ऋजुविमलां दीपशिखां च नाम व्याख्यां कृतवान्। अनेनैव मीमांसाभाष्यपरि-शिष्ठस्य प्रकरणपञ्चिका कृता। शालिकनाथेन स्वयं मण्डनमिश्रस्य विधिविवेकतो बहूद्धारः कृतः वाचस्पतिमिश्रेण च ऋजुविमला-पञ्चिकातः शेषोद्धारः कृत इत्यतः स शालिकनाथो मण्डनमिश्रात् पश्चाद्भावी वाचस्पतिमिश्राच्च पूर्वभावी भवेत्, तेन च तस्य

खृष्टीयाष्टमशतकः (६९० – ७६०) समयो भवितुं शक्यते । श्रीगोपीनाथ-कविराजमहाशयेन चोदयनाचार्यस्य (खृ० ९८४) समसामयिकतया स प्रतिपादितः, तत्र युक्तमुत्पश्यामः । उदयनाचार्यस्तं कुसुमाञ्जलौ गौडमीमांसकशब्देनाख्यातवान् । गौडः = वंगः इति ।

महोदधिः महाव्रतश्च (खृ० ७०० – ७७०) । महोदधिः प्राभाकरपन्थी आसीत् । प्राभाकरमतेन स निबन्धनादिकं रचितवान् । तस्मिन्नेव समये तस्य प्रतिद्वन्द्वी भाट्टमतावलम्बी महाव्रतः भाट्टमतेन ग्रन्थं प्रणयामास । प्रबोधचन्द्रोदये अनयोर्नामोल्लिखितम् । भवनाथभट्टेनापि नयविवेके अनयोर्नाम गृहीतम् ।

वाचस्पतिमिश्रः (खृ० ८४१) । वाचस्पतिरासीत् मैथिलब्राह्मणः त्रिलोचन-शिष्यश्च । स मीमांसायां तत्त्वविन्दुः, भावनाविवेकन्यायकणिकादीन् ग्रन्थान् रचितवान् । अनेन न्यायवार्त्तिकस्य तात्पर्यटीका विरच्य धर्मकीर्त्तेः खण्डनपूर्वकं वार्त्तिकमतं समर्थितम् । भामती-सांख्यतत्तकौमुद्याद्यनेकटीकाकारः स षड्दर्शनीवल्लभसर्वतन्त्र-स्वतन्त्रोपाधिना भूषितो भवति ।

भवनाथभट्टः (खृ० ९००) । स मिथिलानिवासी प्राभाकरश्चेति निश्चप्रचम् । अनेन शालिकनाथस्य वाचस्पतिमिश्रस्य च ग्रन्था उल्लिखिताः मुरारिमिश्रेण भवनाथस्य तद्ग्रन्थस्य चोल्लेखः कृतः । अतस्तस्य कालो नवमशताब्दी भवितुं शक्यते । मीमांसाया द्वादशाध्यायस्योपरि नयविवेको नाम विस्तृतं निबन्धनं तेनाक्रियत ।

भवदेवभट्टः (खृ० ११००) । स बंगभाषी हुगलीमण्डलस्थे सिद्धलनामकग्रामे निवासं चकार । भवदेवोऽसाधारणो मीमांसको विचारमल्लः अद्वैतवेदान्तेऽपि निष्णात आसीत् । स राजनीतिज्ञो हरिवर्मदेवस्य मन्त्री उत्कलदेशं जितवान् । तन्त्रवार्त्तिकाशयं गृहीत्वा तेन तौतातिकमततिलकनामकं निबन्धनं रचितम् । व्यवहारतिलकं व्यवहारतन्त्रं सामवेदीयकर्मानुष्ठानपद्धतिः प्रायश्चित्तनिरूपणं प्रभृतयो ग्रन्थास्तस्य पाण्डित्य-मुद्घोषयन्ति । अत्रेदं स्मर्त्तव्यम् – भट्टस्य लोकप्रियो नाम तौतात इत्यतस्तौतातिकस्य मतमादाय स तादृशनामकं ग्रन्थं सन्दर्भितवान् ।

सुचरितमिश्रः (खृ० ११००) । भाट्टस्य सुचरितमिश्रस्य कृता काशिका नाम श्लोकवार्त्तिकस्य टीका प्रसिद्धेति न कश्चित् सन्देहः, न्यायरत्नाकरापेक्षया टीकेयम-तीव विस्तृता । स पार्थसारथेः पूर्वभावीति ज्ञेयम् ।

पार्थसारथिमिश्रः (खृ० १०५० – ११२०) । स प्रकाण्डभाट्टपण्डितो यज्ञात्मसूनुर्मैथिलब्राह्मण आसीत् । तेन टुप्टीकायास्तन्त्ररत्ननाम्नी, श्लोकवार्त्तिकस्य न्यायरत्नाकरनाम्नी मीमांसासूत्रस्य द्वादशाध्यायानाञ्च शास्त्रदीपिकानाम्नी टीका लिखिता, न्यायरत्नमालानाम्नी च तस्य चतुर्थो ग्रन्थो ज्ञायते ।

पार्थसारथिमिश्रस्य कालस्तावत् पञ्चदशखृष्टाब्द इति केचिदाहुः । तैरुक्तम् –

ऊनचत्वारिंशदधिकषोडशशततमखृष्टाब्दे अप्पयदीक्षितविरचितग्रन्थेषु पार्थसारथिमिश्र-नामसंवाददर्शनात् अप्पयदीक्षितात् प्राचीनोऽयमिति । परन्तु तस्य कालः १०५० - ११२० खृष्टाब्दं यावत् भवितुं शक्यत इति बहुभिर्विद्वद्भिर्मतम् ।

श्रीकरः (खृ० ११००) । श्रीकरमतरूपेण विभिन्ना शब्दार्थीया विषयाः शक्तिवादादिग्रन्थे आलोचिताः परिदृश्यन्ते । श्रीकरेण 'प्रकाशः' इति नाम्ना निबन्धं विरच्य प्रकाश इति नाम जग्राहे । स प्राभाकरसम्प्रदायस्य प्रधानः परिपोषको भवति ।

सोमेश्वरभट्टः (खृ० १२००) । तन्त्रवार्त्तिकव्याख्यानभूता सर्वोपकारिणी, सर्व-निबन्धकारिणी अथवा राणकापरनामधेया न्यायसुधा माधवभट्टस्य पुत्रेण सोमेश्वरभट्टेन कृता लक्ष्यते । न्यायसुधाया उपरि अन्यैर्विरचिता काश्चिद् व्याख्या अवगम्यन्ते । तन्त्रसारनाम्नापि सोमेश्वरस्य ग्रन्थान्तरमस्ति ।

परितोषमिश्रः (खृ० १२००) । स वंगभाषी भाट्टमीमांसकः । तेन तन्त्रवार्त्तिक-स्योपरि भाष्यमतसुगमकारिणी अजिता नाम टीका कृता । अस्य ग्रन्थस्य नामान्तरं तन्त्रटीकानिबन्धनमिति ।

मुरारिमिश्रः (खृ० ११५० - १२२०) । यद्यपि भाष्यमाधारीकृत्य भाट्टमतं प्राभा-करमतं मुरारिमिश्रमतमिति मीमांसकवर्गेषु मतत्रयं प्रचलितमासीत् तथापि मुरारिमिश्रस्य शाबरभाष्यस्योपरि विरचिता व्याख्याधुना नोपलभ्यते । केवलं प्रामाण्यस्य स्वतस्त्व-परतस्त्वविचारे भाट्टप्राभाकराभ्यां तस्य मतभेदो दार्शनिकग्रन्थेषूपलभ्यते । किञ्च तेन भवनाथस्य मतमपि खण्डितमिति ज्ञायते । तस्याधिकरणविवेचनात्मकं ग्रन्थद्वयं त्रिपादी-नीतिनयनम् एकादशाध्यायाधिकरणञ्च सम्प्रति प्राप्यते । मुरारिर्नामैकः कविरपि आसीत् । स मौद्गल्यगोत्री वर्धमानस्य तन्तुमत्याश्च पुत्रो भवति । तमधिकृत्य वर्त्तते श्लोकः - 'मुरारिपदचिन्तायां भवभूतेस्तु का कथा । भवभूतिं परित्यज्य मुरारिमुररीकुरु ॥' इति । केचन कविमीमांसकौ एकमुरारित्वेन कल्पन्ते ।

हलायुधभट्टः (एकादशशताब्दः) । अयं जनो वंगवास्तव्यः । तस्य मीमांसा-शास्त्रसर्वस्वं जैमिनिसूत्रस्योपरि अधिकरणक्रमानुसारेण व्याख्यात्मकम् ।

चिदानन्दपण्डितः (खृ० १२००) । दाक्षिणात्येन चिदानन्दपण्डितेन भाट्टमता-नुसारेण नीतितत्त्वाविर्भावनामकं निबन्धनमत्युत्कृष्टं प्रणीतम् । अस्मिन् ग्रन्थे श्लोकवार्त्तिकानुसारेण अध्ययनवादः कार्यवादः प्रभृतयः ४४-वादाः प्रदर्शिताः । तस्य चिदानन्दस्य मतानुवर्त्तनेन सुप्रसिद्धो मानमेयोदयो नाम ग्रन्थो रचितो भवेत् ।

नन्दीश्वरः (खृ० १२२० - १३००) । केरलदेशीयेन नन्दीश्वरेण नयविवेकस्य कर्त्तुः भवनाथस्य पञ्चिकायाश्च प्रणेतुः शालिकनाथस्य मतावलम्बनेन प्राभाक-रसिद्धान्तानां संकलनात्मकः प्रभाकरविजयो नाम प्रकरणग्रन्थः प्रणीतः ।

गंगाधरमिश्रः (खृ० १२३० - १३००) । अस्य नामान्तरं गदाधरमिश्रः । अनेन तन्त्रवार्त्तिकस्योपरि न्यायपरायणं तन्त्रवार्त्तिकविवरणापराख्यं टीका रचिता । उक्तञ्च

स्वयमेव – 'शाल्मलिग्रामसम्भूतो भट्टसोमेश्वरात्मजः । गंगाधरोऽतिगम्भीरं व्यावृणोत् तन्त्रवार्त्तिकम् ॥' इति । स मैथिल आसीत् ।

वेदान्तदेशिकः (खृ॰ १२६९ – १३६९) । वेंकटनाथापरनामधेयो दाक्षिणात्यः काञ्चीवरमिति ग्रामेऽजायत । स कवितार्किकनाम्नाभिधीयते स्म । तेन मीमांसासूत्राणां संकलय्य पद्यात्मिका मीमांसापादुका विरचिता । तेन गद्येन सेश्वरमीमांसां प्रणीय भाट्टप्राभाकरमुरारिमिश्राणां मताद् भिन्नं स्वीयं मतं समुद्घोषितम् । ग्रन्थेऽस्मिन् विशिष्टाद्वैतवेदान्तस्य छाया संलक्ष्यते ।

गुरुमताचार्यः चण्डः (खृ॰ द्वादशशताब्दः) । मुरारिमिश्रैः त्रिपादीनीतिनयनेऽस्य नामोल्लेखात् अयं मुरारेः समसामयिको भवेत् । अस्य द्वौ ग्रन्थौ, मीमांसासूत्राणां सरलव्याख्यात्मको न्यायरत्नाकरः अपरश्च अमृतबिन्दुः स्तः ।

माधवाचार्यः (खृ॰ १२९७ – १३४६) । दाक्षिणात्यब्राह्मणो विद्यारण्यापरनामधेयो विजयनगरराजबुक्कमन्त्री वेदभाष्यकृत्सायणज्येष्ठभ्राता श्रीमन्माधवाचार्य इति सुगृहीतनामा मीमांसादर्शने संक्षिप्ततया मीमांसापदार्थं साकल्येन स्वकृते जैमिनीयन्यायमालाविस्तरनाम्नि ग्रन्थे प्रदर्शिवान् । तेनैव ग्रन्थोपद्घाते उक्तम् – 'मीमांसासागरस्तेन क्रीडापुष्करिणी भवेत् ।' (जै॰ न्या १/४, पृ॰ ५) इति । सर्वस्य मीमांसासूत्रस्य सारमाहृत्य सरोवर इव मीमांसापदार्थः आकलयितुं शक्यते । अस्य माधवाचार्यस्य सर्वदर्शनसंग्रहो विवरणप्रमेयसंग्रहो जीवन्मुक्तिविवेकः पञ्चदशीत्यादयो ग्रन्थाः सन्ति । स्वरूपाचार्यस्य शिष्योऽसावासीच्च निम्बार्कमतावलम्वी ।

भट्टविष्णुः (खृ॰ १४ शताब्दः) । अस्ति चतुर्दशशताब्दस्यान्तिमभागे जायमानस्यास्य प्राभाकरपरम्परायां तर्कपादस्य व्याख्यायां नयतत्त्वसंग्रहनामको ग्रन्थः ।

अनन्तनारायणः (खृ॰ १४००) । अनेन परितोषमिश्रकृताया अजिताया उपरि विजया नाम व्याख्या कृता ।

रविदेवः (खृ॰ १४००) । अनेन भवनाथेन कृतस्य नयविवेकस्य उपरि विवेकतत्त्वं नाम टीका कृता ।

परमेश्वराः (खृ॰ १३०० – १५५०) । परमेश्वर इति नाम्ना त्रयः केरलदेशीयाः पुत्रपौत्रक्रमेण मीमांसाचार्या आसन् । प्रथमः परमेश्वरो वाचस्पतिमिश्रकृताया न्यायकणिकाया उपरि जुषध्वंकरणी स्वदितंकरणी चेति व्याख्याद्वयं कृतवान् । द्वितीयः परमेश्वरः प्रथमस्य पौत्रः । स मण्डनमिश्रस्य स्फोटसिद्धेर्विभ्रमविवेकस्य, वाचस्पतिमिश्रस्य तत्त्वबिन्दुनामकग्रन्थस्य चिदानन्दस्य नीतितत्त्वाविर्भावस्य चोपरि टीकां रचितवान् । तृतीयः परमेश्वरोऽपि द्वितीयस्य पौत्रः । अनेन शाबरभाष्यस्योपरि भाट्टमतेन मीमांसासूत्रार्थसंग्रहनाम्नी टीका कृता । श्लोकवार्तिकस्योपरि सुचरितमिश्रकृतायाः काशिकाया व्याख्यानेन कृता ।

इन्द्रपतिठाकुरः (खृ॰ १४००)। अस्य कालः पञ्चदशशताब्दस्य पश्चाद्भागो भवेत्। अस्य पितुर्नाम रुचिपतिरुपाध्यायः, गुरुश्च गोपालभट्टः। स मथुरायां वासं चकार। भाट्टपरम्परायां मीमांसादर्शनस्योपरि मीमांसापल्लवनामको ग्रन्थोऽनेन विरचितः।

गोविन्दठाकुरः (खृ १४७८)। स मीमांसादर्शनस्योपरि अधिकरणमाला इत्याख्यं ग्रन्थं बवन्ध।

वरदराजः (खृ॰ १५०० - १५७०)। तार्किकरक्षाकर्त्तुरन्योऽयं जनः। अनेन प्राभाकररमतेन नयविवेकस्योपरि दीपिका नाम टीका कृता।

रघुनाथभट्टः (खृ॰ १५००)। अस्य सम्बन्धे आंगलभाषायां कृते Preface - इत्यस्मिन् प्रमाणरत्नग्रन्थस्य पञ्चिकायाञ्चाकथयत् कथयिष्यते च।

अप्पयदीक्षितः (खृ॰ १५२० - १५९३)। अयं गोत्रेण भारद्वाजः, रंगराजाध्वरीन्द्रपुत्रो दाक्षिणात्यब्राह्मणो विजयनगरशासितुः कृष्णराजस्य समसामयिकः। मीमांसायामस्य विधिरसायनं वादनक्षत्रमाला उपक्रमपराक्रमः शास्त्रदीपिकायाष्टीका मयूखावलिः चित्रपटो धर्ममीमांसापरिभाषा इत्यादयो ग्रन्था देदीप्यन्ते। वेदान्तदर्शने कल्पतरुटीकाया परिमलनामिका व्याख्या, न्यायरक्षामणिः शैवश्रीकण्ठभाष्यस्योपरि शिवार्कमणिदीपिका चेति ग्रन्थास्तेनैव निर्मिता यत्र मीमांसादर्शनस्यालोचनापि स्थले स्थले विद्यते।

विजयीन्द्रभिक्षुः (खृ॰ १५३९ - १५९७)। इदं तस्य सन्न्यासाश्रमस्य नाम, गृहाश्रमस्य च विट्ठलाचार्यः। अयं माध्वमतावलम्बी वैष्णव आसीत्। अनेन मीमांसायां न्यायाध्वदीपिका मीमांसान्यायकौमुदी उपसंहारविजयः इत्यादयो ग्रन्था रचिताः। अयं जनोऽप्पयदीक्षितस्य प्रवलः प्रतिद्वन्दी आसीत्।

देवनाथठाकुरः (खृ॰ १५६२)। गोविन्दठाकुरस्य पुत्रेणानेन मीमांसाया उपरि अधिकरणकौमुदी नाम ग्रन्थो निबद्धः।

रामकृष्णभट्टः (खृ॰ षोडशशतकः)। अस्य पितुर्नाम रामचन्द्रः मातुश्च प्रभावती। अनेन शास्त्रदीपिकाया अपि सिद्धान्तचन्द्रिका नाम टीका कृता। 'भट्टः' पण्डितशिरोमणिरित्यादिभिरुपाधिभिः स आख्यायते।

वेंकटेश्वरदीक्षितः (खृ॰ षोडशशतकः)। अयम् अप्पयदीक्षितस्य समसामयिकः। अस्य पितुर्नाम गोविन्ददीक्षितो मातुश्च नागमाम्बा। मीमांसादर्शनेऽनेन टुपटीकाया व्याख्यात्मकं वार्त्तिकाभरणं नाम ग्रन्थः कृतः। अस्य शिष्येण राजचूडामणिना तन्त्ररक्षामणिनामके ग्रन्थे लिखितम् - 'अस्ति गोविन्दयज्वेन्द्रनागमाम्बातपः फलम्। श्रीवेंकटेश्वरमुखी, सर्वतन्त्रस्वतन्त्रधीः॥ व्यतानि 'शुल्बमीमांसा' तथा कर्मान्तवार्त्तिकम्। टुपटीकायाः कृता टीका वार्त्तिकाभरणाभिधा॥' इति।

शंकरभट्टः (खृ॰ १५५० – १६२०)। अनेन शास्त्रदीपिकाया उपरि प्रकाशो नाम टीका कृता। द्वादशाध्याय्या मीमांसाया विषयान् संक्षेपेणाकलय्य मीमांसावालप्रकाशो नाम प्रकरणग्रन्थोऽनेन रचितः। मीमांसासारसंग्रहोऽपि पद्येन रचितः प्रकरणग्रन्थान्तरमस्यास्ति। तेन विधिरसायनदूषणं नाम ग्रन्थान्तरमपि प्रणीतम्।

नारायणभट्टः (खृ॰ १५६० – १६५६)। अयं प्रसिद्धमीमांसकस्य मातृदत्तस्य पुत्रः, यो तन्त्रवार्तिकस्योपरि निबन्धनं नाम व्याख्यां कृतवान्। अस्यासम्पूर्णे मानमेयोदये नाम ग्रन्थे रघुनाथस्य पश्चात् प्रमाणानां सांगोपांगविचारः कृतः।

लौगाक्षिः भास्करः (खृ॰ १६००)। लौगाक्षिरस्य वंशनाम भास्करश्च स्वस्य। अस्य पितुर्नाम रुद्रः दाक्षिणात्यं च वासस्थानम्। अयं भाट्टमतेन अर्थसंग्रहं नामातीव सरलं ग्रन्थं बवन्ध। तर्ककौमुदी नाम वैशेषिकग्रन्थश्चानेन कृतः।

आपदेवः (खृ॰ १५८० – १६५०)। अयं काशीवास्तव्यः एकनाथमहात्मनः कुले समुत्पन्नोऽनन्तदेवस्य पुत्रः। अनेन मीमांसान्यायप्रकाशो नाम ग्रन्थो रचितः।

खण्डदेवमिश्रः (खृ॰ १५७५ – १६६५)। अयं धुरन्धरो मीमांसको नव्यन्यायपथेन नव्यमीमांसां प्रणीतवान्। अयं काशीवास्तव्यो दाक्षिणात्यब्राह्मणो रुद्रदेवपुत्रो रसगंगाधररचयितुः पण्डितराजजगन्नाथस्य पितुः पेरुभट्टस्य गुरुरासीत्। अयं मीमांसायां भाट्टकौस्तुभ-भाट्टदीपिका-भाट्टरहस्यानां रचयिता।

राजचूडामणिदीक्षितः (खृ॰ १५८० – १६५०)। अनेन मीमांसादर्शने तन्त्रशिखामणिः संकर्षमुक्तावली शास्त्रदीपिकायाश्च टीका कर्पूरवार्त्तिकमिति ग्रन्थत्रयं प्रणीतम्।

वेंकटाध्वरी (खृ॰ १५९० – १६६०)। अनेन मीमांसादर्शने विधित्रयपरित्राणं मीमांसामकरन्दश्चेति ग्रन्थद्वयं रचितम्।

कमलाकरभट्टः (खृ॰ १५९० – १६६०)। अनेन तन्त्रवार्त्तिकस्योपरि टीका शास्त्रदीपिकाया उपरि आलोको नाम व्याख्या रचिता। धर्मशास्त्रे निर्णयसिन्धुर्नाम ग्रन्थोऽनेन कृतः।

दिनकरभट्टः (खृ॰ १५६३ – १६७०)। अयं कमलाकरभट्टस्य भ्राता। अनेन मीमांसासूत्रस्योपरि संक्षिप्ता टीका कृता।

नारायणभट्टः (खृ॰ १५८७ – १६५६ ?)। मीमांसकवर्गेषु बाहुल्येन मिश्रस्य भाट्टस्य चेति वंशद्वयस्य नाम समुपलभ्यते। मिश्रवंशो विशेषतो मिथिलायां भट्टवंशश्च दक्षिणभारते वासं चकार। कदाचित् भट्टवंशीया दक्षिणभारतात् काश्यामाजग्मुः, तत्र च ते वैदिकसाहित्यस्य — विशेषतो मीमांसादर्शनस्य प्राज्यां प्रगतिं प्रापयन्। नारायनभट्टोऽयं वंशस्यास्य भवति रत्नमेकम्। तस्य पितुर्नाम रामेश्वरभट्टो मातुश्च उमा। अनेन मीमांसाशास्त्रस्योपरि बहवो ग्रन्थाः कृताः। तेन वृत्तरत्नाकरस्य शास्त्रदीपिकायाश्च व्याख्या विरचिता।

भट्टकेशवः (खृ॰ १६००) । लौगाक्षिवंशे जातोऽयं मीमांसार्थप्रकाशिकां प्रणीतवान् ।

सोमनाथदीक्षितः (खृ॰ १६००) । अनेन शास्त्रदीपिकाया उपरि मयूखमालिका नाम टीका कृता ।

यज्ञनारायणदीक्षितः (खृ॰ १६००) । अनेन शास्त्रदीपिकाया उपरि प्रभामण्डलं नाम टीका विरचिता ।

रामकृष्णदीक्षितः (खृ॰ १६०० – १६७०) । अनेन मीमांसान्यायदर्पणं नाम मीमांसासूत्रस्य व्याख्या प्रणीता ।

दिनकरभट्टो जीवदेवश्च (खृ॰ १६०० – १६७०)। भ्रातृभ्यामाभ्यां न्यायप्रकाशस्योपरि भाट्टालंकारो नाम टीका कृता । जीवदेवेन च भाट्टभास्करो नाम ग्रन्थान्तरं विरचितम् ।

कवीन्द्राचार्यः (खृ॰ १६०० – १६७०) । अनेन तन्त्रवार्त्तिकस्योपरि टीका रचिता ।

वरदराजः (खृ॰ १६२०) । अस्य प्रपितामहः प्रणतार्तिहरः, पितामहः देवनाथः पिता च रंगनाथः, आसीच्चास्य गुरुः सुदर्शनः । अनेन भवनाथस्य नयविवेकस्योपरि दीपिका कृता । अयं ज्योतिषे आयुर्वेदे व्याकरणे च निपुण आसीत् ।

अनन्तभट्टः (खृ॰ १६३० – १७३०) । आपदेवस्य पुत्रोऽयं मीमांसासूत्रस्योपरि शास्त्रमालावृत्तिरिति संक्षिप्तां व्याख्यां कृतवान् । अनेन मीमांसान्यायप्रकाशस्योपरि भाट्टालंकारनामको ग्रन्थो बबन्धे ।

अनन्तभट्टः (सप्तदशशताब्द्या उत्तरार्ध्वम्) । कमलाकरस्य पुत्रोऽयं स्वपितुः न्यायमालाया उपरि ज्योत्स्नां नाम वृत्तिं लिलेख, जैमिनेः सूत्रस्योपरि न्यायरहस्यनाम्ना व्याख्यां चाकरोत् ।

नीलकण्ठदीक्षितः (सप्तदशशताब्दी) । अयं रामेश्वरभट्टस्य प्रपौत्रः नारायणभट्टस्य (द्वितीयस्य) पौत्रः शंकरभट्टस्य च पुत्रः । अस्य मीमांसादर्शने भाट्टार्कापरनामधेयो मीमांसान्यायसंग्रहो ग्रन्थोऽस्ति ।

शंकरभट्टः (सप्तदशशताब्दी) । अयं नीलकण्ठस्य पुत्रः भाट्टभास्करनाम्ना जैमिनिसूत्रस्योपरि व्याख्या रचितवान् ।

दिनकरभट्टः (सप्तदशशताब्दी) । रामकृष्णभट्टस्य पुत्रोऽयं छत्रपतेः शिवाजेराश्रये वसन् न्यायमीमांसाधर्मशास्त्रेषु ग्रन्थान् बबन्ध । अनेन शास्त्रदीपिकाया उपरि भाट्टदिनकरी नाम व्याख्या रचिता ।

गागाभट्टः (सप्तदशशतब्दी) । विश्वेश्वरस्योपनाम गागाभट्टः । अयं दिनकरभट्टस्य पुत्रः । अस्य तत्त्वावधाने शिवाजेः सिंहासनारोहणमहोऽनुष्ठितम् । अनेन

श्लोकवार्तिकस्योपरि शिवार्कोदयो नाम टीका मीमांसासूत्रस्य चोपरि कुसुमाञ्जलिर्नाम वृत्तिः प्रणीता। मीमांसासूत्रस्य अधिकरणमेकमवलम्ब्य भाट्टचिन्तमणिर्नाम स्वतन्त्रो ग्रन्थोऽनेन रचितः। यद्यपि भाट्टमतेन मीमांसासिद्धान्ता अनेन व्याख्यातास्तथापि स्थले स्थले भाट्टसिद्धान्तमतिक्रम्य युक्त्या न्यायसिद्धान्तो गृहीत्वा प्रतिपादितः। अत्र ज्ञानप्रामाण्यं, प्रत्यक्षं, शक्तिवादः, ईश्वरवादः, सृष्टिप्रलयवादः, अनुमानमर्थापत्तिरभावः, शब्दः, विधिभेदः, धात्वर्थः, आख्यातार्थः, लकारार्थः इत्यादीनां गम्भीरा समीक्षा वर्त्तते।

कल्लूरनारायणशास्त्री (खृ॰ **१६३०** – १७३०)। अनेन मीमांसासर्वस्वनामके ग्रन्थे मीमांसासूत्रस्याधिकरणानुसारेण व्याख्या कृता। अनेन विधिविवेको विधिदर्पणञ्चेति स्वतन्त्रं ग्रन्थद्वयं प्रणीतम्।

शम्भुभट्टः (खृ॰ १६४० – १७००)। अनेन स्वगुरोः खण्डदेवस्य भाट्टदीपिकाया उपरि प्रभावली नाम टीका नव्यन्यायरीत्या रचिता।

कौण्डदेवः (सप्तदशशताब्दी)। भट्टजीदीक्षितस्य भ्रातुः रंगोजीदीक्षितस्य पुत्रोऽयं मीमांसादर्शनस्योपरि भाट्टमतप्रदीपिकां ग्रन्थं प्रणिनाय। किञ्च स वैयाकरणभूषणसारस्य तथा तर्कशास्त्रे तर्कप्रदीपिकायाः प्रणेता।

अन्नम्भट्टः (खृ॰ १७००)। अनेन तन्त्रवार्त्तिकस्योपरि सुबोधिनी नाम टीका रचिता। राणकोज्जीवनी राणकभावनाकारिकाविवरणञ्च द्वे ग्रन्थान्तरे तेन विरचिते।

रामकृष्णभट्टः (खृ॰ १७००)। अनेन शास्त्रदीपिकाया उपरि युक्तिस्नेहप्रपूरणी नाम टीका तस्याश्च गूढार्थविवरणं नाम व्याख्या प्रणीता।

भाष्करराय: (खृ॰ १७०० – १७६०)। अनेन भाट्टदीपिकाया उपरि चन्द्रोदयः संकर्षकाण्डस्य चोपरि चन्द्रिका नाम टीका रचिता।

कृष्णयज्वा (खृ॰ १७०० – १७६०)। अनेन मीमांसापरिभाषा अतीव सरलः प्रकरणग्रन्थो विरचितः।

वासुदेवदीक्षितः (खृ॰ १७०० – १७६०)। अनेन मीमांसासूत्रस्योपरि अध्वरमीमांसाकुतूहलवृत्तिर्नाम विस्तृता व्याख्या कृता। अस्या तस्य बहु स्वातन्त्र्यं परिलक्ष्यते।

रामानुजाचार्यः (खृ॰ १७५०)। अनेन प्राभाकरमतेन तन्त्ररहस्यनामको ग्रन्थो विरचितः। पार्थसारथिमिश्रस्य कृतन्यायरत्नमालाया उपरि नायकरत्नं नाम टीका लिखिता।

वाञ्छेश्वरयज्वा (खृ॰ १७६० – १८३०)। अनेन भाट्टदीपिकाया उपरि भाट्टचिन्तामणिर्णाम टीका प्रणीता।

नारायणपण्डितः (ऊनविंशशताब्दी)। नीलकण्ठस्य शिष्यो विश्वनाथसुरेः पुत्रोऽयं मीमांसाया उपरि पिष्टपशुमीमांसां नाम ग्रन्थमकरोत्। कालीकटस्य

महाराजस्याश्रयेण स मानमेयोदयस्य शेषभागं बबन्ध । एवं मीमांसाप्रणीतृभिर्बहुभिः पाण्डित्यपूर्णा बहवो ग्रन्था विरचिता विरचयिष्यन्ते, तेषां पूर्णतयालोचनमत्र न सम्भवः ।

५. **मीमांसादर्शनस्य विषयः** । पूर्वं मीमांसाशब्दस्यार्थो विचारितः । अधुना मीमांसाशास्त्रस्य विषय आलोचयिष्यते । वेदेषु यागयज्ञादिसम्बन्धे विवदमानानां वचनानां समन्वयपूर्वकं तेषामेकवाक्यतापादनमेवास्य दर्शनशास्त्रस्य उद्देश्यतया प्रतिपादितपूर्वम् । वैदिकनित्यकाम्यनैमित्तिककर्मसम्पादनाद् धर्मो भवति, कर्मणैवाभ्युदयनिःश्रेयससिद्धिः । तेन मीमांसाशास्त्रस्य विषयस्तावत् धर्म एव । तदुक्तम् –

'अथातो धर्मजिज्ञासा सूत्रमाद्यमिदं कृतम् ।

धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ॥' (श्लो॰ वा॰, पृ॰ ५) इति । 'अथातो धर्मजिज्ञासा' (मी॰ सू॰ १/१/१) इति जैमिनिप्रथमसूत्रेण स सूचितः । यद्यपि ज्ञाप्यजन्यभेदेन विषयो द्विविधस्तथापि अत्र मीमांसाशास्त्रस्य विषयस्तावत् ज्ञाप्य एव । मीमांसाशास्त्रेण धर्मो ज्ञाप्यते, नतु जन्यते । धर्मस्योत्पत्तिस्तु कर्मानुष्ठानेन भवति, न तु विचारमात्रेण । न च शास्त्रान्तरेष्वपि धर्मस्य शास्त्रान्तरविषयत्वमुक्तम् । तद् यथा – 'अथातो धर्मं व्याख्यास्यामः' (वै॰ सू॰ १/१/१, पृ॰ ५) इति कणादस्य प्रथमसूत्रेण तच्छास्त्रस्य धर्मो विषयत्वेन ज्ञायत इति चेत् ? न , 'यतोऽभ्युदयनिः-श्रेयससिद्धिः स धर्मः' (वै॰ सू॰ १/१/२, पृ॰ ११) इति सूत्रेण तत्त्वज्ञाननिः-श्रेयसयोर्जनकस्य कर्मत्वेन तत्र प्रतिपादितात् । 'स च धर्मो निवृत्तिलक्षणः' इत्युक्तमुपस्कारे, न तु यावतां धर्माणां शास्त्रान्तरेषु निरूपणं कृतम् । अपिच नैयायिका विहितयागादिक्रियासाध्यस्यापूर्वस्यैव धर्मत्वमंगीकुर्वन्ति । सांख्यास्तु मनसो वृत्तिविशेषं धर्मत्वेन कथयन्ति । बौद्धास्तु चित्तस्य शुद्धां वासनां धर्मत्वेन प्रतिपादयन्ति । आर्हतास्तु कार्यारम्भकान् सूक्ष्मान् पुद्गलान् धर्मानाहुः । वैशेषिकाश्च आत्मनो विशेषगुणं धर्ममाहुः । परन्तु तत्तन्मते दोषं प्रदर्श्य मीमांसका यागादिक्रियानां गोदोहनादिद्रव्याणां नीचैस्त्वादिगुणानां फलसाधनत्वेन धर्मत्वमाहुः । उक्तञ्च भट्टपादैः –

'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।
तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता ॥
'श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते ।
ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥' (श्लो॰ वा॰, पृ॰ ३७) इति ।

विचारशास्त्रापरपर्यायस्य मीमांसाशास्त्रस्य विषयो धर्मः । धर्मोऽयं सामान्यतः प्रसिद्धोऽपि तस्य विशेषस्वरूपं सन्दिग्धम् । सन्दिग्धे विचारार्हत्वात् मीमांसाशास्त्रं धर्मं विषयीकरोति । सोऽयं धर्मः पुरुषार्थोपायविधया सर्वेषां प्रयोजनमपि भवति । तदुक्तं

भट्टपादैः – 'जिज्ञास्यः संशयाद्धर्मः श्रेयस्करतयापि च ।' (श्लो॰ वा॰, पृ॰ ३३) इति । अतएव मीमांसाशास्त्रस्य धर्म एव प्रयोजनम् , स च मीमांसाशास्त्रस्याभिधेयः । तेन धर्मेण सह शास्त्रस्य प्रतिपाद्यप्रतिपादकभावरूपः सम्बन्धः, धर्मः प्रतिपाद्यः शास्त्रञ्च प्रतिपादकम् । अधीतस्वाध्यायस्त्रैवर्णिकश्चात्र अधिकारी । एतेन अधिकारी प्रयोजनमभिधेयः सम्बनश्चेति अनुबन्धचतुष्टयमुक्तं भवति ।

तथाच अग्निहोत्रप्रभृतियागादि कर्म मीमांसाकमते धर्मः । स च वेदस्यार्थः प्रतिपाद्यो वा । अतो धर्मशब्दस्यार्थो भवति वेदार्थः वेदवाक्यार्थः इति यावत् । मीमांसाशब्दस्यार्थो वेदवाक्यार्थविचार इत्युक्तिः संगच्छते । किञ्चात्रेदं बोद्धव्यम् – धर्मशब्दोऽत्र प्रमाणादेरुपलक्षणम् । स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वमुपलक्षणस्य लक्षणमित्यतो यथोक्तो धर्मो मीमांसादर्शने यथालोच्यते तथा प्रमाणप्रमेयादिरपि । अतएव महर्षेर्जैमिनेः प्रथमसूत्रेण मीमांसाशास्त्रस्य प्रमाणं प्रमेयमर्थवाद इत्यादयोऽपि विषय इति सूच्यते इति ।

प्रमाणप्रमेयभेदेन पदार्थजातं द्विविधम् । प्रमाणरत्नेऽस्मिन् प्रमाणमालोचितमनुषङ्गिकरूपेण शास्त्रार्थं विचारयता रघुनाथभट्टेन यागयज्ञादिकमप्युल्लिखितमित्यलमत्राधिकेन –

> अथैवं प्रतिजाने यद्रत्नं प्रमाणपूर्वकम् ।
> आंगलभाषयानूद्य समीक्षे पाठमुक्तिगम् ॥

CHAPTER – II

PRAMĀṆARATNA WITH COMMENTARY

(प्रामाण्यपरिच्छेदः)

नमो गणेशााय

(मंगलाचरणम्)

आनन्दश्रुतितात्पर्यनिर्णायककलेवरम् ।
उपास्यमेतद्विश्वेषां नीलाचलगतं महः ॥
लक्ष्मीधरकृपालेशगलिताशेषदुर्गतिः ।
प्रमाणरत्नं विद्वद्भ्यो रघुनाथः प्रयच्छति ॥

(विषयसूचना)

इह तावदल्पवित्तव्ययायाससाध्याः प्राणभृतां व्यवहाराः सम्भवन्ति । सन्देहादपि यथा तथा, तदितरे तु – विशेषतस्तु वैदिका न प्रामाण्यनिश्चयं विनेति तदर्थमिदं विचार्यते । १ ।

जगाद रत्नं किल मानपूर्वं
यदर्भकाय रघुनाथभाट्टः ।
उपाधिलाभार्थमनन्तमाच्र्य्य
करिष्यते तस्य मया प्रबन्धः ॥

प्रमाणरत्नं नाम रघुनाथस्य भाट्टमतेन प्रमाणषट्कस्योपरि रचितः प्रकरणग्रन्थः । ग्रन्थस्य पाण्डुलिपिः केवलं कलिकातास्थ-एशियाटिक्-सोसाइटिसंस्थायायाः पुस्तिकासंग्रहशालायां संरक्षितास्ति । पुस्तिकायाः प्रतिलिपिकर्त्तासीद् बंगीयः । प्रतिलिपिरसौ द्वित्रेभ्यः शतवर्षेभ्यः प्राक् सन्दर्भितेत्येतल्लिपिपरिशीलनेनानुमातुं नासाम्प्रतम् । एतद्विस्तरतोऽस्माभिरुपपादतिपूर्वमतोऽनुवादेनालम् ।

ग्रन्थकर्त्तुः रघुनाथस्य सांस्तविकं नातिविस्तृतं किमपि तथ्यं साक्षात्परम्परया वाप्युपलभ्यते । मण्डनमिश्रकृतान्मीमांसादर्शनात् केवलं ज्ञायते – आसीद् रघुनाथ-भट्टाचार्यो नाम कश्चिद्विद्वान् यो भट्टाचार्यनाम्ना वंगवास्तव्यो भवितुमर्हति । स मीमांसादर्शनस्योपरि मीमांसारत्नमिति ग्रन्थं बवन्ध यत्र प्रमाणं प्रमेयं विधिश्च विवेचितम् । अस्य प्रथमभागस्य पाण्डुलिपिर्वानारस्यां शाजाहानसम्राजः ...मकालीन-कवीन्द्राचार्यसरस्वतीनामके पुस्तकालये उपलब्धा । तस्य सम्राजः काल ईसवीयः षोडशशताब्द इति विदितम् । मन्ये य एव मीमांसारत्नस्य कर्त्तासीत् स एव प्रमाणरत्नस्यास्य प्रणेता भवेदित्यस्माकं ग्रन्थकर्त्तुः रघुनाथस्य जात्या भट्टाचार्य-ब्राह्मणत्वं संगच्छते । मंगलाचारणश्लोके कृष्णप्रणतिं पश्यन् मन्तुं नानुपपन्नं रघुनाथः

(ज्ञानस्योत्पत्तौ ज्ञप्तौ च प्रामाण्यविचारः)

किं प्रामाण्यं गुणादेवोत्पद्यते ज्ञायते च ? ज्ञानान्तरेणैव (वा) तत् स्वत एवोत्पद्यते ज्ञायते च ? स्वत एव । स्वाश्रयेणैव तत्र स्वत एवेति पक्ष उपपन्नतरः, गुणस्य तद्धेतुत्वे मानाभावात् । तस्य नियतान्वयः तर्हि किमर्थ इति चेत् ? न, विशेषणस्यासिद्धेः वैदिकप्रमायां व्यभिचारात् । तत्रापीश्वरप्रमैव गुण इति चेत् ? न, तदुभयकल्पकाभावाद् गुणानपेक्षतयैव तदुपपत्तेः । क्वचिद-न्वयस्तु प्रमाजननसामर्थ्यप्रतिबन्धकदोषापसारणार्थ इत्यवेहि । २ ।

कृष्णभक्तो बभूवेति । यद्यपि नारायणविदुषो मानमेयोदये भाट्टमतानुगं ज्ञानतत्त्वं प्रमाणप्रमेयभेदेन द्विधा विभज्यालोच्यते तथापि एतद्ग्रन्थस्य प्रमाणालोचनायां मानमेयोदयात् न्यूनातिरेको विशेषः संलक्ष्यते । तद् यथा –ज्ञानस्योत्पत्तौ ज्ञप्तौ च प्रामाण्यविचारः, ज्ञातताविचारः, केवलान्वयिनोऽनुमानस्य स्थापनं मण्डनं वा, एवमन्यदेव । एतत् सर्वमुत्तरोत्तरग्रन्थपरिशीलनेन स्पष्टीभविष्यति ।

( ) चिह्नितांशे निविष्टो विषयो बोधसौकर्याय सम्पूर्णतोऽस्माभिः परिकल्पितः । [ ] चिन्हतांशयोरन्तर्निविष्टो वर्णो वर्णसमूहो वा हस्तलिखितपुस्तिकायां विस्पष्टं पूर्णतो वा नोपलब्धः । अतः पूर्वापरग्रन्थं निरीक्ष्यास्माभिरेवोद्भावितः सुधीभिरनुमोदि-तोऽनुमंस्यते चेत्यस्माकं दृढः प्रत्ययः ।

नमो गणेशाय इत्यत्र नमस्शब्दयोगे गणेशायेति चतुर्थी । वाक्यमिदं प्रतिलिपिकर्त्तुर्नतु रघुनाथस्येति बोध्यम् ।

आनन्दम् आनन्दमयं ब्रह्म परमात्मा तत्प्रतिपादिका श्रुतिः आनन्दश्रुतिः । तद्यथा 'आनन्दभुक् चेतोमुखः' (माण्डू. ५), 'आनन्द आत्मा ब्रह्म पुच्छम्' (तै॰ २/५), 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' (तै॰ ३/७) इत्यादिः । तस्याः श्रुतेस्तात्पर्यस्य निर्णायकं निश्चायकं तदेव कलेवरो देहो यस्य तत् महः तेज इति परेणान्वयः । नीलाचलं गतं प्राप्तं कृष्णनिष्ठमिति यावत् । विश्वेषां विश्वैः उपास्यमुपासनीयम्, विश्वेषामित्यत्र 'कृत्यानां कर्त्तरि वा' (पा.२/३/७१) इत्यनेन पाक्षिकी षष्ठी । लक्ष्मीधरस्य तन्नाम्नः कस्यचिद्राज्ञः कृपालेशात् दयालवात् गलिता अशेषा सर्वा दुर्गतिर्दुर्दशा यस्य स रघुनाथः विद्वद्भ्यः ज्ञानिभ्यः प्रमाणरत्नं नाम ग्रन्थं प्रयच्छति अर्पयति । तथाच विदुष उद्दिश्य ग्रन्थोऽयं प्रणीतः । अर्थात् भाट्टमतानुसारेण प्रमाणषट्कमवलम्ब्य ग्रन्थोऽयं प्रणीतो भविष्यति । अतः षट् प्रमाणानि प्रतिपाद्यविषयः, ग्रन्थश्च प्रतिपादकः । ग्रन्थविषययोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, प्रमाणजिज्ञासवो विद्वांसोऽधिकारिणः प्रमाणज्ञानं च प्रयोजनम् । 'निरास्यमीशं श्रुतिलोकसिद्धं श्रुतेः स्वतो मात्वमुदाहरिष्यन्' (श॰ दि॰ ७/८९) इत्यादि कुमारिलवचनं संलक्ष्य ज्ञायते भाट्टा अपि ईश्वरमभ्युपयन्ति । अतो भाट्टमतेन ग्रन्थं प्रणेतुकामस्य रघुनाथस्येश्वरपरामर्शो न दोषाय ।

तत् किं दोषाभावो हेतुः ? नैवम्, प्रतिबन्धकाभावान्तरतुल्यः सः ? तत् किमन्यत्रापि प्रतिबन्धकाभावो न हेतुरिति चेत् ? सत्यम्, सति प्रतिबन्धके कार्यानुत्पाद[ोऽ]स्तु कारणीभूतवह्न्यादेरभावात् । कारणता हि शक्तिस्तदवच्छेदिका वा । सा च फलैकोन्नेया, प्रतिबन्धकाद्वा फलदर्शनेन तदितरत्रैव व्यवतिष्ठते । तर्हि फलानुपहितं कारणं न स्यादिति चेत् ? नेदमनिष्टं नित्यकाम्यकर्मविवेके न्यायरत्नमालायामिदं स्पष्टमेवोक्तम् । ३ ।

कारणशब्दो ह्ययं यौगिकोऽन्योत्पादं निमित्तीकृत्य वर्त्तमानो नान्यत्र वर्त्तते । न ह्युत्सृष्टस्रजं कोऽपि स्रग्विनमाचष्टे । कथं तर्हि फलानुपधानदशायां दण्डादौ घटार्थी प्रवर्त्तत इति चेत् ? तत् सन्देहादेव । ४ ।

प्रामाण्यं नाम प्रमात्वम्, तच्च ज्ञानस्यार्थपरिच्छेदसामर्थ्यम् । सांख्यमते प्रमात्वमप्रमात्वञ्च स्वतोग्राह्यम्, बौद्धमतेऽप्रमात्वं स्वतोग्राह्यं प्रमात्वञ्च परतोग्राह्यम्, नैयायिकमते प्रमात्वाप्रमात्वयोरुभयोरपि परतोग्राह्यताभ्युपेता । कौमारिलमते प्रमात्वं स्वतोग्राह्यम् अप्रमात्वञ्च परतोग्राह्यम् । प्राभाकरमते तु ज्ञानस्य भ्रान्ततानंगीकारात् प्रमात्वं स्वत एव गृह्यते । प्रामाण्यस्य ग्राह्यता उत्पत्तिज्ञप्तिभेदेन द्विविधा । यतः कारणकूटात् ज्ञानमुत्पद्यते तमतिरिच्य अन्यस्मात् कस्माच्चित् प्रामाण्यं न जायते इत्यतोऽस्ति प्रामाण्योत्पत्तौ न परापेक्षता । एवमेव ज्ञानस्य ज्ञप्तौ प्रामाण्यं स्वत एव गृह्यते । ज्ञानस्य प्रामाण्यं यदि प्रमाणान्तरमपेक्षते तर्हि कस्यचिन्मनुष्यस्य कदापि ज्ञानं न निश्चयात्मकं भवेत् । नैयायिकैस्तूच्यते ज्ञानप्रामाण्यं परत एव गृह्यते ज्ञानप्रामाण्यस्य संशयित्वात् । तथाहि – कस्यचित् ज्ञातुः किञ्चिद्दूरे जलज्ञानं जातम् । तस्मिन् जलज्ञाने जाते तस्य ज्ञानस्य प्रामाण्यं यदि स्वतोग्राह्यं स्यात् तर्हि यया सामग्र्या ज्ञानं गृह्यते तयैव सामग्र्या ज्ञानप्रामाण्यमपि निश्चीयते । तथा सति इदं जलत्वेन जानामीत्यनुव्यवसायेन जलज्ञानस्य ग्रहात् तत्प्रामाण्यमपि गृहीतं स्यात् । एवं सति पश्चात् इदं जलज्ञानं प्रमा न वेति प्रामाण्यसंशयो नोपपद्यते । परन्तु भवति प्रामाण्यसंशयः । तथाच ज्ञानस्य प्रामाण्यं स्वतः परतो वेत्यत्रैवंविधा विप्रतिपत्तिर्दृश्यते – ज्ञानप्रामाण्यं स्वाश्रयजनकसामग्रीजन्यं न वेति । इयं विप्रतिपत्तिः प्रामाण्यस्योत्पत्तौ । ज्ञप्तौ तु ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीजन्यं न वेति । अत्र मीमांसकैरुच्यते – प्रामाण्यं नाम यथायथभावेन विषयप्रकाशकत्वम् । यदि च प्रामाण्यं परतो गृह्यते तर्हि (१) प्रामाण्यस्योत्पत्तौ को बहिःस्थो हेतुर्भवेत् ? (२) कार्यसम्पत्तौ यथार्थज्ञानादन्यस्य कस्य वस्तुनः साहाय्यमपेक्षेत ? (३) केन प्रमाणेन ज्ञानप्रामाण्यं निश्चीयेत ? इति शंकात्रयमापतेत् । परन्तु सर्वप्रमाणानां प्रामाण्यं स्वत एव गृह्यते । तथाच ज्ञानस्योत्पादिका ज्ञापिका च या शक्तिः तयैव ज्ञानस्य प्रामाण्यमुत्पद्यते ज्ञायते च । या हि शक्तिर्न विद्यतेऽन्येन तस्याः सत्ता नोत्पद्येत । तदुक्तम् – 'स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् । न हि स्वतोऽसती शक्तिः कर्त्तुमन्येन शक्यते ॥' (श्लो॰ वा॰, पृ॰ ४५) । अतो यस्मात् कारणात् घटोऽयमिति ज्ञानं भवति तस्मादेव कारणात् ज्ञानस्य प्रामाण्यमपि निश्चीयते, नतु कारणान्तरस्यापेक्षास्ति ।

(शक्तिविचारः)

शक्तावेवं किं मानमिति चेत् ? कारणाकारानुगतमतिरेव । न हीयमत्यन्तानुगतेनानन्यथासिद्धनियतपूर्ववर्त्तितारव्येनोपाधिनात्माश्रयादिबहुतरदोषग्रस्तेन शक्योपपादा । अपिच नियमप्रागभावयोः कारणताघटकयोर्ज्ञानं प्रवृत्तित्वावच्छिन्नं प्रति व्यभिचारान्न कारणमिति प्रवृत्तावनन्तवैजात्यं कल्प्यम् । तदपेक्षया तावत्सु ज्ञानेष्वेकशक्तिकल्पनमेव ज्यायः । अतएव स्वरूपसम्बन्धविशेष एव तत्त्वमित्यशुद्धम्, दण्डादेः स्वरूपस्य निःसम्बन्धिनः ससम्बन्धिकारणताव्यवहारकारकत्वासम्भवादन्यथा अभावोऽप्यधिकरणस्वरूपेणैव दत्तजलाञ्जलिः स्यात् । सत्यां च शक्तौ अदृष्टं न गुणान्तरं न वा भावनारव्यः संस्कारः स्वीकार्य इत्यपि श्रेयः । विहितकर्माहिता शक्तिः शुभादृष्टं निषिद्धकर्माहिता तु दुरदृष्टम्, अनुभवाहितानुभावनेत्यंङ्गीकृतेः । यथाहु : –

'कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
योग्यता शास्त्रगम्या या सा परापूर्वमिष्यते ॥'
'लौकिकञ्चापि यत् कर्म फलाय चिरभाविने ।
तत्रापि शक्तिरस्त्येव न त्वपूर्वगिरोच्यते ॥' (तं॰ वा॰, २/१/४,

पृ॰ ३६७) । कर्मणो योग्यता उत्पत्तिः परमापूर्वजननसामर्थ्यम् । पुरुषस्य तु फलसामर्थ्यं परमापूर्वारव्यम् । ५ ।

प्रामाण्यस्योत्पत्तावपि ज्ञानोत्पादकसामग्र्यतिरिक्तस्य कस्यापि नास्त्यपेक्षा । 'यदि हि सर्वमेव ज्ञानं स्वविषयतथात्वावधारणे स्वयमसमर्थं विज्ञानान्तरमपेक्षेत ततः कारणगुणसंवादार्थक्रियाज्ञानान्यपि स्वविषयभूतगुणाद्यवधारणेऽपरमपेक्षेरन्, अपरमपि तथेति न कश्चिदर्थो जन्मसहस्रेणाप्यध्यवसीयेतेति प्रामाण्यमेवोत्सीदेत् ।' (शा॰ दी॰, पृ॰ ५८-५९) ।

अप्रामाण्यन्तु परतो गृह्यते । यतो ज्ञानरूपे एकस्मिन् पदार्थे प्रामाण्यमप्रामाण्यमित्येतज्जन्यो विपरीतो धर्मः स्वतः (= स्वाभाविकः) भवितुं न शक्यते । बौद्धास्तु – 'अप्रामाण्यमवस्तुत्वान्न स्यात् कारणदोषतः । वस्तुत्वात्तु गुणैस्तेषां प्रामाण्यमुपजन्यते ॥' (श्लो॰ वा॰, पृ॰ ४३) इति । मीमांसकास्तन्नाद्रियन्ते । तेषामित्थं वचोयुक्तिः – प्रामाण्यं नाम ज्ञानस्य स्वाभाविकी शक्तिः अप्रामाण्यन्तु औपयिकी (=सामयिकी) शक्तिरिति । ज्ञानं द्विविधम् – यथार्थमयथार्थञ्च । ज्ञानस्य याथार्थ्यं स्वाविकम् । अयाथार्थ्यम् (= अप्रामाण्य) तु कारणदोषैरापद्यते । यथा चक्षुरादीनां कामलादिदोषात् श्वेतशंखादिषु पीतबोधो भवति, इन्द्रियादीनां स्वाभाविकत्वे यथार्थभूतश्वैत्यावधारणं भवति । मिथ्यात्वाज्ञानसंशयैः अप्रामाण्यं त्रिविधम् ।सर्वविधमेवाप्रामाण्यं दोषनिमित्तमिति मीमांसकाः ।

अथैवमप्रामाण्यमपि स्वत एव स्यात् , तस्य दोषान्वयस्तु भ्रमजननसामर्थ्यप्रतिबन्धकगुणोत्सारणार्थ इति चेत् ? न , वेदस्याप्रामाण्यापत्तेः । न चेष्टापत्तिः, तज्जन्यज्ञानस्य प्रमाणान्तरेणाशक्यबाधत्वादागमस्य वलवत्त्वात् । न च यागादिर्न स्वर्गसाधनमिति कस्यापि धीरस्ति । तस्मात् प्रामाण्ये निर्णीति[ऽ]व्याहतं स्वतः प्रामाण्यमिति । ६ ।

ज्ञायते च प्रामाण्यं स्वतस्तेनैव ज्ञानेन । तथाहि – प्रामाण्यं नाम ज्ञाने यदधीनः प्रमाव्यवहारः तच्चार्थतथात्वम् । तदुक्तमिदमेव ज्ञानस्य प्रामाण्यं यदर्थस्य तथाभूतत्वं नाम । तच्च घटोऽयमिति ज्ञाने स्वयमेव परिच्छिद्यते, न स्वकारणगुणज्ञानप्रवृत्तिसंवादिना । शुक्तिकायां रजतत्वाभाववत्त्वं तु नेदं रजतमिति ज्ञानेनैव बोध्यते । अपितु कारणदोषज्ञानेन नेदं रजतमिति ज्ञानान्तरेण वेत्यप्रामाण्यं परतो निर्णीयत इत्युच्यते । ७ ।

तदुक्तम् – 'तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता । अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥' (श्लो॰ वा॰, पृ॰ ४६) इति । दुष्टकारणजन्येन ज्ञानेनात्मनः प्रामाण्यं विषयस्यातथाभूतस्यापि तथात्वमवगतमप्यर्थान्यथात्वज्ञानेन दोषज्ञानेन वा नैवमयं विषय इत्यपोद्यते ।

मीमांसकमतेन लौकिकशब्देऽनाप्तपुरुषप्रणीतत्वरूपदोषसत्त्वेऽपि अपौरुषेयवेदेऽनाप्तपुरुषप्रणीतत्वं नापद्यते । अतः साक्षात् विषयान्यथात्वज्ञानाभावात् वेदस्य स्वतः प्रामाण्यमनपोदितं तिष्ठति । पुरुषोच्चारितं वचस्तु पुरुषबुद्धिप्रभवविधया भ्रमप्रमादविप्रलिप्सादिदोषनिमित्तेन अप्रामाण्यं भवितुमुत्सहते । तावत्सु अयथार्थज्ञानेषु गुणाभावो दोषश्चेत्युभयमपि दृश्यते, वेदे तु गुणाभावे सत्यपि येन वेदस्य प्रामाण्यं न बाध्येतेत्यतो दोषनिमित्तम् अप्रामाण्यम् । अतोऽप्रामाण्यमुक्तं परत इति सिद्धम् । शुक्तिरजतादिज्ञाने तिमिरादिदोष एव कारणमित्यनुभवसिद्धम् । किञ्च यदि गुणाभावोऽप्रामाण्यहेतुरुच्यते तदा प्रामाण्यस्य हेतुतया गुण एव स्वीकर्त्तव्यः । तथा सति प्रामाण्यमपि परतो ग्राह्यं स्यात्, एतच्च न मीमांसकानामिष्टम् ।

नैयायिका ज्ञानस्योत्पत्तौ ज्ञप्तौ च परतः प्रामाण्यवादिनः । ते ज्ञप्तौ ज्ञानस्य परतः अनुमानादिना प्रामाण्यमातिष्ठन्ते । यथाहि दूरतो जलं दृष्ट्वा पिपासोः पुरुषस्य इदं जलमिति ज्ञानं जातं ततः तद्देशं गत्वा स पुरुषो यदि जलं प्राप्य तेन पिपासां निवर्त्तयेत् , तदनन्तरं तस्यैवमनुमानं भवति इदं जलज्ञानं प्रमा सफलप्रवृत्तिजनकत्वादिति । सफलप्रवृत्तिजनकत्वहेतुकानुमित्या तस्य जलज्ञानस्य प्रमात्वं निश्चीयते । अतो ज्ञानस्य ग्राहकसामग्र्यतिरिक्तसामग्रीग्राह्यत्वेन ज्ञप्तौ प्रमायाः परतस्त्वं सिध्यति । ज्ञानस्य ग्राहकसामग्री त्वनुव्यवसायादिकम् । न तेन ज्ञानस्य प्रमात्वं गृह्यते, किन्तु तदतिरिक्तसफलप्रवृत्त्याद्यनुमानेन प्रमात्वं गृह्यत इति ज्ञप्तौ प्रमात्वस्य परतस्त्वं

नन्वेवं घटादिकमेव प्रमा स्यादिति चेत् ? न, यथा कालादिर्घटत्ववानपि न घटसम्बन्धविशेषाभावात् तथा घटादिर्घटत्ववानपि न प्रमासम्बन्धविशेषाभावात् । यस्यानुभवस्य विशेष्ये प्रकारवत्ता सैव प्रमा । एतच्च प्रामाण्यं प्रवृत्त्यौपयिकमतोऽस्यानुवादसाधारण्यं न दोषाय । ज्ञाननिष्ठतया प्रामाण्यनिश्चयो न प्रवृत्त्यौपयिको भिन्नविशेष्यकत्वात् । अतस्तस्य परतो ज्ञेयत्वेऽपि न क्षतिः, प्रवृत्त्यौपयिकत्वेन सप्रयोजनस्यैवेह विचार्यत्वात् । ज्ञाने प्रामाण्यसंशये विषये संशयः स्यादिति तन्निराकरणार्थं सोऽप्यपेक्षणीय इति चेत् ? न, प्रामाण्यज्ञानप्रामाण्ये संशयाधीनसंशयस्य तेनाप्यनुच्छेद्यात् । तस्माद् यन्निश्चयात् प्रवृत्तिस्तदेव निर्णेयम् । तच्चार्थतथात्वमेव । तस्य च स्वाश्रयदुष्टकारणजत्वादिशंक्या शंकायां कारणदोषो निरसनीयः । ८ ।

न्यायसम्मतम् । मीमांसकास्तु तन्न स्वीकुर्वन्तीति प्रतिपादयितुमस्माकं ग्रन्थकार आचष्टे **ज्ञायते** चेत्यादि । प्रवृत्तिसंवादिना = सफलप्रवृत्तिजनकत्वेन ।

प्रामाण्यकथनप्रसंगेन रघुनाथः कथञ्चिच्छक्तिविचारमकरोत् । मीमांसकाः शक्तेरतिरिक्तपदार्थत्वं स्वीकुर्वन्ति नैयायिकास्तन्निराकुर्वन्ति इति न्यायमीमांसकयोः शक्तौ विप्रतिपत्तिमुत्थापयति **शक्तावेव किमिति** ग्रन्थेन । अस्माभिर्**न्यायमीमांसाया**मियं विप्रतिपत्तिर्व्याख्याता । तत्र मीमांसां पूर्वपक्षयित्वा न्यायमतं स्थापितम् । अतस्तदनुवादेन किम् । भाट्टमते शक्तिर्गुणः , सा च द्रव्यगुणकर्मवृत्तिः । अर्थापत्त्या श्रुत्या च शक्तिर्गम्यते । लौकिकवैदिकभेदेन नित्यानित्यभेदेन वा तस्या द्वैविध्यं स्वीकृतम् । सहजाधेयभेदेन पुनः सा द्विधा विभज्यते । गागाभट्टमते तु सहजा आधेया पदनिष्ठा चेति भेदेन शक्तिस्त्रिधा । तृणारणिमणिषु सहजा व्रीह्यादिषु आधेया गवादिपदेषु च शक्तिर्वर्त्तते । अधिकमस्माकं **न्यायमीमांसायां** वंगभाषया च लिखितायां **मीमांसासमीक्षायां** द्रष्टव्यम् ।

कर्मभ्यः प्रागयोग्यस्येत्यादि । कर्मभ्यः प्राक् लौकिकदृष्ट्या इत्याध्याहार्य्य अयोग्यस्यार्थः कारिकायामत्र संगमयितुं शक्यते । आशुविनाशिकर्मणां कालान्तरभाविफलसाधनतोपपत्त्यर्थमन्तरा पुण्यपापात्मकमपूर्वं कल्प्यते । यच्चापूर्वं स्वर्गादिफलाय कल्पते तत् फलापूर्वमुच्यते । तच्च परमापूर्वं परापूर्वमिति च कथ्यते । अधिकं ग्रन्थेऽस्मिन् वक्ष्यते ।

लौकिकञ्चापि इत्यादिश्लोक आदर्शपुस्तके एवमुपलभ्यते –'लौकिकञ्चापि यत्कर्म फले कालान्तरोद्गतौ । तत्रापि शक्तिरेवास्ते न त्वपूर्वमिहेष्यते ॥' पाठान्तरञ्च 'न त्वपूर्वगिरोच्यते ॥' इति । 'रजतत्वाभाववत्त्वमि'त्यादौ 'नेदं रजतमिति भ्रमेणैव बोध्यते' इति पाण्डुलिपिस्थः पाठो न संगत इति संशोध्य **भ्रमेणैव** इत्यत्र '**ज्ञानेनैव**' इति पाठः प्रदत्तः । ७।

यथा काले दिशि चैवमन्यत्र कालिकेन दैशिकेन च सम्बन्धेन घटत्वं विद्यते इत्यतः कालदिगादिर्घटत्ववानपि घटत्वसम्बन्धविशेषाभावत् न घटो भवितुमर्हतीत्येवं यद्यपि घटे घटत्वं वर्त्तते इत्यतो घटत्ववानपि घटः प्रमासम्बन्धविशेषाभावात् प्रमा भवितुं न शक्यते ।

(ज्ञाततविचारः)

बाधितविषयत्वशंकाधीनायां तस्याम् इदं ज्ञानं घटविशेष्यकं घटविशेष्यकज्ञातताजनकत्वात् इत्यादिना यज्ज्ञानविशेष्यकमवधारणं तत् परत एव । तदाहुराचार्याः –

'ननु प्रमाणमित्येवं प्रत्यक्षादि न गृह्यते ।
न चेत्थमगृहीतेन व्यवहारोऽवकल्पते ॥' (श्लो॰ वा॰, पृ॰ ५३)

इति पूर्वपक्षयित्वा

'प्रमाणं ग्रहणात् पूर्वं स्वरूपेणैव संस्थितम् ।
निरपेक्षं स्वकार्येषु गृह्यते प्रत्ययान्तरैः ॥
तेनास्य ज्ञायमानत्वं प्रामाण्ये नोपयुज्यते ।
विषयानुभवो ह्यत्र पूर्वस्मादेव लभ्यते ॥'
(श्लो॰ वा॰, पृ॰ ५३) इति ।९।

यस्यानुभवस्येत्यादि । उद्देश्यविधेयभावेन प्रतिवाक्यं द्विधा विभक्तम् । उद्देश्यभागं विशेष्यं विधेयभागञ्च प्रकारमाह । विशेष्ये विशेष्यता प्रकारे च प्रकारता वर्त्तते । यथा मरीचिकायां ह्रदे वा इदं जलमित्यनुभवो भवति । अत्र इदमंशो विशेष्यम्, जलांशश्च प्रकारः । जलत्वनिष्ठप्रकारतानिरूपितमरीचिकानिष्ठविशेष्यताशाली अनुभवो यदि भवति तदा विशेष्ये (इदमंशे) प्रकारवत्ताया अविद्यमानत्वादनुभवोऽयं न प्रमा । यदा तु जलत्वनिष्ठप्रकारतानिरूपितह्रदनिष्ठविशेष्यताशाली अनुभवो भवति तदा विशेष्ये प्रकारवत्तायाः सत्त्वात् एतादृशोऽनुभवः प्रमा भवति । सर्वं हि ज्ञानं धर्मिणि (= विशेष्ये) अभ्रान्तं प्रकारे तु विपर्ययः इत्यभ्युपगम्यते ।

नन्वेवं समवायोऽपीत्यादि । अवयवावयविनोर्गुणगुणवतोर्जातिजातिमतोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च परस्परं समवायाख्यं यं सम्बन्धं नैयायिकाः प्राभाकराश्च स्वीकुर्वन्ति भाट्टास्तु तमेव सम्बन्धं तादात्म्यनाम्ना व्यवदिशन्ति । नैयायिकमते समवायस्यैकत्वे वायौ स्पर्शसमवायाद्रूपं समवैति, तत्तु ते समादधते वायौ रूपव्यञ्जकाभावाद्रूपानुत्पत्तेः रूपसमवायाभावात् न वायू रूपवानिति प्रसंगः, नापि तद्बुद्धेः प्रमात्वं प्रसज्यते । भाट्टो रघुनाथोऽत्र एवमेव रूपादिना साकमधिकरणताख्यं सम्बन्धं स्वीकृत्य तेनैवान्यथासिद्धिरिति भङ्ग्यन्तरेणाचष्टे । परामर्शोऽयं ज्ञाततविचारप्रसंगे कृतः ।११।

ज्ञातता । इतः पूर्वालोचनात्स्पष्टं यत् न्यायमते वस्तुस्थितिरियमेव कश्चित् कदाचित् जलादिज्ञानानन्तरं तत्प्रामाण्यं निश्चित्य जलमादातुं हातुं वा प्रवर्त्तते, कदाचिच्च जलादिज्ञाने प्रामाण्यस्य सन्देहदशायां तद्ग्रहणादौ प्रवर्त्तते, ततो जलादिप्राप्त्यप्राप्त्योरनन्तरं प्रामाण्यमप्रामाण्यं वा निश्चिनोतीति । मीमांसकास्तु सन्तिष्ठन्ते प्रामाण्यस्य स्वतस्त्वात् प्रवृत्तेः प्राक् प्रामाण्यमवधार्य्य पुरुषः प्रवर्त्तत इति । तेषामित्थमाशयः अनधिगते धर्मिणि सन्देहानुदयात् प्रामाण्यसन्देहो न सम्भवतीत्यतो ज्ञानं प्रवृत्तेः पूर्वमेव गृहीतम् । किञ्च ययैव ज्ञानग्राहकसामग्र्या यज्ज्ञानं गृह्यते तयैव तद्गतं

ननु ज्ञातता यदि ज्ञानकर्मता तदा शक्त्यात्मिकायास्तस्या ज्ञानोपायः कथ्यताम् । अथ ज्ञानेनाहितो विषयताविशेषः सा, वाच्यं तर्हि विषयतायां किं मानमिति चेत् ? ज्ञातो घट इति प्रत्यक्षमेव तत्र मानम् । न च ज्ञानस्वरूपमेवास्य विषय इति वाच्यम्, घटज्ञानविषयो घट इति ज्ञानवाचकातिरिक्तेन विषयपदेन तदर्थविवरणात् । अपि च घटस्य ज्ञानविषयता न ज्ञानमात्रं, पटमात्रज्ञानस्यापि तथात्वापत्तेः, किन्तु ज्ञानविशेषः । स च विशेषो दुर्निरूपः । यदि च घटो [ज्ञानांशे मा सज्यतां] तदातीतानागतयोर्विषयता न स्यात् । अपि च ज्ञानेच्छाप्रयत्नसंस्काराणां विषयेण सह सम्बन्धो लाघवादेक एवोचितः । १० ।

नन्वेवं समवायोऽपि स्यादिति चेत् ? स्यादेव यदि तन्मात्रेण निर्वाहः स्यात्, न तु तथा, वायोः स्पर्शसमवायवतो रूपत्वापत्तेः । अतो रूपादिभिः सहाधिकरणताख्योऽपरः सम्बन्धः स्वीकार्यः, ततश्च तेनैवान्यथासिद्धिः । ११ ।

किञ्च घटोऽयमिति ज्ञानोत्तरं ज्ञातोऽयं घट इति चक्षुषैव ज्ञायते । न च ज्ञानस्य चाक्षुषत्वं सम्भवतीति व्यतिरिक्तैव सा । उपनीतं स्वायोग्यमपि चाक्षषमिति चेत्, किं तस्योपनायकम् ? न तावत् स्वप्रकाशमर्यादया स्वयमेव, स्वस्य विषयत्वे प्रत्यक्षविषयतानियामकयोर्विषयतदिन्द्रियसन्निकर्षयोरभावे जन्मानुपपत्तेः । नापि मनः, ज्ञानस्य प्रत्यक्षत्वे ज्ञानात्मनात्मनोऽतीन्द्रियत्व-

---

प्रामाण्यमपि, न तु ज्ञानग्राहकादन्यज्ज्ञानधर्मस्य प्रामाण्यस्य ग्राहकम् । तेन ज्ञानग्राहकसामग्र्यतिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्येति । गुरुमते ज्ञानं स्वप्रकाशम्, अतो नास्ति ज्ञानस्य जन्मक्षणेऽज्ञातसत्ता । ज्ञानस्य स्वप्रकाशत्वात् ज्ञानोत्पादकसामग्र्या ज्ञानग्राहकसामग्र्या नास्ति भेदः । स्वयं स्वस्य विषयीकरणात् ज्ञानं ज्ञानगतप्रमात्वस्याश्रयीभूतेन ज्ञानेन गृह्यते । अतो घटज्ञानस्य सामग्रीसन्निधाने सति घटमहं जनामीत्यत्र घटो घटज्ञानं घटज्ञाता चेति त्रितयस्य ज्ञानं भवति । सर्वेषु ज्ञानेषु ज्ञेयं (विषयः), ज्ञानं (ज्ञानस्वरूपम्) ज्ञाता (आत्मा) चेत्येतत्त्रितयं विद्यते, एतच्च त्रिपुटीत्युच्यते । एवं ते घटमहं स्मरामीत्यनुव्यवसायात्मकं ज्ञानमभ्युपयन्ति, न त्वयं घट इति । त्रिपुटज्ञानकाले विषयज्ञानगतं प्रामाण्यमपि भासते । अतः प्रमात्वस्याश्रयीभूतज्ञानं स्वप्रकाशमहिम्ना स्ववृत्तिप्रामाण्यमपि गृह्णाति । मुरारिमिश्रमते तु ज्ञानं ज्ञानस्य प्रामाण्यञ्चानुव्यवसायेन गृह्यते । न्यायमतेऽनुव्यवसायेन ज्ञानमेव गृह्यते, न तु ज्ञानस्य प्रामाण्यमपि अनुव्यवसायग्राह्यम् । इन्द्रियसन्निकर्षात् परं घट इत्याकारो व्यवसायात्मकं ज्ञानं जायते । ततश्च घटमहं जानामीति लौकिकं मानसप्रत्यक्षं जायते । तच्च मानसप्रत्यक्षं ज्ञानमनुव्यवसायमाह । भाट्टमीमांसकमते तु ज्ञानमतीन्द्रियं नित्यानुमेयञ्च । तेन कश्चिद्धर्मो ज्ञानेन उत्पद्यते, स च धर्मो ज्ञाततेत्यभिधीयते । ज्ञातो घटो ज्ञातो पट इत्यादिप्रतीतिसाक्षिकः पदार्थविशेषो ज्ञातता प्राकट्यञ्चेति व्यपदिश्यते। ज्ञानेन घटे किञ्चज्जनितं येन घट एव तस्य ज्ञानस्य

प्रतिपादकैर्यत्र ज्ञानमतीन्द्रियमित्यादिभिर्विरोधोपपत्तेः, युक्तिविरोधाच्च ज्ञानमात्रस्य योग्यत्वे सुखज्ञानानन्तरमिच्छा न स्यात्। स्यात्तु ज्ञानप्रत्यक्षपरम्परैव। मनउद्भूतं ज्ञानमेव योग्यमिति वा अन्यदेव किञ्चिद्वा कल्प्यं, तदुभयमपि गुरुज्ञाने प्रत्यक्षत्वयोग्यताकल्पनोत्तरकालीनकल्पनयान्योन्याश्रयग्रस्तञ्च। न च ज्ञाततायामप्यात्मज्ञानजन्यायां ज्ञाततातज्ज्ञानधाराप्रसंगो दुर्वार इति वाच्यम् ।१२।

विषयो नान्य इत्यतो विषयत्वान्यथानुपपत्तिप्रसूतयार्थापत्त्यैव ज्ञातता सिध्यति, न तु प्रत्यक्षप्रमाणमात्रेण। ज्ञाततया ज्ञानस्यानुमितिर्भवति। ज्ञाततेयं मानसप्रत्यक्षस्य विषयोऽपि अर्थापत्तिप्रमाणेन सिध्यति। ज्ञाततालिंगकज्ञानविषयकानुमितिर्ज्ञानस्य ज्ञानप्रामाण्यस्य च ग्राहिका भवति। अहं घटविषयकज्ञानाख्यव्यापारवान् घटविषयकज्ञाततावत्त्वादित्यनुमानं घटत्वप्रकारकघटं ज्ञाने विषयीकृत्य उदेति। तेन च ज्ञानप्रामाण्यस्य स्वतोग्राह्यता सिध्यति ।१२।

ज्ञानाख्यसन्निकर्षशब्देन नैयायिकाभिमतो ज्ञानलक्षणो नामालौकिकसन्निकर्षोऽत्रोच्यते। एतत्प्रासंगिका आलोचनाग्रे प्रत्यक्षपरिच्छेदे करिष्यते ।१५।

परामर्शान्वयेत्यादि। हस्तलिखितायां पुस्तिकायां 'परामर्ष'शब्दः उपलभ्यते। पारिभाषिकः परामर्शशब्दस्तु साधुरिति विविच्य मूर्धन्यषकारस्थाने तालव्यशकारो विन्यस्तः।

व्याप्तिप्रकारकपक्षधर्मताशालिज्ञानजन्यज्ञानमनुमितिरिति नव्या **नैयायिकाः**। तन्मते व्याप्तिज्ञानमनुमितौ करणं परामर्शस्तु व्यापारः। प्राचीनमते तु परामर्श एवानुमितौ करणं व्याप्तिज्ञानञ्च कारणमात्रम्। अयं परामर्शो लिंगपरामर्शगिरोच्यते। अनुमितिविषयीभूतस्य साध्यस्याधारतानियामकः परामर्शः, अनुमितेर्विशेष्यतानियामकश्च। परामर्शस्तु व्याप्तिविशिष्टस्य पक्षे वैशिष्ट्यावगाहि ज्ञानम्। स च क्वचित् पक्षविशेष्यको भवति, क्वचित् पक्षप्रकारकः इति द्विविधः। एवञ्च साध्यव्याप्यहेतुमान् पक्षः इति पक्षविशेष्यकः परामर्शः। सध्यव्याप्यहेतुः पक्षे इति पक्षप्रकारकः परामर्शः। पक्षविशेष्यकात् परामर्शात् पक्षः साध्यवान् इत्यनुमितिर्जायते। पक्षप्रकारकाच्च परामर्शात् पक्षे साध्यमित्यनुमितिर्भवतीति प्राचीनमतम्। नव्यमते द्विविधात् परामर्शात् पक्षः साध्यवान् इत्यनुमितिरेव स्यात्। मीमांसकास्तु अनुमितिं प्रति विशिष्टवैशिष्ट्यावगाहिज्ञानात्मकस्य परामर्शस्य कारणत्वं नाभ्युपगच्छन्ति। ते एवं ब्रुवते यत्र धूमो वह्निव्याप्यः इति व्याप्तिस्मरणं, पर्वतो धूमवान् इति धूमप्रत्यक्षं जातं तत्र वह्निव्याप्यधूमवान् पर्वतः इति विशिष्टज्ञानं नैव सम्भूतम्। एतादृशस्थले उक्तविधद्विविधस्मरणप्रत्यक्षज्ञानात् पर्वतो वह्निमान् इत्यनुमितेरुत्पत्तेः परामर्शस्तु अनुमितौ कारणं भवितुं नार्हति। अपिच व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यैवानुमितेः कारणत्वं वाच्यम्, न तु परामर्शस्येति मीमांसका आक्षिपन्ति। एतदुपरि नैयायिका एवं ब्रुवन्ति व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यानुमितिकारणत्वे साध्यव्याप्यवान् पर्वतः इति ज्ञानात् अनुमितेरनुपपत्तिः। यतो

ज्ञाततायामस्याम् आत्मनोऽभेदात् आत्मप्रत्यक्षे च प्रत्यक्षविशेषगुणस्यापेक्षायां तद्विलम्बेनापि धारोच्छेदः सम्[भवेत्।] अपिच ज्ञानस्य प्रत्यक्षत्वाभ्युपगमे तेनैव प्रत्यक्षीभूतयावद्विषयान्यथासिद्ध्या यावद्बाह्यापलापप्रसंगः । नहि प्रत्यक्षपरोक्षत्वाख्यविरुद्धधर्माध्यासं विना तयोर्भेदे मानमस्तीति दिक् । १३।

अपिच मनः शुद्धमेव ज्ञानं प्रत्यक्षयति, विषयविशिष्टं वा ? नाद्योऽपसिद्धान्तादननुभवाच्च । नान्त्यः, मनसो बहिःसन्निकर्षाभावेन तद्विशिष्टभासनानुपपत्तेः । ननु विशेषणसन्निकर्षो न हेतुः । सति विशेषणज्ञाने विशेष्यसन्निकर्षे च तद्विलम्बेन कार्यविलम्बाभावात् । न चैवं लौकिकप्रत्यक्षसामग्र्या अनुमेयवह्न्यादावपि सत्त्वेनानुमित्युच्छेदः, विशेषणसन्निकर्षस्याहेतुत्वेऽपि प्रतिबन्धकतावच्छेदककोटौ निक्षेपेण लौकिकसन्निकर्षकालीनायाः प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात् वह्नित्वांशे वह्निविशेष्यकतया तत्र सन्निकर्षापेक्षणाच्चेति चेत् ? न, इहापि विषयतावच्छेदकांशे विषयस्य विशेष्यत्वेन सन्निकर्षापेक्षत्वात् । १४ ।

अथ ज्ञानमेव सन्निकर्षोऽस्तु । न चैवं सत्यनुमेयादावपि मानसप्रत्यक्षसामग्रीसत्त्वेन प्रमाणान्तरोच्छेदः । पृथिव्यामितरभेद इत्यप्रसिद्धसाध्यकव्यतिरेकिणि ज्ञानाख्यसन्निकर्षाभावात् । मैवं तथाप्युपमानशब्दयोरुच्छेदो दुर्वारः, तादृशानुमितौ मानाभावात् । १५ ।

अपिच तत्रापि भेदत्वस्य प्रकारत्वार्थं प्रथमोपस्थित्यपेक्षावश्यकीति ज्ञाने तद्धर्मिणो भेदस्य [प्रत्यक्ष-]भानं न दुर्लभम् । अपिच तथापि पर्वतादिविशेष्यकानुमित्युच्छेदः । न चालौकिकप्रत्यक्षसामग्रीतोऽनुमितिसामग्री बलवतीति वाच्यम्,मानाभावात् उभयोर्भिन्नविषय एव प्रामाण्यस्य त्वदुक्तरीत्या स्थितत्वात् व्यतिरेकिण्यनुमितित्वासिद्धेश्च । यदि परामर्शान्वयव्यव्यतिरेकानुधायिनि ज्ञाने परामर्शजन्ये इन्द्रियजन्यत्वकल्पने गौरवमित्यर्थतो मानान्त-

---

हि एतज्ज्ञानं व्याप्यतावच्छेदकधूमत्वादिप्रकारकत्वेन नैव सम्भूतम् । परन्तु व्याप्यप्रकारकमिदं ज्ञानम् । अपरञ्च धूमवान् पर्वतः इति ज्ञानात् वह्न्यनुमित्यापत्तिः, तज्ज्ञानस्य वह्निव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यानुमितिकारणत्वे तु चैत्रस्य तादृशज्ञानसत्त्वे मैत्रस्यानुमित्यापत्तिः । तद्वारणाय तत्पुरुषीयत्वनिवेशे तु महद् गौरवम् , कार्यकारणभावस्य आनन्त्यात् । न्यायमते तु समवायसम्बन्धेन परामर्शः समवायेनानुमितिं जनयतीति नानन्तकार्यकारणभावः । अतो लाघवम् । एवञ्च यत्र ज्ञानद्वयं तत्रापि विशिष्टं ज्ञानमेकं कल्पनीयम् , फलगौरवस्यादोषत्वादिति । भाट्टमीमासंकास्तु समवायसम्बन्धं नांगीकुर्वन्तीत्युक्तम् । तेन च तेषां परामर्शांगीकारेणालम्, **नरसिंहाकारज्ञानद्वेयेन** तत्कार्यनिर्वाहकत्वात् ।

रत्वमित्युच्यते, तदर्थापत्त्यादेरपि मानान्तरत्वं दुर्वारम् । किञ्च इन्द्रियान्तरजन्यत्वकल्पने गौरवात् तन्मास्तु । मनोजन्यत्वं तूभयसिद्धमेवेति स्यादेव मानान्तरोच्छेदो ज्ञानस्य सन्निकर्षत्वे । १६ ।

अथ सुरभि चन्दनमितिवदिह घटाभाव इतिवच्च नरसिंहाकारमेव विषयांशे स्मरणं ज्ञानांशे प्रत्यक्षं विषयविशिष्टज्ञानमस्त्विति चेत् ? न, घटज्ञानमिति ज्ञानत्वविशिष्टज्ञानजनकस्य घटज्ञानस्येन्द्रियसंस्कारतदुद्बोधकात्मकप्रमाणाप्रमाणसमाहारजन्यत्वकल्पनामपेक्ष्य घटज्ञातता साधारणयत्किञ्चिज्जन्या कार्यत्वादिति प्रमाणमात्रजन्यत्वकल्पनाया लघुत्वात् । न च तथापि घटज्ञानत्वप्रकारिका धीरितो न जातेति वाच्यम्, प्रमाणान्तरोपस्थापितस्य प्रकारताया अपि सम्भवात् तदंशे गृहीतग्राहितया तस्य न प्रामाण्यम्, किन्त्वनुवादमात्रमित्यन्यदेतत् । १७ ।

यत्तु ज्ञानस्यातीन्द्रियत्वे ज्ञातताया ज्ञानजनकजन्यतैव स्यादित्यप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यतीति, तन्न घटं जनामीत्याकारस्य ज्ञानज्ञानस्य प्रत्यक्षादिप्रमाणविषयतानुपपत्तेः । १८ ।

अस्ति ह्येषा सर्वजनसिद्धा सा न प्रत्यक्षरूपोक्तदोषान्न वा प्रमाणान्तरादिति प्रत्यक्षसिद्धज्ञाततान्यथानुपपत्तिप्रभवार्थापत्तिरेवेत्येतावान् विशेषः । न च प्रत्यक्षत्वे सैव न स्यादिति वाच्यम्, एवमेवोपपत्तेः । न हि दृष्टेऽनुपपत्तिर्नाम । एवञ्च सति न प्रत्यक्षोपलम्भस्य ह्येकोऽप्यर्थः प्रसिद्ध्यतीत्येव पठितव्यम् , वार्त्तिकोक्तदिशा विषयाणां ज्ञानाभेदस्य दुर्वारतापत्तेरिति । तस्मात् सिद्धैव ज्ञानातिरिक्ता विषयता नाम, सैव च ज्ञानमात्रेणाहिता ज्ञाततेति प्रत्यक्षेणाहिता अनुभूततेति प्रत्यक्षत्वातिरिक्तानुभूतित्वे मानाभावत् , तथा प्रकटतेति स्फुटतेति अनुमित्यादिना आहितानुमिततादीति इच्छयाहिता इष्टतेति कृत्याहिता कृततेति संस्कारेणाहिता संस्कृततेति कथ्यते । अवश्यञ्च परेणापीच्छाविषयताया असिद्धमात्रीयतानियमाय संस्कारस्य सविषयतोपपत्तये ज्ञानविषयतातोऽतिरिक्ता सा मन्तव्या । सा चातिरिक्ता न वेत्यन्यदेतत् । १९ ।

अपि च ज्ञाधातोः सकर्मकत्वनिर्वाहायापि तज्जन्यं फलं विषयनिष्ठं स्वीकार्यम् । सैव च विषयता न च भावनाख्यः संस्कारस्तथा तस्या आत्मनिष्ठत्वात्, तथाप्युपेक्षाज्ञानस्याकर्मकत्वापत्तेः । कथमतीतानागतयोर्ज्ञाततोपपत्तिः, धर्मिणोरभावादिति चेत् ? न, सामान्यात्मनातीतानागतयोरपि धर्मिणोः सत्त्वात् । येनात्मना सत्त्वं तेनात्मनास्तु तथात्वम् , कथमतीतानागतात्मना ज्ञाततेति चेत् ? भवतोऽपि वा कथमतीतो ज्ञानाख्यस्वरूपसम्बन्धी कदाचित् सत्त्वमेव सम्बन्धिताप्रयोजकमिति चेत् ? अतिसूक्ष्मेक्षिकापूर्विकेयं युक्तिः । हन्त !

तथाच घटादिविषयप्रत्यक्षे ज्ञातो घट इत्यादौ घटज्ञानस्य विषयस्तावद् घटः, घटरूपविषयांशे स्मरणं ज्ञानांशे च प्रत्यक्षमिति नरसिंहाकारं ज्ञानमंगीक्रियते

तर्हि ममाप्येवमस्तु, अन्यकालसत्तयापि तत्कालसम्बन्धोपपादने जन्मान्तर-धनैर्दारिद्र्यदशायामपि धनी स्यादेवेति । २० ।

अपिच घटोऽतीत इति प्रतीतेरतीताश्रयो घटोऽस्त्येव । अन्यथाश्र-यत्वानुपपत्तेर्न च प्रत्यक्षबाधः । तदानीं तस्यातीतार्थत्वेनैव सतो वर्त्तमानात्म-नासत्त्वात् अतीतात्मना वर्त्तमानत्वं तु नाध्यक्षोपयोगि, किन्तु स्वरूपेण तथात्वम् । अतएव जलाहरणाद्यर्थी तत्र प्रवर्त्ततेत्यपि वार्त्तम्, प्रवृत्तिं प्रत्युपादानप्रत्यक्षस्यापि हेतुत्वात् । तस्मात् तदात्मना सतस्तस्यानुभवकर्मतया अनुभवहेतुता । ज्ञातो घट इति प्रतीतेर्ज्ञातता हेतुता च दुरपवादा । एतेन भावी घटो व्याख्यातः । तथापि तन्निष्ठा ज्ञातता सन्निकर्षं विना कथं प्रत्यक्षेति चेत् ? न, कथञ्चित् किन्तु तद्गोचरशब्दप्रयोगादिनानुमेया । एवञ्चानुमिततापि व्याख्याता । २१ ।

(सामान्याभावयोर्विचारः)

ननु व्यक्तेः सामान्यमात्मेत्युक्तं चेत् ? न, धर्मिग्राहकमानेन तस्य [धर्मि-] व्यक्त्यभिन्नस्यैव सिद्धेः । तथाहि – अयं गौरयमपि गौरिति धीरनुगतमेकं विषयीकरोतीत्युभयं सिद्धम् । स तु किं व्यक्त्याश्रितः क्लृप्तः पदार्थान्तरमथ क्लृप्तपदार्थान्तर्गता व्यक्तिरेवेति वीक्षायां चरमः कल्प एव श्रेयान् । सैव च सर्वव्यक्तीनां समानमभिन्नं रूपमिति सामान्यमित्युच्यते । नित्या च सा, उत्पा - दविनाशप्रतीत्योर्नीलादिविशिष्टप्रतियोगिकत्वावगाहित्वात् नानात्वेनानुभूयमा-ना कथमेकेति चेत् , येन नीलपीताद्यात्मना तथानुभूयते तेन नैका अपितु स्वरूपतः केवलात्मना । न हि नायं पीतः किन्तु नील इतिवन्नायं गौरित्यपि प्रत्ययो येन स्वरूपतोऽपि भेदः स्यात् । एतेनानन्दत्वादयोऽपि व्याख्याताः । सदेकमप्येवं स्यादिति चेत् ? भवत्येव, तदेव वस्तुत्वमित्याख्यायते । सद्भेदस्तर्हि न स्यादिति चेत् ? न, सतो घटादेर्भेदस्यापि प्रतीतेः । सत्त्वावच्छिन्नप्रतियोगिको

मीमांसकैः । एतादृशं ज्ञानं किं न विषयविशिष्टज्ञानमेकमुच्येत इति पूर्वपक्षिणां पृच्छा मीमांसकान् प्रति ।२१ ।

सामान्यमित्यादि । समानानां भावः स्वाभाविकोऽनागन्तुको बहूनां धर्मः सामान्यमुच्यते । तच्च सामान्यं जात्युपाधिभेदेन द्विविधम् । भिन्नासु व्यक्तिषु एकबुद्ध्यालम्बनम् अनुगताकारप्रतीतिर्वा सामान्यमाह । बाहुलेयशाबलेयधावलेयेषु गौर्गौरिति प्रत्ययो जायते, तेन च गोत्वं नाम सामान्यं जातिः स्वीक्रियते । तच्च सामान्यं गवादिव्यक्तेरात्मा स्वरूपमित्यर्थः ।

अन्योन्याभावस्येत्यादि । अन्योन्याभावो नाम भेदः । यदा प्राभाकरा अभावं पदार्थान्तरं न मन्यन्ते, भूतलादौ घटादेर्योऽभावो गृह्यते सोऽभावो भूतलस्यैव स्वरूपत्व-मिच्छन्ति, अतस्तेषां मतेऽभावस्याधिकरणस्वरूपता स्वीकृता, तदा तु नैयायिका भाट्टाश्चाभावं पदार्थान्तरं स्वीकुर्वन्ति । परन्तु नैयायिकैर्यदा संयुक्तविशेषणतानाम-

भेदो न स्यादिति चेत् ? न, अभावो न भाव इति प्रतीतेस्तस्याप्यावश्यकत्वात् । कथं तर्हि –

'कार्यादीनामभावः को योऽभावः कारणादितः ।' (श्लो॰ वा॰, पृ॰ ३३७) इत्याचार्यवचनमिति चेत् ? न, अभेदोऽप्यस्तीत्यभिप्रायेन । तथा च त एवाहुः –

' न ह्यत्यन्तमभेदोऽस्ति रूपादिवदिहापि नः ।।' (श्लो॰ वा॰, पृ॰ ३४०) इति ।

अथाधिकरणेभ्योऽत्यन्ताननुगतेभ्योऽनुगतप्रतीतिविषयाभावस्यास्तु भेदः, अभेदः कुत इति चेत् ? न , क्लृप्तेष्वधिकरणेषु धर्मिषु अभावत्वाख्यधर्ममात्रकल्पनयैवोपपत्तावभावस्य तेभ्यो भेदः कुत इत्येव किं न स्यात् ? तस्मादस्ति तावद्धर्मी कश्चित् । स च भाव इत्यनुगतप्रतीतेर्भाव इवाभा(व) इत्यगतमतेरभावोऽपि न त्वेकेनान्यस्यान्यथासिद्धिः । अन्योन्याभावस्याधिकरणाभेदस्तु भूतलं घटो नेत्यभेदप्रतीत्यापि सिद्ध्यति । न चैषा भेदवत एवाभेदमालम्बते, न तु भेदस्येति वाच्यम् , तथा सत्यभिलापवाक्ये नञो भेदवति लक्षणाया अन्याय्याया आपत्तेः । २२ ।

अथैवं सति तयैव प्रतीत्या प्रतियोग्यभेदोऽपि स्यादिति चेत् ? इष्यत एव । एतावांस्तु विशेषो यत् प्रतियोग्यभेदोऽभावमात्रस्यैव धर्मिग्राहकमानेन विषयीक्रियते, अन्योन्याभावस्य त्वधिकरणाभेदोऽपीति । तदाहुर्मिश्राः –

सर्वं हि वस्तु सदसदात्मना द्विविधं तद्यदा सद्रूपेण वर्त्तते घटादि तदा तत् प्रत्यक्षादिभिरस्तीत्येवं प्रतीयते । यदा त्वसद्रूपेण वर्त्तते तदा भूतले घटो नास्तीत्येवमनुपलब्ध्येति । (शा॰ दी॰, पृ॰ २३४) । २३ ।

एवञ्च घटो नास्ति घटौ न स्तः घटा न सन्तीति तिङुपात्तसंख्यापि संयोज्या भवति । अभावात्मनो घटस्य तत्तत्संख्यात्वात् तथा नीलो घट इति सामानाधिकरण्याद् गुणगुणिनोरप्यभेदः । न च मनूक्तौ पादभेदलक्षणातो वा तदुपपत्तिरेवमेवोपपत्तौ तत्कल्पनायां प्रमाणाभावात् । २४ ।

अपिच पाकेन रूपपरावृत्तौ नीलो घटो नष्टो रक्त उत्पन्न इति प्रतीतिर्घटस्य ध्वंसमुत्पत्तिं चावगाहमाना गुणगुणिनोर्भेदे मानम् । नहि घटस्य स्वरूपेणोत्पत्तिः सम्भवति, स एवायमिति प्रत्यभिज्ञानात् । न च गुणोत्पाद एवास्याविषयः, विशेष्योत्पादस्याप्युल्लेखात्, न च प्रत्यभिज्ञाबाधितसम्भिन्नविषयत्वात् घटात्मनानुत्पादेऽपि रक्तात्मनोत्पादसम्भवात् । न च रक्तात्मत्वमेवासिद्धम्, अस्या उत्पादप्रतीतेरसति बाधके प्रमात्वात् तद्बलेन तस्यापि सिद्धेः । एतेन ध्वंसोऽपि व्याख्यातः । २५ ।

सन्निकर्षेणाभावस्य प्रत्यक्षत्वमभ्युपेतं तदा भाट्टमीमांसकैरभावस्य ग्रहणाय अनुपलब्धिनाम प्रमाणान्तरं स्वीकृतमित्युत्तरत्र स्पष्टीभविष्यति । पार्थसारथिमिश्रैः शास्त्रदीपिकायामुक्तम् – 'सर्वं हि वस्तु सदसदात्मना द्विविधम् – तद् यदा यत्र सद्रूपेण वर्त्तते घटादि तत्तदा तत्र प्रत्यक्षादिभिरस्तीति प्रतीयते । यत्र त्वसद्रूपेण वर्त्तते तत्र सद्रूपेण बोधकानां प्रत्यक्षादीनां सद्रूपबोधनायोत्पत्तुं योग्यत्वे सत्यपि योऽनुत्पादो

अथानया रीत्या विशिष्टयोरेवोत्पादविनाशौ सिद्ध्यतः , नतु तदात्मना विशेष्यस्येति चेत् ? न, विशिष्टयोरिव विशेष्यस्यापि प्रतियोगितयोल्लेखात् । न हि नीलो नष्टो रक्तो जात इत्येवोल्लेखः, अपितु नीलो घटो नष्टो रक्तो घटो जात इति, तथापि विशिष्टात्मना तौ स्तामिति चेत् ? न, विशिष्टाभेदसाधकेन विनिगमनाविरहेण विशेषणाभेदस्यापि विषयीकरणात् , वस्तुतो विशिष्टमपि विशेष्यात्मना न विशेष्याद् भिन्नम् , अपितु विशेषणात्मनैवेत्यतो विशिष्टात्मनस्तावुच्यमानौ विशेषणात्मन एवार्थत उक्तौ भवतः । इदमेवाभिप्रेत्याहुराचार्याः –

'यदि चैकान्ततो भिन्नं विशेष्यात् तद् विशेषणम् ।
स्वानुरूपां ततो बुद्धिं विशेष्ये जनयेत् कथम् ॥'
(श्लो॰ वा॰, पृ॰ १२८) इति । २६ ।

दृश्यादर्शनयोग्यानुपलम्भादिपर्यायो भाष्ये प्रमाणाभावशब्देनोक्तस्तेनैवेन्द्रियशब्दादिस्थानीयेन नास्तीति प्रमीयते – भूतलेऽत्र घटो नास्तीति ।' (शा॰ दी॰, पृ॰ २३४–२३५) इति । शास्त्रदीपिकाकर्तॄणां पार्थसारथिमिश्राणामाशयः **तदाहुर्मिश्राः** इत्युक्त्वा आरब्धवान् **सर्वं ही**त्यादिग्रन्थेन ।२३ ।

अभावः प्रथमतो द्विविधः संसर्गाभावोऽन्योन्याभावश्च । तत्र संसर्गाभावः पुनस्त्रिविधः प्राक्प्रध्वंसात्यन्ताभावभेदात् । घटो नास्तीति एकरूपेण त्रयाणां संसर्गाभावानां यथायथं प्रतीतेः त्रितयात्मकः संसर्गाभाव एकीकृतः प्रथमतो द्विधा विभक्तोऽभावः । अन्योन्याभावस्तु इदमिदं न भवतीति बोध्यमानो भवति । अतः संसर्गबोधकपदनिर्देशकप्रयोजकीभूताभवत्वं संसर्गाभावत्वम्, तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगिताकाभावत्वं वा संसर्गाभावत्वम् । तादात्म्यं नाम तत्स्वरूपता । यथा पटो न घट इत्यत्र घटे न पटस्वरूपता । अयमन्योन्याभावस्य दृष्टान्तः । अन्योन्याभावत्वं नाम तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । किञ्च भविष्यतीत्युच्यमाने योऽभावः प्रतीयते स प्रागभावः । नष्टो ध्वस्तो वेत्युच्यमाने योऽभावः स ध्वंसो नाम । नास्तीत्युच्यमाने योऽभावो बोध्यते सोऽत्यन्ताभावः । तदुक्तम् –

' क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ॥
नास्तिता पयसो दध्नि प्रध्वंसाभाव इष्यते ।
गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ॥
शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः ।
शशशृंगादिरूपेण सोऽत्यन्ताभाव उच्यते ॥'

(श्लो॰ वा॰, पृ॰ ३३६) इति ।

पूर्वविज्ञानमुत्तरविज्ञानमित्येतद्विज्ञानद्वयस्यैकस्मिन् विषये प्रतिसन्धानं नाम **प्रत्यभिज्ञानम्** । न च गृहीतग्राहितत्वात् अप्रमाणं प्रत्यभिज्ञानमिति वाच्यम् । यतः

तत् किं भेदोऽप्यस्ति ? कः सन्देहः, तस्याप्यबाधितप्रतीतेः । नच भेदाभेदयोर्विरोधः विधाविरोधयोः प्रमाणैकायत्तत्वात् । न चान्धेन घटवच्छुक्लस्यापि ग्रहणं स्यात्, घटात्मना तद्ग्रहस्येष्टापत्तेः, शुक्लात्मना ग्रहे चक्षुषः कारणत्वात् । गुणानामपि नीलपीतादीनां न स्वरूपत उत्पादो नाशो वा, तेषामप्येकैकव्यक्तित्वात् । नित्यानेकसमवेतगुणेतरत्वमेव सामान्यत्वं, गुणे व्यवहाराभावेन तादृशस्यैव प्रवृत्तिनिमित्तत्वात् , अन्यथा नित्यत्वमपि त्याज्यं स्यात् । किन्तु पाकविशेषेण तस्य विरोधे सति पाकाधिकरणावृत्तित्वं नीलस्य नाशस्तदधिकरणवृत्तित्वं च रक्तोत्पादः पक्ष एव तदधिकरणेनापक्व इति प्रतीतिबलात् कल्प्यत इति कोऽपि न दोषः ॥ २७ ।

(इति प्रमासामन्यपरिचयपरिच्छेदः)

इन्द्रियदौबल्यादिदोषतः प्रत्यभिज्ञानं कदाचिद् भ्रान्तं स्यात् तथापि 'तदास्तित्वाधिकत्वाच्च प्रामाण्यं तस्य साधितम् ।' (श्लो॰ वा॰, पृ॰ ५८४) । 'प्रमाणं प्रत्यभिज्ञानं दृढेन्द्रियतयोच्यते ।' (श्लो॰ वा॰, पृ॰ ५८४) । शबरस्वामिनाप्युक्तम् – 'वयं तावत् प्रत्यभिजानीमः, न नः करणदौर्बल्यम्, एवमन्येऽपि प्रत्यभिजानन्ति ।' (मी॰ भा॰, पृ॰ १०५) इति ।

विरुद्धपक्षयोरेकतरपक्षपातिनी युक्ति**र्विनिगमना** ।

यदि इति । श्लोकवार्तिके कारिकेयमन्यथा निभाल्यते –

'यदि ह्येकान्ततो भिन्नं विशेष्यात् स्याद्विशेषणम् ।

स्वानुरूपां सदा बुद्धिं विशेष्ये जनयेत्कथम् ॥' इति ।२६ ।

इति साहान्तविश्वरूपेण कृतायां पञ्चिकानाम्न्यां विवृत्यां प्रमासामान्यपरिचयपरिच्छेदः ॥

(प्रत्यक्षपरिच्छेदः)

(प्रत्यक्षनिरूपणम्)

प्रामाण्याश्रयाश्च षड्विधा प्रत्यक्षानुमित्युपमितिशाब्दार्थापत्त्यनुपलब्धिभेदेन । प्रत्यक्षत्वं च नार्थजज्ञानत्वं, सर्वधियां विषयजन्यत्वात् । अन्यथा विषयस्य ज्ञानकर्मतानुपपत्तेः कारकविशेषस्यैव कर्मत्वात् । न च नास्त्येव

विचित्ररूपं किल विश्वतत्त्वं तस्याप्तये भिन्नमतं प्रमाणम् ।

भाट्टादृतं यत् प्रवरं प्रमाणं प्रत्यक्षमित्याह वितन्यते तत् ॥

पूर्वं प्रामाण्यं विचारितम् । अधुना तस्य प्रामाण्यस्याश्रयाः कतिविधा इत्युत्तरयति रघुनाथः **प्रामाण्याश्रयाश्चे**ति ग्रन्थेन । प्रमायाः करणं प्रमाणम् तस्य भावः प्रामाण्यम् = प्रमात्वम् । अनुभवस्मृतिभेदेन ज्ञानं द्विविधम् । तत्र यथार्थानुभवः प्रमा, प्रमाया भावः प्रमात्वम् तच्च प्रमात्वं भाट्टमीमांसकमते प्रत्यक्षानुमित्युपमितिशब्दजार्थापत्त्यनुपलब्धिनाम्नीषु षट्सु प्रमासु आश्रयते । तदुक्तं प्रामाण्याश्रयाश्च षड्विधा इति । तेन तत्तत्प्रमायाः करणमपि प्रत्यक्षमनुमानमुपमानं शब्दोऽर्थापत्तिरनुपलब्धिः (अभावो वा) चेति षड्विधम् । तथाच प्रामाण्यं नाम प्रत्यक्षादिप्रमाणगतो धर्मविशेषः । प्रमाकरणं प्रमाणमित्युक्तम् । साधकतमं कारणं करणम्, अतिशयेन साधकं साधकतमं प्रकृष्टोपकारकं कारकमित्यर्थः । कारणञ्च तत्तत्कार्यनियतपूर्ववृत्त्यन्यथासिद्धभिन्नत्वे सति नियतपूर्ववर्त्तित्वरूपम् । अन्यथासिद्धेः सामान्यलक्षणं तावत् पूर्ववर्त्तितावच्छेदकयद्रूपावच्छेनाभियुक्तानां कारणत्वव्यवहारो नास्ति, तद्रूपत्वम् अन्यथासिद्धित्वम् । यथा घटकार्यस्य पूर्ववर्त्तितावच्छेदकदण्डत्वगततद्व्यक्तित्वावच्छेदेन दण्टत्वेऽभियुक्तानां कारणत्वव्यवहारो नास्तीति दण्डगततद्व्यक्तित्वम् अन्यथासिद्धिः । तादृशान्यथासिद्धिमत्त्वम् अन्यथासिद्धित्वम् । अथ प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमाया असाधारणत्वमेव प्रमाणमिति निष्पद्यते । प्रमा चाज्ञाततत्त्वार्थज्ञानम् । न ज्ञातः अज्ञातः तत्त्वं तद्वति तत्प्रकारकं यथार्थः अबाधितश्च योऽर्थः विषयः तद्विषयकज्ञानं प्रमा । स्मृतेः सर्वदैव प्रागधिगतविषयकत्वात् भ्रमीयज्ञानस्य च शुक्तौ इदं रजतमिति अयथार्थविषयत्वात् तत्तज्ज्ञानं न प्रमा । प्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम् । प्रत्यक्षशब्दस्य प्रत्यक्षप्रमाणं प्रत्यक्षज्ञानं प्रत्यक्षविषयश्चेति व्युत्पत्तिलभ्यास्त्रिविधा अर्थाः समुपलभ्यन्ते । तद् यथा–अक्षम् अक्षं प्रति प्रत्यक्षमित्यव्ययीभावसमासेन प्रत्यक्षशब्दस्येन्द्रियरूपोऽर्थः सिध्यति । भाट्टमते तथा नव्यन्यायमते तच्चेन्द्रियं भवति प्रत्यक्षप्रमाणं सन्निकर्षश्च व्यापारः । अक्षम् अक्षं प्रति = प्रतीत्य इत्यर्थकरणे गतिसमासे उत्पद्यमानं ज्ञानं प्रत्यक्षम्, उत्पद्यमाना प्रमा प्रत्यक्षेति प्रत्यक्षशब्दोऽत्र फलरूपज्ञानार्थकः । एवम् अक्षं प्रतिगतो विषयः इति प्रादिसमासे प्रत्यक्षशब्दस्य विषयरूपोऽर्थो लभ्यते । प्रत्यक्षशब्दस्य ज्ञानार्थत्वे विषयार्थत्वे च वाच्यलिंगत्वमिति ध्येयम् । यतो हि प्रत्यक्षो वालकः, प्रत्यक्षा वालिका प्रत्यक्षं पुष्पमित्येवं विषयावगतिर्जायते । **नार्थजज्ञानत्वमि**ति । आत्मा मनसा संयुज्यते मनो बाह्येन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यत **इत्यतोऽर्थजज्ञानमर्थात्** विषयेन्द्रिय-

कर्मता, द्वितीया तु विषयत्वमात्रे साधुरननुशासनात् । न च घटं करोतीतिवत् स्यात्, तत्र कपालात्मना घटस्यैव कर्मत्वाभ्युपगमात् । परस्यापि तत्रोपादान-लक्षणांगीकारात् । किन्त्वपरोक्षावभासत्वं, न च जातिविशेष उपाधिविशेष एव वा । १ ।

(प्रत्यक्षकरणनिरूपणम्)

करणञ्च प्रत्यक्षस्य चक्षुरादिकं प्रसिद्धम् । तत्र मनो विभु, तत्परिमाणे मा-नाभावात् दीर्घशाष्कुलीभक्ष[ादी-]नामपि युगपद्बोधात् । न हि तत्क्रमिकत्वे मानमस्ति । न चैवं व्यासंगानुपपत्तिः । योग्येन्द्रियसन्निकर्षस्य दे-[शादि-] योग्यता च सन्निकर्षनिष्ठा फलोन्नेया व्यासंगस्थलेनास्तीति । न चैवमात्मसं-

---

सन्निकर्षजन्यज्ञानं प्रत्यक्षमिति न समीचीनं प्रत्यक्षलक्षणं मन्यते रघुनाथः ।स अपरोक्षा-वभासं प्रत्यक्षमाह । एतच्च प्रत्यक्षलक्षणं भाष्यकारादिभाट्टमीमांसकसम्मतम् । तथाहि –"सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्' (मी॰ सू॰ १/१/४, पृ॰ ७) यदाभासं विज्ञानं तेनेन्द्रियाणां सम्प्रयोगे यद्विज्ञानं तत् सत्प्रत्यक्षम् ।', (शा॰ दी॰, पृ॰ १३५) इत्युक्त्वा 'साक्षात्तज्जन्यत्वमि'ति व्याचक्षिरे मिश्राः (शा॰ दी॰, पृ॰ १३६) । आभासशब्दो यथार्थज्ञाने प्रसिद्धः, यथा नीलस्याभासः पीतस्याभासः । अवभासः = आभासः । अनुमितिरुपमितिः शाब्दोऽर्थापत्तिरनुपलब्धिश्च पञ्च प्रमाः परोक्षा अव-भासाः, ते न भवति यः सोऽपरोक्षावभासः । अपरोक्षः = साक्षात् । एतादृशोऽवभासो यतो जायते तत् प्रत्यक्षप्रमाणमिति बोध्यम् ।

करणञ्चेत्यादि । प्राक् प्रमाणलक्षणं कारणञ्चालोचितम् । अधुना करणलक्षणमातन्यते । फलसाधनाश्रययोरन्यतरत्वे सति फलायोगव्यवच्छिन्नं कारणं करणम्, अयोगव्यवच्छिन्नम् = व्याप्तमिति केचित् करणलक्षणमाहुः । एतत् ईश्वरप्रत्यक्षप्रमायां संगतमपि इन्द्रियजे न संगच्छत इति कृत्वा 'व्यापारवत असाधारणं कारणं करणमु'च्यतेऽन्यैः । तज्जन्यत्वे सति तज्जन्यजनको व्यापारः । यथा कुठारेण तरुच्छेदरूपफले कुठारः करणं कुठारतरुसंयोगश्च व्यापारः । कुठारजन्यतादृशसंयोगः कुठारजन्यतरुच्छेदनं जनयति । एवञ्च प्रत्यक्षप्रमायां चक्षुरादि इन्द्रियं करणं, सन्निकर्षश्च व्यापारः, एतच्च निर्विकल्पकप्रत्यक्षप्रमायां बोध्यम् । यदा निर्विकल्प-कप्रत्यक्षात् परं सविकल्पकं प्रत्यक्षमुत्पद्यते तदा सन्निकर्षः करणं, निर्विकल्पकं व्यापारः, सविकल्पकं प्रत्यक्षं फलम् । यदा तु सविकल्पकानन्तरं हानोपादानोपेक्षबुद्धयो जायन्ते तदा निर्विकल्पकं करणं, सविकल्पकं व्यापारः, हानादिकञ्च फलम् ।

यत् सम्प्रयुक्ते विषये साक्षादवभासमुत्पादयति तदिन्द्रियमुच्यते । तच्चेन्द्रियं बाह्या-भ्यन्तरभेदेन द्विविधम् । घ्राणरसनचक्षुस्त्वक्श्रोत्रात्मकं पञ्चविधं बाह्यम् । पृथिव्य-प्तेजोवायुभ्यो यथासंख्यं घ्राणादीनि जायन्ते । श्रोत्रं न्यायमते आकाशात्मकं, भाट्टमते तु 'दिशः श्रोत्रम्' इति दर्शनात् दिग्भाग एव कर्णशाष्कुल्यवच्छिन्नः श्रोत्रमभ्युपेतम् । एवञ्च मन आन्तरमपि न्यायमते अणुपरिमाणं भाट्टमते तु विभुपरिमाणमिति विवेकः ।

युक्तसमवेतसमवायः । न [व्यवा-]यत्वात् संयोगानुपपत्तिः, यतो न क्रिया संयोगहेतुः,संयोगजसंयेगेऽभावात् । न च संयोगे वैजात्यं मानाभावा[त्] तु नैरन्तर्यम्, तच्चात्ममनसोरप्यस्त्येवेति पार्थसारथिमिश्राः । अतएवात्ममनसोः संयोग इत्यन्ये । तदा तु चक्षु[रा-]दिसंयोग एव योग्यता फलोन्नेया । २ ।

(सन्निकर्षनिरूपणम्)

तच्च चक्षुरादिकं प्राप्यकारि । प्राप्तिश्च चतुर्धा – (१) संयोगः, (२) संयुक्तसमवायः, (३) संयुक्तसमवेतसमवायः (४) संयुक्तसमवेतसमवेतसमवायश्चेति । तत्र त्वक्चक्षुर्भ्यां घटादिग्रहे मनसा आत्मनि संयुक्ते श्रोत्रेण च शब्दे गृह्यमाणे प्रथमः, गन्धादिग्रहे द्वितीयः, गन्धत्वादिग्रहे तृतीयः, तद्वर्त्तिवस्तुत्वग्रहे चतुर्थः । ३ ।

मन आत्मनि आत्मगुणसुखदुःखादिषु चैव स्वतन्त्रं प्रवर्त्तते नान्यत्रेत्यत आन्तरमित्याख्यायते । बाह्येषु रूपादिज्ञानेषु तच्च मनो बाह्येन्द्रियसाचिव्येन अनुमानादिषु लिंगादिसहायेन स्मृतौ च संस्कारपारतन्त्र्येण प्रवर्त्तते । प्राभाकरमते मनसः अणुपरिमाणं तार्किकवदिष्टमपि भाट्टपन्थिना रघुनाथेन विभुत्वमिष्यते । आकाशादिवद् अस्पर्शत्वाद् मनो विभु, यद्वा ज्ञानासमवायिकारणस्य संयोगस्याधारत्वात् मनो विभु भवितुमर्हति । किञ्च मनः निष्क्रियं स्वीक्रियते । विभुनी मिथःसंयुक्ते द्रव्यत्वे सति निरन्तरत्वात् आत्माकाशवदित्येवम् अनुमानेन मनसोऽपि आत्मना संयोग उपपद्यते । विभुद्रव्ययोः संयोगो न कर्मजन्यः, तयोः संयोगस्याजन्यत्वाभ्युपगमात् । ननु यदि मनोरूपः कश्चिद् धर्मी स्यात् तर्हि तस्य बिभुत्वादयो धर्मा सिध्येरन्, यच्छरीरसंयोगेनात्मनि सुखदुःखादि जन्यते । तस्मात् आत्मशरीरसंयोगजन्यत्वात् सुखदुःखादीनां शरीरमेव द्रव्यान्तरं स्यात्, अलं मनोनामस्वतन्त्रद्रव्यस्वीकारेणेति चेत् ? न, सुखाद्यपरोक्षज्ञानस्य मनोलिंगत्वात् । तथाहि – अस्ति शरीरावच्छेदकताशालिसंयोगि निमित्तान्तरं व्यापि, यस्य देहावच्छिन्नात्मनाऽसन्निधेर्नोत्पद्यते सुखादि ज्ञानं सन्निधेश्चोत्पद्यते, अवच्छेदककर्तृकरणानां भेदप्रसिद्धेः किञ्चन द्रव्यान्तरं स्वीकर्त्तव्यम्, तच्च मनः । आत्मा सुखादिज्ञाने कर्त्ता, मनः करणम् , तच्च मनो विभु अपि शरीरावयवाच्छेदेन सुखादि ज्ञानं जनयति ।२ ।

प्राप्यकारीति । प्राप्य विषयं प्राप्य अर्थात् यः पदार्थो यस्येन्द्रियस्य विषयस्तम् इन्द्रियग्राह्यपदार्थमुपलभ्य कारयति ज्ञानं जनयतीति व्युत्पत्या सर्वं चक्षुरादि इन्द्रियं विषयं प्राप्य गृह्णाति तेनैव प्रत्यक्षज्ञानं जायत इत्यर्थात् **तच्च चक्षुरादिकं प्राप्यकारी**त्युक्तं रघुनाथेन । भौतिकानि पञ्च बाह्येन्द्रियाणि प्राप्यकारीणि । पार्थिवं घ्राणेन्द्रियं विशेषगुणं गन्धं प्राप्य प्रकाशयति, आप्यं रसनेन्द्रियं जिह्वाग्रवर्त्ति रसं प्राप्य प्रकाशयति, सर्वदेहव्यापि वायवीयं त्वगिन्द्रियं स्पर्शं गृहीत्वा प्रकाशयति चेति सर्वेषां प्रतीतिसिद्धम् । एवं घ्राणेन्द्रियादीनां प्राप्यकारित्वं दृष्ट्वा चक्षुःश्रोत्रयोः प्राप्यकारित्वं कल्पनीयम् । तत्र च तैजसं चक्षू रूपस्य विशेषगुणस्य प्राप्य प्रकाशकम् । चक्षुषो बहिर्गमनं दीपप्रभेव तैजसत्वात् समर्थ्यते, पृथ्वग्रनियमेन च तस्य

(अलौकिकप्रत्यासत्तिनिराकरणम्)

सामान्यलक्षणा तु न प्रत्यासत्तिर्मानाभावात् । तत्कार्यस्य च सामान्याश्रयस्य यावतः प्रत्यक्षे यत्किञ्चित्सामान्याश्रयप्रत्यासत्तेर्हेतुतया जातिव्यक्त्योरभेदेन सन्निकृष्टव्यक्तिनिष्ठजातेः सन्निकर्षेणैवोपपादयितुं शक्यत्वाच्च । ज्ञानलक्षणापि च न प्रत्यासत्तिः, प्रत्यभिज्ञायास्तत्तांशे स्मरणरूपताम्युपगमात् । न च जातिसांकर्यं तस्य[ा-] दोषत्वात् । अन्यथा घटत्वादिकमपि सुवर्णत्वादिना संकीर्णं न जातिः स्यात् । तन्नानात्वे तु जातिसांकार्याय जलाञ्जलिरेव भङ्ग्यन्तरेण विस्तीर्णः । एवं योगजधर्मोऽपि न प्रत्यासत्तिर्मानाभवात् । ४ ।

न च परमाणवः प्रत्यक्षाः प्रमेयत्वात् घटवदित्येव परम्पर[या] तत्र मानम् अप्रयोजकत्वात् । सर्वज्ञप्रमाणमेव तत्प्रत्यासत्तित्वे मानमिति चेत् ? न,तत्रापि प्रमाणाभावात् । न ह्यस्मदादी[नां प्र-]माणं सर्वज्ञं गोचरयितुमीष्टे, अस्मदादीनामपि सार्वज्ञापत्तेः । न हि सर्वमजानन्तः सर्वज्ञं बोद्धुं क्षमाः । न च सामान्य[-ल-]क्षणयाप्य-

---

अधिस्थानाधिकग्रहणमुपपद्यते । चक्षुरिन्द्रियं यथेन्द्रियद्वारेण बहिर्देशं निर्गत्य विषयं गृह्णाति श्रोत्रेन्द्रियन्तु तथा न करोति । श्रोत्रेन्द्रियं स्वस्थाने स्थित्वा शब्दं नाम द्रव्यविशेषं संयोगेन गृह्णाति । वर्णमयशब्दस्य नित्यत्वादुत्पत्तिर्न सम्भवति विभुत्वाच्च श्रवणेन्द्रियं निकषापि वर्त्तते । परन्तु स्तिमितवायुनावृतत्वात्तस्य स्वरूपं नावगम्यते । यदा तु कोष्ठमध्यस्थितो वायुर्बहिर्गत्य क्रमेण श्रोतुः कर्णं प्रविश्य स्तिमितशब्दमाहन्ति तदैवासौ शब्दोऽभिव्यक्तो भवति । तेन च श्रोतुः शब्दस्य श्रावणप्रत्यक्षं भवति । तथाच सर्वम् इन्द्रियं विषयेण सह सम्बध्य विषयं प्रकाशयति । तत्र तैजसत्वाच्चक्षुर्विषयदेशं गत्वा विषयं प्रकाशयति । अन्यत् सर्वमिन्द्रियं स्वाश्रयद्वारा विषयसम्बद्धं सत् विषयं प्रकाशयतीति इन्द्रियाणां प्राप्यकारित्वस्याकूतम् ।

प्राप्तिस्तावत् सम्बन्धः विषयेन्द्रिययोर्व्यापारः, स च सन्निकर्षशब्देन परिभाष्यते । प्रत्यक्षज्ञानं चतुष्टयत्रयद्वयसन्निकर्षात् प्रवर्त्तते । बाह्ये रूपादौ विषये चतुष्टयसन्निकर्षाज्ज्ञानमुत्पद्यते । आत्मा मनः बाह्येन्द्रियविषयौ चेति पदार्थचतुष्टयसन्निकर्षेण रूपादेर्ग्रहणं भवति । सुखादौ तु त्रयसन्निकर्षात् ज्ञानमुत्पद्यते तत्र चक्षुरादिव्यापाराभावात् । आत्मप्रत्यक्षे त्वात्ममनसोर्द्वयोरेव सन्निकर्षात् प्रत्यक्षज्ञानं जायते । गागाभट्टमते लौकिकालौकिककभेदेन सविकल्पकज्ञानं द्विविधम्, तत्र लौकिकं सन्निकर्षजन्यमाहुः । परन्तु न्यायमीमांसकानामत्र सन्निकर्षविषये वैमत्यमस्ति । तथाहि – न्यायमते लौकिकसन्निकर्षः षोढा भिद्यते । संयोगः,संयुक्तसमवायः, संयुक्तसमवेतसमायः,समवायः,समवेतसमवायो विशेषणविशेष्यभावः(संयुक्तविशेषणत्वं वा) चेति । तेषु संयोगेन द्रव्याणां, संयुक्तसमवायेन द्रव्यगतरूपादीनां, संयुक्तसमवेतसमवायेन रूपादिगतरूपत्वादिजातीनां, समवायेन शब्दस्य, समवेतसमवायेन शब्दत्वजातेः विशेषणविशेष्यभावेन चाभावस्य प्रत्यक्षं भवति । वेदान्तिभिः समवायस्थाने तादात्म्यमास्थाय संयोगः , संयुक्ततादात्म्यं , संयुक्ताभिन्नतादात्म्यमिति त्रयः सन्निकर्षाः स्वीक्रियन्ते । प्राभाकरैः संयोगः, संयुक्तसमवाय समवायश्चेति त्रयः सन्निकर्षा आद्रिताः । तेषां मते रूपत्वादिधर्मस्यास्वीकारात् संयुक्तसमवेतसमवायो नांगीक्रियते । प्रायः सर्वे भाट्टास्त्रीन् सन्निकर्षान् स्वीकुर्वन्ति । मानमेयोदयकृन्मते द्वेधा त्रेधा वा सन्निकर्षाः स्वीकृताः । ते खलु संयोगः, संयुक्ततादात्म्यं संयुक्तसमवेतसमवायो वा । तेषां मते शब्दस्य द्रव्यत्वांगीकारे संयोगेन शब्दो गृह्यते

शेषविशेषबोधः सम्भवति, येन तमुपजीव्य सर्वज्ञं ज्ञास्यामः । तथा सति तयैव योगजधर्मप्रत्यास[त्त्यन्यथा-]सिद्ध्यापातात् । न च सर्वज्ञमजानतः सर्वज्ञखण्डनमपि कथमिति वाच्यम् ? न हि मया आहत्य सर्वज्ञो नास्तीत्युच्य[-ते, अपितु] यादृशि सर्वज्ञे प्रमाणं वक्तुं भवतोद्यतं स सर्वज्ञो भवता मया च तुल्य इत्येतावत् । तावतैव च न पराभिमतसर्वज्ञा[-सिद्धिरि-]ति । ५ ।

शब्दत्वञ्च सयुंक्ततादात्म्येन । गागाभट्टैस्त्रिविधो लौकिकसन्निकर्षः स्वीकृतः, तत्र संयोगेन द्रव्यस्य, द्रव्याश्रितगुणकर्मजातीनां संयुक्तसमवायेन, गुणकर्मणोर्जातिश्च संयुक्तसमवेतसमवायेन प्रत्यक्षं भवति ।घटशून्यं भूतलमित्यादौ अभावश्च नेन्द्रियसन्निकर्षजन्योऽपितु अनुपलब्धिजन्य इत्युत्तरत्र स्पष्टीभविष्यति ।

अस्मांक ग्रन्थकारैः रघुनाथैश्चतुर्विधसन्निकर्षः प्राप्तिशब्देन परिकल्पितः । तत्र चतुर्थः सन्निकर्षः ग्रन्थस्य वैशिष्ट्यमावहति । तथा हि – घ्राणसंयुक्तसंयुक्ता पृथिवी, तत्र समवेतः गन्धः, तत्र गन्धे समवेतं गन्धत्वम्, तत्रापि गन्धत्वे वस्तुत्वस्य समवायो विद्यते इति गन्धत्वगतवस्तुत्वज्ञाने संयुक्तसमवेतसमवेतसमवायः सन्निकर्षो नामापूर्वः सन्निकर्षः सन्दर्भितः । तदुक्तम् – **तद्वर्त्तिवस्तुत्वग्रहे चतुर्थः** इति । तद्वर्त्ति = गन्धत्वादिवर्त्ति, वर्त्ति = वृत्ति ।३ ।

सामान्यलक्षणेत्यादि । नैयायिका अलौकिकप्रत्यक्षार्थमलौकिकसन्निकर्षं स्वीकुर्वन्ति । स त्रिविधः सामान्यलक्षणा प्रत्यासत्तिः (=सन्निकर्षः), ज्ञानलक्षणा प्रत्यासत्तिर्योगजप्रत्यासत्तिश्च । रघुनाथैरत्रालौकिकसन्निकर्षस्त्रितय एव खण्डितः । गागाभट्टैस्तु सामान्यलक्षणस्य ज्ञानलक्षणस्य चोपयोगमुपवर्ण्य तयोरंगीकारः कृतः, परन्तु योगजसन्निकर्षः प्रत्याख्यातः ।

सामान्यलक्षणसन्निकर्षस्य द्विधार्थो लभ्यते । सामान्यमेव लक्षणं स्वरूपं यस्येति व्युत्पत्तौ सामान्यं भवति सन्निकर्षः । सामान्यं लक्षणं विषयो यस्य स सामान्यलक्षण इत्यर्थे सामान्यज्ञानमेव सन्निकर्षः । यदा लौकिकसन्निकर्षेण सम्मुखस्थं घटादिवस्तु प्रत्यक्षीभूयते तदा अलौकिकसन्निकर्षेण देशान्तरीयस्य कालान्तरीयस्य च निखिलघटादिवस्तुनोऽलौकिकप्रत्यक्षं भवति । एवं निखिलघटानां चक्षुरिन्द्रियेण स्वसम्बन्धविशेष्यकज्ञानप्रकारीभूतधर्मवत्तारूपः सम्बन्धो वर्त्तते । अत्र सामान्यशब्दः केवलं न जात्यर्थे प्रयुक्तः, अपितु तादृशप्रकारीभूतधर्ममात्रस्य बोधकः । अतो यदा घटस्य प्रत्यक्षं भवति तदा घटत्वं सामान्यम् । यदा तु घटवत् भूतलं प्रत्यक्षीभूयते तदा घटवत्ता (= घटः) सामान्यं स्यात् । गङ्गेशमते वह्निव्याप्यधूमवान् पर्वतः इति परामर्शात्मकज्ञानोत्पत्तौ सामान्यलक्षणायाः प्रत्यासत्तेरुपयोगो वर्त्ततेतराम् । यतो हि परामर्शस्य द्वेऽङ्गे – (१) व्याप्तिः (२) पक्षधर्मता च । सामान्यलक्षणानंगीकारे द्वयोरेकवाक्यता न सम्पादयितुं शक्यते । सामान्यलक्षणांगीकारे तु धूमत्वरूपसामान्यलक्षणया निखिलधूमे वह्नित्वरूपसामान्यलक्षणया च निखिलवह्नेर्व्याप्तिर्निर्धार्यते ।

ततः पर्वतीयधूमं वीक्ष्य व्याप्तिर्निश्चीयते । ततश्च वह्निव्याप्यधूमवान् पर्वतः इति परामर्शात्मकं ज्ञानं जायते । मीमांसकाः परामर्शात् (=परामर्शं विहाय) व्याप्तिज्ञानमनुमितौ करणरूपेण स्वीकुर्वन्ति । ते वदन्ति ज्ञानं द्विविधम् – (१) विशिष्टं (२) विशिष्टवैशिष्ट्यावगाहि च । अयं घटः इति ज्ञानं विशिष्टाख्यम्, घटवत् भूतलमिति च विशिष्टवैशिष्ट्यावगाहि ज्ञानम्, घटत्वधर्मेण विशिष्टो घटः वर्त्तते च घटसम्बन्धस्यावगाहनं भूतले । प्रथमज्ञानं प्रति विशेषणज्ञानं द्वितीयज्ञानं प्रति च विशेष्यतावच्छेदकज्ञानं कारणरूपेण स्वीक्रियते । एवं वह्निमान् अयम् इत्यनुमितिपक्षीयज्ञानं भवति द्वितीयं विशिष्टवैशिष्ट्यावगाहि

(प्रत्यक्षभेदः)

तच्च प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकञ्च । तत्राद्यमयोजितनिर्भासि, विपरीतमन्यत् । न चाद्ये मानाभावः, विशेषणज्ञानं विना विशिष्टज्ञानानुत्पत्तेः । ननु निर्विकल्पकेन वस्तुत्वादीनामुपस्थितौ सविकल्पके सर्वाण्येतानि भासेरन् । न चावश्यं

ज्ञानरूपम् । अतोऽत्र विशेषणतावच्छेदकीभूतवह्नित्वप्रकारकद्वारेण वह्निज्ञानं भवति कारणम् । एवं सति वह्नित्वरूपेण निखिलवह्निज्ञानं भवति, अतः पर्वतीयवह्निज्ञानमपि जायते इति सामान्यलक्षणप्रत्यासत्तिरूपान्तर्गडुस्वीकारेणालम् । अपिच एतत्स्वीकारे यथा घटत्वरूपेण घटत्वज्ञानरूपेण वा सामान्यलक्षणसन्निकर्षेण निखिलघटस्य ज्ञानमुत्पद्यते तथैव प्रमेयत्वरूपेण निखिलप्रमेयात्मकस्य जगतो ज्ञानापत्तिः स्यात्, तेन च न्यायमते सामान्यलक्षणाभ्युपगमवादिमते च सर्वेषां सार्वज्ञापत्तिर्दुर्वारा स्यात् । किन्तु ईश्वरस्वीकर्त्तृणां मते ईश्वर एव सर्वज्ञः, न तु जीव इति चिन्त्यम् ।

अथ ज्ञानलक्षणसन्निकर्ष आलोच्य निरस्यते **ज्ञानलक्षणापी**त्यादिना । ज्ञानलक्षणा इति प्रत्यासत्तेर्विशेषणम्, सन्निकर्षस्य विशेषणत्वे तु ज्ञानलक्षणः इत्येव पुंलिङ्गे प्रयोगः स्यात् । ज्ञानं लक्षणं स्वरूपं यस्य सन्निकर्षस्य स ज्ञानलक्षणसन्निकर्षः । सोऽयं इत्यादिप्रत्यभिज्ञास्थले 'सः' इति तत्तांशस्य भानम्, घटो नास्तीत्याद्यभावप्रत्यक्षस्थलेऽभावांशे प्रतियोगिघटादेर्भानं, सुरभि चन्दनमित्यादौ चाक्षुषप्रत्यक्षस्थले सौरभादेर्भानं, घटमहं जाने इत्यादावनुव्यवसायस्थले (= ज्ञनस्य मानसप्रत्यक्षस्थले) घटादेर्भानं लौकिकसन्निकर्षेण न सम्भवति । यतः प्रथमस्थले तत्तांशेन सहेन्द्रियस्य नास्ति संयोगादिसम्बन्धरूपलौकिकसन्निकर्षः, द्वितीयेऽभावेन सह विशेषणतासन्निकर्षे सत्यपि नास्ति प्रतियोगिना घटेन सह सन्निकर्षः, तृतीये चन्दनेन सह चक्षुरिन्द्रियस्य संयोगनामकसन्निकर्षे सत्यपि चन्दनत्वसामान्येन सह संयुक्तसमवायाख्यसन्निकर्षे सत्यपि च सौरभग्रहणे नास्ति चक्षुषो योग्यता । चतुर्थे मनसो बाह्यवस्तुग्रहणे सामर्थ्यं नास्ति । इत्यतस्तत्तत्प्रत्यक्षतां निवोढुं ज्ञानलक्षणसन्निकर्षः स्वीकार्य इति तार्किकादीनां मतम् । रघुनाथादयो मीमांसकास्तु नैतद् आद्रियन्ते । ते ब्रुवन्ति - प्रथमं चन्दनस्य सौरभमनुभुतम्, तदनुभवजनितसंस्कारसध्रीचिना इन्द्रियसन्निकर्षादेव सुरभि चन्दनमिति प्रत्यक्षज्ञानमुत्पद्यते । तत्र सौरभांशे स्मृतिर्विद्यते चन्दनांशे च चाक्षुषानुभवः इति स्मरणं प्रत्यक्षंचेति ज्ञानद्वयमाश्रित्य सुरभि चन्दनमिति ज्ञानं जायते । अतो ज्ञानलक्षणसन्निकर्षेण प्रयोजनं नास्ति,नृसिंहाकारज्ञानाभ्युपगमादिति । गागाभट्टस्तु न्यायपथेन ज्ञानलक्षणसन्निकर्षं स्वीकृतवान् । एतत् परामृश्य ड० वाचस्पतिराचष्टे-एवं कृत्वा गागाभट्टो मीमांसकानामाकृत्यधिकरणसिद्धव्यक्तिशक्तिवादं विस्मृत्य जातौ शक्तिं स्वीकृतवानिति ।

योगजधर्मोऽपीत्यादिना योगजसन्निकर्षनिराकणमारभ्यते । योगजसन्निकर्षो नाम योगाभ्यासजनितो धर्मविशेषः । अष्टांगयोगानुष्ठानादेवं सामर्थ्यं जायते यस्य प्रभावेन योगी देशान्तरीयस्य कालान्तरीयस्यातीन्द्रियपदार्थस्य सूक्ष्मणो व्यंवहितभूतभविष्यतोश्च पदार्थानां प्रत्यक्षं कर्त्तुमुत्सहते । युक्तयुञ्जानभेदेन योगी द्विविधः । योगिनो द्वैविध्यात् योगजसन्निकर्षोऽपि द्विविधः । अतो योगिनोऽनुमेयपदार्थस्य भाने योगजसन्निकर्षेण सिद्धे व्याप्तिग्रहणेन प्रयोजनं न भवति । रघुनाथो योगजप्रत्यासत्तेः स्वीकाराय अनुकूलं प्रमाणं नास्तीत्याकलयति । प्रत्यक्षं हि विद्यमानोपलम्भनम्, योगिज्ञानमविद्यमानविषयम् । अतो योगजप्रत्यक्षस्याभावात् तत्कारणतया

भासन्ते, तस्मात् सविकल्पकं न प्रत्यक्षम् , अपितु वासनासमुत्थमिति चेत् ? अत्रोक्तमाचार्यैः –

'युगपद् ग्राहकाणां तु यो यदाकारवाचिनम् ।
शब्दं स्मरति तेनासावाकारः सम्प्रतीयते ॥' (श्लो॰ वा॰, पृ • २३७)इति ॥६॥
इति प्रमाणरत्ने प्रत्यक्षप्रमाणपरिच्छेदः ॥

योगजप्रत्यासत्तिस्वीकारेण प्रयोजनं नास्ति । तदुक्तम – 'न लोकव्यतिरिक्तं हि प्रत्यक्षं योगिनाम् ।' (श्लो॰ वा॰, पृ॰, १०२) इति । श्वो मे भ्रातागन्तेति **प्रातिभ**ज्ञानं न्यायवैशेषिकैः प्रत्यक्षमुच्यते तत्तु बाहुल्येन ऋषीणामेवेत्यार्षमित्यभिधीयते । एतदपि मीमांसकैर्नाङ्गीक्रियते । तदुक्तम् — 'लौकिकी प्रतिभा यद्वत् प्रत्यक्षाद्यनपेक्षिणी । न निश्चयाय पर्याप्ता तथा स्याद् योगिनामपि ॥' (श्लो॰ वा॰, पृ॰, १०३) इति । एवञ्च योगिनां योगजप्रत्यासत्त्या अतीन्द्रियाणां परमाण्वादीनां प्रत्यक्षप्रमात्वं यन्नैयायिकादिभिः स्वीकृतं तदपिनोपपद्यते । **न च परमाणवः प्रत्यक्षाः** इत्यादिग्रन्थेन प्रतिपादितं तत् । **आहत्य** = प्रवलभावेन । ४–५ ।

तच्च प्रत्यक्षमित्यादिना प्रत्यक्षस्य भेदं दर्शयति । बौद्धवैयाकरणाभ्यामन्ये सर्वे दार्शनिका निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षं द्विविधं स्वीकुर्वन्ति । तत्र **आद्यम्** = निर्विकल्पकम् अयोजितम् पञ्चविकल्पेनानन्वितम्, तत् चादो निर्भासि = अवभासः अयोजितनिर्भासि । सविकल्पकन्तु निर्विकल्पकविपरीतम् पञ्चविकल्पयुक्तमित्यर्थः । वार्तिककृन्मते इन्द्रियार्थसन्निकर्षादनन्तरं यद् द्रव्यादिस्वरूपमात्रं विषयीकरोति, यच्च शब्दसम्बन्धरहितं बालमूकादिसाधारणज्ञानसन्निभं सम्मुग्धाकारं ज्ञानमुत्पद्यते विशिष्टकल्पनारहिततया तज्ज्ञानं निर्विकल्पकमुच्यते । गागाभट्टोऽपि उक्तविधभेदमभिधाय निर्विकल्पकमाचष्टे – 'प्रकारताविशेष्यतादिविषयतारहितं ज्ञानं निर्विकल्पकम् , ••• तच्च प्रत्यक्षं, किञ्चिद् भासत इति प्रतीतेः ।' (भा॰ चि॰, पृ॰ १६) इति । धर्मकीत्तिरेवमस्य स्वरूपमाह – 'अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना तया रहितम्' (न्या॰ वि॰, पृ॰ ४२, ५१) इति । केचिद् निर्विकल्पकज्ञानस्योत्पत्तावेव नष्टेन्द्रियव्यापारात् जात्यादिशब्दादिस्मरणेन व्यवहितत्वाच्च सविकल्पकज्ञाने प्रत्यक्षत्वं नोपपद्यत इत्याहुः । तदसङ्गतम् । सविकल्पकज्ञानस्योत्पत्तिपर्यन्तमिन्द्रियस्य व्यापारो न निवर्त्तते, परन्तु प्रवर्त्तते । अतः सविकल्पकमपि निर्विकल्पकज्ञानवत् साक्षादिन्द्रियजन्यतयाभ्युपगम्यते । उक्तञ्च – 'सविकल्पकमप्यनुपरतेन्द्रियव्यापारस्य जायमानमपरोज्ञावभासत्वात् प्रत्यक्षमेवेत्यदोषः ।' (शा॰ दी॰, पृ॰ १०३ – १०४) इति । किञ्च वार्त्तिककृद्भिरुक्तम्–'तेनेन्द्रियार्थसम्बन्धे विद्यमाने स्मरन्नपि । विकल्पयन् स्वधर्मेण वस्तु प्रत्यक्षवान् नरः ॥'(श्लो॰ वा॰, पृ॰ १२४)इति । स्मृतिसहायेन अर्थं विकल्पयतः पुरुषस्येन्द्रियव्यापाराविरहात् सविकल्पकस्य प्रत्यक्षत्वमव्याहतमिति भावः । गौरयम्, दण्डयम् शुक्लोऽयम् , गच्छत्ययम्, कार्त्तिकोऽयमिति जातिद्रव्यगुणक्रियानामाख्यं पञ्चतयं विविच्य एकैकाकारं वस्तु विषयीकरोति सविकल्पकम्, निर्विकल्पकन्त्वनेकाकारं सन्मुग्धं गृह्णातीति तयोर्विशेष । तदेवेदिमित्येवं कल्पना, मीमांसकैर्नाम्न्येवान्तर्भाव्यते । सोऽयं

कार्त्तिकः इत्यादि प्रत्यभिज्ञा पञ्चमी कल्पना, नान्या। अतएव प्रत्यभिज्ञा सविकल्पकं नाम प्रत्यक्षम्। अथ कैश्चिदाशंक्यते ननु कार्त्तिकोऽयमित्यशब्दाकारस्यार्थस्य शब्दाकारेण विकल्पनात् (=सविकल्पनात्) सविकल्पकमध्यासः (= मिथ्या) एव, न प्रमाणम्, यतः शब्दस्यार्थान्तरत्वात्तद्रूपा बुद्धिर्मिथ्यैवेति चेत् ? उच्यते – 'न ह्यत्र शब्दाकारेणार्थः प्रतीयते किन्तु पूर्वावगतार्थस्मरणमात्रे शब्दस्य व्यापारः, तेन च स्मृतेनार्थेन तादात्म्येन पुरस्थितार्थविकल्पनात्।' (शा॰ दी॰, पृ॰ ११६) इति। तदुक्तं – 'न शब्दाभेदरूपेण बुद्धिरर्थेषु जायते। प्राक् शब्दाद् यादृशी बुद्धिः शब्दादपि हि तादृशी॥' 'यदा तु यादृशः पिण्डः पूर्वं शब्दात् प्रतीयते। तादृशस्मरणे हेतुः शब्दस्तत्र यथार्थता॥' (श्लो॰ वा॰, पृ॰ १३५, १४४) इति। अतः परमार्थतो नाध्यासो मिथ्यात्वं वा। निर्विकल्पकज्ञानात्परं यदि कश्चित् नेत्रे विस्फार्य 'गौरयम्' इति सविकल्पकज्ञानं जनयति तदा तज्ज्ञानं विकल्पाकारावभासे वैशद्याभावात् प्रत्यक्षज्ञानरूपेण न स्वीकरणीयम्। सविकल्पकापलपिनां मतमिदं मीमांसकेभ्यो न रोचते। ते वदन्ति – विस्फारितनेत्रस्य विकल्पोऽपि गौरयमित्यपरोक्षावभास एव प्रतीयते। यतः सामान्याकारस्याभिलापहेतुभिरवैशद्यमिन्द्रियैश्च वैशद्यमुपपद्यत एव। तथाच निर्विकल्पकज्ञानात्परं यत् संज्ञादिस्मरणपूर्वकं जात्यादिविशिष्टं वस्तुविषयकं ज्ञानमिन्द्रियद्वारेणोत्पद्यते तत् सविकल्पकमाह। तच्च सव्यापारेन्द्रिजत्वात् साक्षादवभासत्वाद्वा प्रत्यक्षमेव भवति। तद् यथा – (१) सास्नादिमतीयम्, (२) इयं गौः, (३) पीतवर्णेयम्, (४) आगच्छतीयम्, (५) कपिला नामास्याः। अतः 'सह विकल्पेन वर्त्तत इति सविकल्पकमि'ति व्युत्पत्तिः। 'सविशेष्यकं सप्रकारकं ससंसर्गकं वा ज्ञानं सविकल्पकम्' (भा॰ चि॰, पृ॰ १७) इति।

वैयाकरणाः सविकल्पकमेव ज्ञानं सर्वं शब्दानुविद्धत्वात्, न निर्विकल्पकं नाम किञ्चिदस्तीति मन्यन्ते। माध्वाचार्यसम्प्रदाया अपि निर्विकल्पकं नाभ्युपयन्ति। किन्तु मतमिदं न युक्तिसहम्, प्रतीतिविरोधात्। यतो वयमिन्द्रियसन्निकर्षानन्तरमविविक्तसामान्यविशेषविभागं सम्मुग्धवस्तुमात्रगोचरं घटत्वनीलपीतादिनानाधर्मविषयकमालोचनज्ञानं प्रतीमः। एतज्ज्ञानाभावे विकल्प एव नोत्पद्येत। तदुक्तं तार्किकैः – 'विशिष्टज्ञानरूपसविकल्पकस्य विशेषणज्ञानं विनोत्पत्त्यसम्भवादनुमानगम्यम्' (भा॰ चि॰, पृ॰ १६ - १७) निर्विकल्पकम्। तथाच निर्विकल्पकमतीन्द्रियमपि प्रत्यक्षमुच्यते, यतो विशेषणज्ञानमन्तरेण विशिष्टज्ञानं न जायते। एतज्जन्मनि प्राथमिकं घट इति प्रत्यक्षं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वादनुमितिवत्। तच्च विशेषणज्ञानं निर्विकल्पकमेव वाच्यम्, तस्य सविकल्पकत्वेऽनवस्थापातात्।

वस्तुतस्तु इन्द्रियार्थसन्निकर्षात् प्रथमं निर्विकल्पकं जायते। सविकल्पकं निर्विकल्पकज्ञानात्परमुत्पद्यते। यथाहि – समुद्रे दूरात् अर्णवपोतस्य नीलवर्णं यत्किञ्चिद् दृश्यते। यावत् तत् नेदयति तावत् कूपकः (= mast) अस्य पोतस्यानुमीयते। ततश्च अर्णवपोतस्य ज्ञानं जायते। एवञ्चेत् सविकल्पकज्ञानं प्रत्यक्षं वक्तुं न शक्यते। यतो ज्ञानमिदं साक्षाद् अपरोक्षं वा न भवति। परन्तु ज्ञानद्वयस्य समूहविधया अनुमितिरुपमितिरिव वा भवति। बेनस्य (Bain's) Deductive Logic-ग्रन्थे एवमेव विचार उपलभ्यते। एतच्चिन्त्यम्।

स्पार्शनादिभेदेन षोढा प्रत्यक्षम्। शालिकनाथमते प्रमेयप्रमातृप्रमितिभेदेन प्रत्यक्षं त्रिविधम्। भेदोऽयं विषयभेदमूलकः। प्रमेयप्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदेन

द्वैविध्यमङ्गीकृतम् । प्रमेयं तावत् द्रव्यं गुणं जातिञ्च स्वीकरोति । प्रमेयेन सह इन्द्रियसन्निकर्षाद् यज्ज्ञानं जायते तत् प्रमेयप्रत्यक्षम् ।

ज्ञानस्वरसादेवार्थस्य तथात्वं निश्चीयते तदन्यथात्वं तु कारणदोषज्ञानादर्थान्यथात्वज्ञानाद्वेति स्पष्टपूर्वम् । अत आत्मेन्द्रियमनोऽर्थसन्निकर्षोऽसत्सु दोषेषु यथार्थज्ञानकारणं सत्सु तु विपरीतज्ञानकारणम् । इदमयथार्थज्ञानं भ्रमोऽख्यातिरध्यासश्चेत्यादिनाम्ना व्यवह्रियते ।'सर्वत्र संसर्गमात्रमसदेवावभासते संसर्गिणस्तु सन्त एव, सेयं विपरीतख्यातिरित्युच्यते मीमांसकैः । असत्ख्यातिवादिनस्तु संसर्गिणोऽप्यपलपन्तीति विशेषः । ' (शा॰ दी॰, पृ॰ १६३) इति । शुक्तिरजतज्ञानेऽसदेव रजतमारोप्यते शुक्ताविति माध्यमिकाः । किन्तु निरुपाख्यानस्यासतोऽपरोक्षाभासविषयता नोपपद्यते । योगाचारैः बुद्धिस्थस्य रजतस्य शुक्तावारोप इति यदुच्यते तन्न संगच्छते, निरधिष्ठानाध्यासस्यानुपपत्तेः । असतोऽप्रतीतिः सतश्च बाधानुपपत्तिरिति शुक्तिरजततादात्म्यमत्र प्रतीयते नच तदन्यत्र, अतोऽनिर्वचनीयमारोप्यत इति वेदान्तिनः । परन्तु इदमंशरजतांशतादात्म्यस्यान्यत्र सद्भावाद्वेदान्तिमतमिदं न समीचीनम् । अख्यातिवादिनः प्राभाकरस्य मते इदं रजतमित्यत्र इदमंशः प्रत्यक्षात्मकं रजतांशश्च स्मरणात्मकमिति यथार्थज्ञानद्वयम् , सादृश्यदर्शनोद्बुद्धसंस्काराद् दोषवशात् प्रमुष्टतत्तांशात् ज्ञानद्वयोर्विवेकस्य (= भेदस्य) अग्रहो भवतीति । परन्तु उक्तज्ञानयोर्यथार्थत्वात् यथार्थायर्थविभागो नोपपद्यते । अयथार्थं ज्ञानं भ्रम इति लौकिकाः प्रतिपद्यन्ते । भाष्यकारोऽपि 'यस्य च दुष्टं करणं यत्र च मिथ्येतिप्रत्ययः स एवासमीचीनः प्रत्ययो नान्यः' (मी. भा.,पृ॰ ९-१०) इत्याह । स्वप्नेऽपि बाह्यविषयो देशकालान्तरगतोऽदृष्टोद्बुद्धसंस्कारवशात् स्मर्यमाणो निद्रादिदूषितमनस्कतया भ्रान्त्या सन्निहितदेशकाल इव मन्यते । एवं द्विचन्द्रबन्ध्यासुतादिग्रहो बोध्यः ।

आदर्शपुस्तके 'तु'स्थाने 'च' दृश्यते ।६ ।

इति साहान्तविश्वरूपेण कृतायां पञ्चिकानाम्न्यां विवृत्यां प्रत्यक्षपरिच्छेदः ॥

(अनुमानपरिच्छेदः)

(अनुमाननिरूपणम्)

अनुमितित्वं जातिविशेषः । तदाश्रयश्चानुमितिरन्वयव्यतिरेकिलिंगादेव जायते, केवलान्वयिनोऽभावात्,प्रमेयत्वादेरपि विशिष्टाभावव्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावयोरभ्युपगमेनात्यन्ताभावाप्रतियोगित्वाभावात् । प्रमेयत्वत्वेनाभावाप्रतियोगित्वमिति

व्याप्तिधीपूर्विकां चास्मिन् सचेतसां मुदेऽनुमाम् ।
सूरिभिः कृतवाग्द्वारे ब्रूवेऽल्पबुद्धिरप्यहम् ॥

अनुमितित्वमित्यादि । अनुमितित्वजातिमती अनुमितिः । अनुमितित्वजातिरियं सर्वेषामनुभवसिद्धा । यतोऽहमनुमिनोमि इत्येवमनुभवो जायते । अनुमितेर्लक्षणमुक्तं भाष्यकारैः – 'अनुमानं ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिः ।' (मी॰ भा॰, पृ॰ ११) इति । अनुमानम् = अनुमितिः, अनु पश्चात् प्रत्यक्षज्ञानानन्तरं मीयते इति भावे ल्युट्स्वीकरणात् । अनु प्रत्यक्षज्ञानानन्तरं मीयते ज्ञायतेऽनेनेति करणल्युटा अनुमानशब्दो निष्पद्यते, तेन चास्यानुमितिकरणत्वं सूचितं भवति । ज्ञातो विदितः सम्बन्धः संयोगः समवायः एकार्थसमवायः कार्यकारणभावोऽन्यो वा व्याप्तिलक्षणो व्याप्यव्यापकयोर्दृष्टान्तधर्मिणि येन प्रमात्रा स ज्ञातसम्बन्धः तस्य सम्बन्धिनः एकदेशस्य व्याप्यस्य धूमादेलिङ्गस्य दर्शनात् ज्ञानात् एकदेशान्तरे अन्यैकदेशरूपे व्यापकवह्न्यादौ साध्ये असन्निकृष्टे चक्षुराद्यसम्प्रयोगेऽर्थे विषये या बुद्धिर्ज्ञानं साऽनुमानम् अनुमितिः, यत एतादशं ज्ञानं जायते तत् अनुमानं नाम प्रमाणम् । शालिकनाथोऽप्येतस्य किञ्चित् परिवर्त्तनं कृत्वा प्राह – ' ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात् । एकदेशान्तरे बुद्धिरनुमानमबाधिते ॥' (प्र॰ पं॰, पृ॰ १०५) इति । नारायणभट्टोऽप्याह – 'व्याप्यदर्शनादसन्निकृष्टार्थज्ञानमनुमानमिति (मान॰ पृ॰ २७) । तथाच – पाकशालादौ व्याप्यधूमस्य व्यापकवह्नेश्चान्तः स्वाभाविकनियतसम्बन्धमाकलय्य व्याप्यधूमञ्च पर्वते पश्यन् अर्थात् व्याप्यस्य व्याप्तिः पक्षधर्मता चैतज्ज्ञानद्वयेन अनक्षगोचरस्य वह्न्यादेर्व्यापकस्य यत् परोक्षज्ञानं जायते साऽनुमितिरित्युच्यते । गागाभट्टो व्याचष्टे – 'सामान्यरूपेण ज्ञातव्याप्तिकस्य व्यक्तिविशेषदर्शनजन्यं सन्दिग्धसाध्यवदधिकरणकमसन्निकृष्टसाध्यविषयकं निश्चयरूपं ज्ञानमनुमितिरित्यर्थः ।' (भा॰ चि॰, पृ॰ २३) इति । एतच्च व्याप्तिप्रकारकपक्षधर्मताशालिज्ञानजन्यज्ञानमनुमानमिति नव्यन्यायमतेन संवदति । **जातिविशेषः** इति कथनेन अनुमितेरुपाधिनिरासः । उपाधिरयमग्रे वक्ष्यते ।

मीमांसकमते व्याप्तिज्ञानमनुमितौ करणम्, पक्षता पक्षधर्मताज्ञानमित्यादिकं कारणकूटः । व्यापारवत् कारणं करणमिति मीमांसका नाभ्युपगच्छन्ति, परन्तु असाधारणं कारणं करणमिति तेषामुद्घोषः । अतो नव्यनैयायिकानां व्यापरतया विशिष्टवैशिष्ट्यावगाहिज्ञानरूपपरामर्शस्वीकारेऽपि गागाभट्टवर्जं सर्वैर्मीमांसकैः सोऽयं परामर्शो नांगीक्रियते-परन्तु निराक्रियते, तच्च प्रदर्शितपूर्वम् । अथवा भाट्टमते व्याप्तिज्ञानं पक्षधर्मताज्ञानञ्चानुमितौ द्वे कारणे, विशिष्टवैशिष्ट्यावगाहिज्ञानं यथासम्भवं कारणं मन्यते । प्राभाकरमते तु विशिष्टवैशिष्ट्याविगाहि ज्ञानं नानुमितौ कारणम्, व्याप्तिज्ञानपक्षधर्मताज्ञानाभ्यामेवानुमितिर्जायते । एवञ्च प्राभाकरैः

चेत् , तर्हि घटादिरपि केवलान्वयी स्यात् , प्रमेयत्वेन तस्याप्यभावाप्रतियोगित्वात् । 4
एतेन रूपेण तथात्वमिष्टमेव । १ ।

अन्वयदृष्टान्त एक एव, न तु व्यतिरेकदृष्टान्तः स्वीक्रियते । भाट्टैस्तु नैयायिकवत् अन्वयदृष्टान्तव्यतिरेकदृष्टान्तद्वयमंगीकृतम् । नैयायिकैर्दृष्टान्तद्वयमाधारीकृत्य अन्वयव्यतिरेकाभ्यां व्याप्तेर्द्वैविध्यं प्रसाधितम्, अनुमानस्य चान्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिभिस्त्रैविध्यमभ्युपगम्यते । मानमेयोदयकृद्भिन्नैर्मीमांसकैस्तु तथा वैदान्तिभिरनुमानमन्वयिरूपमेकमेव स्वीक्रियते । एतदेव संसाधयितुं स्वपक्षं मण्डयितुं परपक्षञ्च दूषयितुमाशंकामुत्थापयति **तदाश्रयश्चानुमितिरि**त्यादिग्रन्थेन । तथाच अन्वयव्यतिरेकिलिंगादेव अनुमितिरुत्पद्यते इति पूर्वपक्षिभिराशङ्क्यते । तेषामयमाशयः – न केवलान्वयिलिंगादेव न वा केवलव्यतिरेकिलिंगादेवानुमितिर्भवितुं क्षमा । यदि केवलान्वयिलिंगादेवानुमितिर्जायते तदा केवलव्यतिरेकिलिंगादेवानुमितिर्भवेत् । तथा सति मीमांसकमते अर्थापत्तेः प्रमाणान्तरत्वं स्वीकर्त्तुं नार्हेतेति ।

प्रमेयत्वादेरपि इत्यादि । इदं वाच्यं प्रमेयत्वादित्यादिकेवलान्वयि अनुमानं मीमांसकैर्नाङ्गीक्रियते । १ ।

अनुमितेः करणमनुमानमिति स्पष्टम् । अनुमानमिदं ज्ञानविशेषः, न तु ज्ञायमानो हेतुः । ज्ञायमानलिंगस्य कारणत्वेऽनुमितेः पूर्वक्षणे तेन ज्ञायमानलिंगेन कारणत्वाभावात् करणत्वमपि न निर्वहेत् । एवञ्च हेतोर्वर्त्तमानस्थले त्वनुमितेः पूर्वक्षणे तादृशहेतोर्वर्त्तमानत्वेन सद्भावेऽपि विनष्टहेतुविशेषस्य भविष्यहेतुविशेषस्य वा तन्न स्यात् । तथा सति विनष्टहेतुना पर्वतोऽयम् अतीतवह्निमान् अतीतधूमादित्यतीतधूमलिंगकानुमितिर्न सम्भवति । यतोऽतीतधूमस्य वर्त्तमानानुमितेः पूर्वं सद्भावाभावात् अनुमितिर्भवितुं नार्हति । एवं भविष्यधूमलिंगेनापि भविष्यवह्निविषयिका अयं भविष्यवह्निमान् इत्यनुमितिर्न स्यात् । यतो भविष्यधूमस्य एतत्कालेऽसत्त्वात् वर्त्तमानानुमितेः पूर्वक्षणे (= वर्त्तमानानुमितेः पूर्वं) तस्य सद्भावासम्भवेन अतीतधूमस्य भविष्यधूमस्य वानुमितिं प्रति करणत्वमसम्भवम् । अतएव ज्ञायमानलिङ्गस्य करणत्वं न समीचीनमिति गागाभट्टस्य 'अनुमानं ••• न तु ज्ञायमानो हेतुरि'ति (भा॰ चि॰, पृ॰ २४) ग्रन्थस्याशयः स्फुटीकृतः । एवं मीमांसकमते परामर्शानङ्गीकारपक्षे तृतीयलिङ्गपरामर्शोऽनुमितेः करणं न भवति ।

प्रागुक्तमनुमानं नाम व्याप्यदर्शनादसन्निकृष्टार्थज्ञानम् , सन्निकृष्टः=सम्बन्धविशेषयुक्तः इति । स सम्बन्धो भाट्टमते व्याप्तिः प्राभाकरमते च निरुपाधिकसम्बन्धो व्याप्तिरिति । मीमांसासूत्रे व्याप्तिनिरूपणं स्पष्टतो नोपलभ्यते, भाष्यकारस्य व्याप्तिसिद्धान्तोऽवश्यमवगत आसीत् 'ज्ञातसम्बन्धस्ये'त्युक्तेः । कुमारिलः प्रभाकरश्चैतत्पदेन नियमरूपसाहचर्यसम्बन्धं गृहीतवन्तौ । तथाच हेतुहेतुमतोर्नियमः स एव सम्बन्धो व्याप्तिः । तदुक्तं श्लोकवार्त्तिके – **'सम्बन्धो व्याप्तिष्टात्र** लिङ्गधर्मस्य लिङ्गिना ।' इति । अस्यार्थः साध्यसाधनयोः (= हेतुमद्धेत्वोः) स्वाभाविकः सम्बन्धो व्याप्तिः ।

व्यतिरेकता तु घटत्वादिनेति चेत् ? अस्त्वेवम् । किन्तु सर्वमेव तर्हि अन्वयव्यतिरेकीत्यस्मन्मताविशेषः । किञ्च तथापि तदनुमितिर्न सम्भवति, कारणा-

---

उपाधिराहित्यञ्च स्वाभाविकत्वम् । व्याप्तिनियमो नाम प्रतिबन्धो व्यभिचाराभावोऽविनाभावश्च । चिन्नस्वामी – सम्बन्धनियमो व्याप्तिरित्याह । दृश्यमानदेशकालादौ हेतोः साध्येन सहावस्थानदर्शनं नियमशब्देनोच्यते । शालिकनाथमते येन सह यस्याव्याभिचरितो नियतश्च कार्यकारणभावादिसम्बन्धो भवति स सद्धेतुर्भवितुमर्हति, एतादृशः नियतोऽव्यभिचरितश्च कार्यकारणभावादिसम्बन्धो व्याप्तिरिति ।

अतोऽनुमानं नाम व्याप्तिज्ञानम्, अनुमानञ्चानुमितेः करणमिति सिध्यति । व्याप्यदर्शनादसन्निकृष्टव्यापकस्य ज्ञानमनुमितिः । व्याप्यं, व्याप्तम् = व्याप्तिविशिष्टं वस्तु । व्याप्यं न्यूनदेशवृत्ति व्यापकं चाधिकदेशवृत्ति भवतीति ध्येयम् । व्याप्तिश्च हेतोः साध्येन सहाव्यभिचारवृत्तिः । अव्यभिचारवृत्तित्वं नाम साध्यवदन्यावृत्तित्वम् । साध्यवदन्यनिरूपितवृत्तित्वसामान्याभावो व्याप्तिरित्यर्थः । स यत्र वर्त्तते तादृशहेतुरेव व्याप्यतयाभिधीयते । तथाहि पर्वतो वह्निमान् धूमादित्यत्र साध्यवह्निमन्तः पञ्च पक्षाः पर्वत-गोष्ठ-चत्वर-महानसा-योगोलकभेदात् । साध्यवदन्यस्तु जलह्रदादिः तन्निरूपितवृत्तित्वं मीनशैवालादौ, वृत्तित्वसामान्याभावो धूमे । अतः पर्वतो वह्निमान् धूमादिति स्थले व्याप्तिलक्षणस्य सङ्गतिः । एवं धूमवान् वह्नेरित्यत्रापि व्याप्तिलक्षणस्यातिव्याप्तिर्नास्ति । तथाच धूमरूपसाध्यवन्तश्चत्वारः पर्वतगोष्ठचत्वरमहानसभेदात् । साध्यवदन्यस्तु तप्तायोगोलकम्, तत्र धूमो नास्ति किन्तु तत्र तप्तायोगोलके वह्नेः सत्त्वात्साध्यवदन्यायोगोलकनिरूपितवृत्तित्वसामान्याभावो वह्नौ नास्तीत्यतो लक्षणस्यातिव्याप्तिर्न भवति । एवम् अव्यभिचारशब्दप्रतिपाद्यस्य व्याप्तिज्ञानस्य इदं वाच्यं प्रमेयत्वादित्यादौ केवलान्वयिहेतावसम्भवात् न्यायमते व्याप्तिलक्षणमिदमसङ्गतमपि मीमांसकमते सङ्गतम् । मीमांसकैरुक्तम् 'केवलान्वयिव्यतिरेकिहेत्वोः पञ्चरूपोपपन्नत्वाभावेनानुमापकत्वाभावात् । एवं च केवलान्वयिव्यतिरेक्यनुमानमेव नेति (भा॰ चि॰, पृ॰ २४) । अथवा प्रतियोग्यसमानाधिकरणो यो हेतुस्तदधिकरणनिष्ठात्यन्ताभावप्रतियोगितानच्छेदको यो धर्मस्तद्धर्माच्छिन्नेन सह तस्य हेतोः सामानाधिकरण्यमिति नव्यन्यायमतानुसारेण मीमांसकानामपीष्टमेव व्याप्तिलक्षणम् । प्रतियोग्यसमानाधिकरणेति पदानुपादाने कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्यवृत्तिसाध्यकस्थले हेत्वधिकरणे एतद्वृक्षे कपिसंयोगाभावमादाय अव्याप्तिः स्यात् । हेतुसमानाधिकरणेत्यत्र हेतुतावच्छेदकावच्छिन्नसमानाधिकरणेत्यर्थः । तेन इदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ विशिष्टस्य केवलानतिरिक्ततया विशिष्टसत्ताधिकरणे गुणादौ द्रव्यत्वाभावमादाय अव्याप्तिः स्यात् । यथाश्रुतलक्षणे बह्निमान् धूमादित्यादौ हेत्वधिकरणे पर्वतादौ तत्तद्वह्न्यभावग्रहणे सर्वेषामेव वह्नीनां हेतुसमानाधिकरणाभावप्रतियोगित्वादव्याप्तिः स्यात् । अतः साध्ये प्रतियोगिभेदमनिवेश्य साध्यतावच्छेदके प्रतियोगितावच्छेदकभेदो

भावात् । साध्यसाधनयोः सहचारदर्शनं व्यभिचारादर्शनं च तत्कारणम् । न च केलान्वयिनि व्यभिचारसम्भवः , व्यभिचारस्यासत्त्वे तज्ज्ञानं सम्भवति दोषादिति चेत् ? तर्हि व्यतिरेकित्वेन ज्ञानदशायामेवानुमितिसामग्रीत्युक्तम् । तथाच साधु समर्थितं केवलान्वयित्वम् । २ ।

यत्र व्यभिचारधीः प्रसिद्धा तत्र तदभावः कारणम् , नान्यत्रेति चेत् ? न, प्रमेय - त्वानुमितौ व्यभिचारज्ञानाभावः तत्कालीनं सहचारज्ञानं वा कारणं लाघवादित्ये-

---

निवेशितः । वह्निमान् धूमादित्यादौ प्रतियोग्यसमानाधिकरणो यो हेतुः अर्थात् धूमः तदधिकरण-निष्ठो घटाद्यत्यन्ताभावः, तादृशाभावप्रतियोगितावच्छेदकं घटत्वादिकम् , तद्भेदस्य साध्यता-वच्छेदके वह्नित्वे सत्त्वात् वह्नित्वावच्छिन्नसामानाधिकरण्यस्य धूमे सत्त्वाच्च लक्षणस-मन्वयः । धूमवान् वह्नेरित्यादावसद्धेतुस्थले हेतुः वह्निस्तदधिकरणीभूतेऽयोगोलके धूमाभावस्य सत्त्वात् तत्प्रतियोगितावच्छेदकं धूमत्वं साध्यतावच्छेदकमपि धूमत्वम्, अतः साध्यतावच्छेदके प्रतियोगितावच्छेदकभेदस्यासत्त्वान्नातिव्याप्तिः । व्याप्तिरियमनुमानाङ्गम् । सा समव्याप्तिर्विष-मव्याप्तिभेदेन द्विधा । व्याप्यव्यापकयोः परस्परं व्याप्तेः समव्याप्तिः, यथा शब्दोऽनित्यः कृतकत्वादित्यादौ कृतकत्वानित्यत्वयोः । वह्निधूमयोरन्योन्यव्याप्त्यभावाद्विषमव्याप्तिः, वह्ने-र्निर्धूमे तप्तायोगोलके सत्त्वात् । तथाच साध्यसाधनयोः परस्परं व्याप्त्यभावाद्वि-षमव्याप्तिर्भवति । आचार्या व्यापकसम्बन्धमात्रं व्याप्तिं मन्यन्ते, न तु व्यापकसामानाधिक-रण्यमिति । तेन चाधश्छायादेरुपरि आदित्ये कृत्तिकोदयस्य च रोहिण्युदयेऽनुमानमुपपद्यते । व्याप्तिरियं द्विधावधार्यते अन्वयदृष्टान्तमुखेन व्यतिरेकदृष्टान्तमुखेन च । यत्र धूमस्तत्र वह्निः यथा महानस इत्याद्यः, महानसे धूमवह्न्योरन्वयसद्भावदर्शनात् । एवञ्च यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यतिरेकेण दृष्टान्तेन, महाह्रदे वह्निधूमयोर्व्यतिरेकेण सद्भावदर्शनात् ।२ ।

नैयायिकका व्याप्तिग्रहे सहचारज्ञानं (=साहित्यज्ञानम्) व्यभिचाराज्ञानञ्च कारणं स्वीकुर्वन्ति । रघुनाथस्तु लाघवात् व्यभिचाराज्ञानं तत्कालीनं सहचारज्ञानं वा कारणमभ्युगम-नीयमित्याह । अत्राशंक्यते **यदि सहचारज्ञानमात्रं** व्याप्तिज्ञाने कारणमुच्यते तर्हि **भूयोदर्शनगम्या च व्याप्तिरित्यादि** आचार्यवचनं रिक्तं स्यात् । उत्तरयति - **मैवमिति** । तथाच भूयोदर्शनं न व्याप्तिग्रहे कारणं, व्यभिचारास्फूर्त्तौ सकृद्दर्शनेनापि व्याप्तिग्रहात् । एवं चेत् कथं तर्हि आचार्याः व्याप्तिं भूयोदर्शनगम्यामाहुरित्याक्षेपे द्वित्रेषु स्थलेषु तादृश्या व्याप्तेर्ज्ञान-मेवानुमानस्याङ्गमित्याशय आचार्याणामिति प्रमाणत्वेनात्र श्लोकद्वयमुद्धृतम् ।अत्रेदं स्मर्त्तव्यम् - चार्वाका ह्येवमाशङ्कन्ते - प्रत्यक्षातिरिक्तं प्रमाणं नास्ति । व्याप्तिप्रकारकपक्षधर्मताशालि-ज्ञानजन्यज्ञानं लिङ्गपरामर्शो वानुमानमभ्युपगतमनुमानप्रामाण्यवादिभिः । व्याप्तिश्च सन्दिग्धो-पाधिनिश्चितोपाधिरहितः सम्बन्धः । स च सम्बन्धो न सत्तया कारणं, किन्तु ज्ञाततया । परन्तु नाप्यान्तरं प्रत्यक्षं व्याप्तिज्ञानजनकम् । अन्तःकरणस्य बाह्येऽर्थे बहिरिन्द्रियाधीनत्वात्

वंकल्पनात् । यदि सहचारज्ञानमात्रं कारणं तर्हि किमिदमाहुः –

'सम्बन्धो व्याप्तिरिष्टात्र लिङ्गधर्मस्य लिङ्गिना ।
व्याप्यस्य गमकत्वं च व्यापकं गम्यमिष्यते ॥
यो यस्य देशकालाभ्यां समो न्यूनोऽपि वा भवेत् ।
स व्याप्यो व्यापकस्तस्य समो वाभ्यधिकोऽपि वा ॥'

(श्लो॰ वा॰, पृ॰ २४८)

तथा –

'भूयोदर्शनगम्या च व्याप्तिः सामान्यधर्मयोः ।
गृह्यते भेदहानेन क्वचिच्चापि विशेषयोः ॥' (श्लो॰ वा॰, पृ॰ २४९)

इति व्याप्तिस्वरूपे तज्ज्ञानोपायञ्च व्यर्थमेवाचार्याः ? मैवं,तादृश्या एव व्याप्तेर्द्वित्रेषु

स्वातन्त्र्येण प्रवृत्त्यनुपपत्तेः । अपिच वर्त्तमानज्ञानविषयजनकत्वेनापि भूतभविष्यतोस्तदसम्भवेन सर्वोपसंहारवत्तया व्याप्तेर्दुर्ज्ञेयत्वादित्यतो व्याप्तिज्ञानोपायो न सम्भवति । न च सामान्यविषयकं व्याप्तिज्ञानं सम्भवेदिति वाच्यम्, विशेषवह्निधूमयोर्व्याप्त्यभावप्रसंगात् । नाप्यनुमानं व्याप्तिज्ञानोपायः । तत्राप्यनुमाने उपाधिद्वयरहितसम्बन्धज्ञानार्थं तत्र तत्रानवस्थाप्रसंगात् । नापि शब्दस्तदुपायो वैशेषिकमते शब्दस्य प्राभाकरमते च लौकिकशब्दस्यानुमानेऽन्तर्भावात् । तस्माद् व्याप्तिज्ञानोपायस्याभावात् नानुमानं प्रमाणम् । एतन्मतं निराकर्तुं बौद्धैरुच्यते – 'तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य (= व्याप्तेः) सुज्ञानत्वात् ।' (स॰ द॰ सं॰, पृ॰ १६) इति । तथाहि –

'कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥' (प्र॰ वा॰, पृ॰ २६९) इति ।

तथाच बौद्धमते कार्यकारणभावात् स्वभावाद्वा व्याप्तिनिश्चयः सम्भवति । कार्यकारणभावाद् यथा – धूमकार्ये वह्निरूपकारणस्य व्याप्तिनिर्णयो भवति । वह्निनिरूपिता धूमनिष्ठा व्याप्तिर्धूमवह्न्योः कार्यकारणभावात् निश्चीयते । एवं स्वभावादपि व्याप्तिनिश्चयः । स्वभावः खलु तादात्म्यम् । तच्च शिंशापात्वम् । शिंशापात्वे वृक्षत्वस्य व्याप्तिरस्त्येव । यतः शिंशपात्वरूपशिंशपा वृक्षस्वभावा भवति । एतेन शिंशापात्वेन अयं वृक्षः इत्यनुमितिर्भवति । न चात्र व्यभिचारशंका दुर्वारेति वाच्यम् । विनापि कारणं कार्यमुत्पाद्यतामित्येवंविधायाः शंकाया व्याघातेन निवारणात् । तदुक्तमुदयनाचार्यैः 'व्याघातावधिराशंका' (न्या॰ कु॰ ३/७, पृ॰ १११) इति । तथाच कारणेन विना कार्यमुत्पाद्यतामिति शंकायां व्याघातः स्यात् । व्याघातो नाम स्वक्रियाविरोधः । कारणाभावेऽपि कार्योत्पत्तौ लोकानां धूमार्थं गोष्ठे वह्निप्रज्वनक्रियाया व्याघातः स्यात् । अतो व्याघातेन एतादृशी शंका नोदेति । ततश्च कार्येण कारणस्यानुमानं भवति । तस्मात् तदुत्पत्तिनिश्चयेन व्याप्तिर्निश्चीयते । तदुत्पत्तिश्च पञ्चकारण्या ज्ञायते ।

एवञ्च तादात्म्यनिश्चयेनापि व्याप्तिर्निश्चीयते । यदि शिंशपा वृक्षत्वमतिपतेत् तर्हि स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तिः । अप्रवृत्ते तु बाधके भूयःसहभावोपलम्भेऽपि व्यभिचारशंकाया अनिवारणप्रसंगात् । वृक्षशिंशप्योश्च तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति

ज्ञानमेवानुमानाङ्गमित्याशयस्तेषाम् । यदाहुः – 6

'दुर्लभं सहचरित्वं सर्वत्रेति यदुच्यते ।
दृष्टं न नाम सर्वत्र द्वित्राणां दृश्यते ध्रुवम् ॥' (न्या॰ मा॰)
'साहित्ये मितदेशत्वात् प्रसिद्धे वह्निधूमयोः ।
व्यतिरेकस्य चादृष्टेर्गमकत्वं प्रकल्प्यते ॥' (श्लो॰वा॰, पृ॰ ३२७)

इत्ययमर्थः । यदि सर्वदेशकालरूपस्य नियमस्य ज्ञानमनुमानाङ्गमस्माभिरुच्यते, तदा स्यादयमुपालम्भः ।३।

नन्वेवं किन्तु यत्र यत्र धूमादि दृष्टं तत्र तत्र सर्वत्राग्न्यादिसाहित्यम् अनग्नौ चादर्शनमेतावतैव लौकिकानामनुमानादयः । दृश्यमानेषु देशकालेषु लिङ्गस्य लिङ्गिसाहित्यनियमज्ञानमेव भूयोदर्शनाद् भवतीति तात्पर्यम् । यच्च यो यो धूमवान् स वह्निमानिति सामान्यतो व्याप्तिज्ञानं तद्धूमवन्तं पक्षयित्वा धूमेन लिंगेनानुमितिरूपमेवं न तु तदनुमानाङ्गं, धूमवत्त्वेन रूपेण पर्वतेऽपि वह्नेर्भानात् । तदाहुः –

'ताद्रूप्येण परिच्छिन्ने तद्विपर्ययतोऽपि वा ।
भूयस्तस्मिन् प्रमेये हि न प्रमाणं प्रवर्त्तते ॥' (श्लो • वा॰, पृ॰ २५८)

सामानाधिकरण्यादुपपद्यते । न ह्यत्यन्ताभेदे युगपत्प्रयोगायोगात् – न चात्यन्तभेदे सामानाधिकरण्यं सम्भवति, गवाश्वयोः सामानाधिकारण्यानुपलब्धेः । तस्मात् कार्यं कारणमनुमापयति, स्वभावश्चात्मानमनुमापयति । एवं नियमाद् व्याप्तिनिश्चयो भवतीति बौद्धा आमनन्ति ।

किन्तु येषां नैयायिकादीनां मते अन्वयव्यतिरेकौ व्याप्तिनिश्चायकौ तेषां मते एव व्याप्तिनिश्चयो दुरवधारणः । साध्यसाधनयोरव्यभिचारस्य दुर्ज्ञेयत्वात् । तथाच – अन्वयव्यतिरेकौ हि वर्त्तमाना सन्निहता च धूमवह्निव्यक्त्योर्या तद्विषयौ एव सम्भवतः, न तु भूतभविष्यद्विषयौ । भूतवस्तुसम्बन्धेन भविष्यद्वस्तुसम्बन्धेन असन्निहितवस्तुसम्बन्धेन च वह्निसत्त्वे धूमसत्त्वम्, वह्न्यभावे धूमाभावः इत्येवं निश्चयो न सम्भवति । कदाचित् वह्निं विनापि धूमः स्यादिति व्यभिचारशंकाया दुर्वारात् । तस्मात् कार्यकारणभावात् स्वभावाद्वा व्याप्तिनिश्चयो भवतीति सिद्धम् । मीमांसकादयस्तु बौद्धमतं न बहुमन्यन्ते । तेषां मते अन्वयेन अन्वयव्यतिरेकाभ्यां वा धूमवह्न्योः सहभावो निश्चीयते । सहभावोऽयमुपाधिरहितो नियतश्च व्याप्तिशब्देन निगद्यते । व्याप्तिनिश्चयेन अनुमानं सम्भवतीति प्रथमकारिका चार्वाकादिमतं वितनोति अपरा च मीमांसकादिमतं साधयति । द्वितीयश्लोकस्य द्वितीयचरणस्य पाठ आदर्शपुस्तके 'प्रसिद्धे चाग्निधूमयोः' इत्युपलभ्यते । ३ ।

ताद्रूप्येणेति श्लोक आदर्शपुस्तके एवमस्ति -
' ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि च ।
प्रमितस्य प्रमाणे हि नापेक्षा जायते पुनः ॥' इति ।

येन रूपेणानुमातुमिष्यते तेनैव रूपेण रूपान्तरेण वा तद्विपरीतेन शीघ्रप्रवृत्तप्रमाणेन ज्ञातो यो धर्मी स सन्निकृष्टः स न पक्षो भवितुमर्हतीत्यभिप्रेत्य भाष्यकारेण ' असन्निकृष्टे ' इत्युक्तम् ।

'एकत्र तदनुत्पत्तिरितरत्राप्रमाणता ।' इति । ४ ।

तत् किं सिद्धेः प्रतिबन्धकत्वमनुमितौ ? नैवम्, किन्तु जायमानं तज्ज्ञानं न प्रमा गृहीतग्राहित्वात् किन्त्वनुवादः । तत् सिद्धं केवलान्वयिनानुमानम् । ५ ।

नापि व्यतिरेकि तथा व्याप्तिपक्षधर्मताज्ञानाजन्यत्वात् । तत्र हि व्यतिरेके व्याप्तिरन्वयस्य पक्षधर्मता । न च साध्याभावव्यापकाभावप्रतियोगिज्ञानमपि अनुमितिकारणमित्यत्र मानमस्ति, व्यतिरेकिण्यनुमितित्वासिद्धेः । यत्रेतरभेदाभावस्तत्र पृथिवीत्वाभाव इति ज्ञानोत्तरं ज्ञायमानस्येयमितरभिन्नेति ज्ञानस्य कुत्रान्तर्भाव इति चेत् ? अर्थापत्तावेव । तथाहि – पृथिवीत्वाकारानुगतमतिविषयो धर्मोऽस्ति । नासौ गन्धवती जलाद्यभेदे उपपद्यते, जलादौ पृथिवीत्वस्यासत्त्वात् । तस्मात् जलादितादात्म्याभाव एवास्योपपादक इति ज्ञानानन्तरं यद्गन्धवति पृथिवीत्वं ज्ञातं तस्य यदुपपादकं सिद्ध्यति स एव जलादिभेदः । ६ ।

नन्वेवं धूमो वह्निं विना नोपपद्यत इति ज्ञानानन्तरं जायमानं वह्निज्ञानमर्थापत्तिरेव स्यादिति चेत् ? भवत्येव । न चैवमनुमित्युच्छेदः । यदा धूमस्य

प्रमितस्य प्रमाणेण ज्ञातस्य पुनः प्रमाणापेक्षा न विद्यते, द्वेधापि प्रमिते प्रमाणापेक्षा नास्तीति भावः ।४ ।

पक्षधर्मतेति । पक्षे वर्त्तमानता नाम पक्षधर्मता, यथा पर्वतो वह्निमान् धूमादित्यत्र धूमहेतौ पक्षधर्मतास्ति, यतो धूमः पर्वतरूपपक्षे वर्त्तते । उक्तं प्राक् पक्षता पक्षधर्मताज्ञानञ्च कारणमनुमितौ । पक्षतावान् पक्षः, पक्षता संक्षेपेण पक्षस्य धर्म उच्यते । यदि च पक्षधर्मता पक्षतेत्युच्यते तदा पक्षे धर्मत्वं यस्याः, पक्षस्य धर्मत्वं धर्मविशेषो वेति व्युत्पत्तिः स्यात् । पक्षधर्मताज्ञानं पक्षे यो धर्मो धूमादिः तत्सम्बन्धज्ञानमित्यर्थः । अनुमित्साविरहविशिष्टसिद्ध्यभावः पक्षता । अयम्भावः – यत्रानुमित्सास्ति सिद्धिरपि अस्ति तत्रानुमित्साविरहरूपस्य विशेषणस्याभावात् विशिष्टाभावो विद्यत इति तत्रानुमितिर्भवति, यत्र चानुमित्सा नास्ति सिद्धिरपि नास्ति तत्र विशेष्यभूतायाः सिद्धेरभावात् विशिष्टाभावो विद्यत इति तत्रानुमितिर्भवति, यत्र चानुमित्सास्ति सिद्धिर्नास्ति तत्र विशेषणविशेष्ययोरुभवयोरभावात् विशिष्टाभावो विद्यत इति तत्रापि अनुमितिर्भवति, यत्र तु अनुमित्सा नास्ति सिद्धिश्चास्ति तत्रानुमितिर्न भवतीति । सिद्धिः = साधकमानं, साध्यवत्तानिश्चयः । सा चानुमितेः प्रतिबन्धिका भवति । भाट्टमतेऽपि प्रतिबन्धकाभावस्य कार्यमात्रं प्रति कारणत्वाभ्युपगमात् सिद्ध्यभावस्य प्रतिबन्धकाभावविधया कारणत्वमङ्गीक्रियते । अत्रेदं बोद्धव्यम् – यादृशानुमित्सासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिस्तादृशानुमित्साविरहविशिष्टसिद्ध्यभावः एव तल्लिङ्गकानुमितौ पक्षता । तेन प्रत्यक्षभिन्नं वह्निज्ञानं जायताम् अथवा आलोकेन वह्निज्ञानं जायतामित्याकारकानुमित्सासत्त्वे पर्वतो वह्निमान् इत्यत्रालोकलिङ्गकानुमितिर्भवति । असत्यां सिद्धौ सत्यां वाऽसत्यां यथाविवक्षमनुमित्सायामुभयासत्त्वे वाऽनुमित्साविरहविशिष्टायाः सिद्धेरभावः पक्षता (= पक्षधर्मता) । एवञ्च पक्षतानिर्देशेन तादृश्याः पक्षताया आश्रयीभूतो यः पक्षः तद्वृत्तित्वेन हेतोर्ज्ञानात् अनुमितिर्भवति । अनुमितिं प्रति व्याप्तेः पक्षधर्मतायाश्च ज्ञानं कारणम् । पक्षधर्मता नाम पक्षे हेतोर्वृत्तित्वमिति फलितार्थः । तथाच वह्निमान् पर्वतो धूमादिति धूमस्य हेतोः पक्षवृत्तित्वज्ञानमन्तरा केवलव्याप्तिज्ञानेन अनुमितिर्न सिध्यतीति ।६।

वह्निसाहित्यमेवोपलब्धवतो विनाप्यनुपपत्तिप्रतिसन्धानं वह्निज्ञानं तस्य तदन्तर्भावानुपपत्तेः । येषां तु कार्यकारणभावग्रहाधीनव्याप्तिज्ञानादेवानुमितिस्तेषामेवायं दोषः स्यात् । न च धूमसामान्ये व्याप्तिज्ञानं सम्भवति, विनापि वह्निं कश्चिद् धूमो भावीति शङ्कासम्भवात् । अयं धूमोऽनेन वह्निना विना वेति शंकाया अनुदये जायमानमेतद् धूमज्ञानं लाघवाद्धूमत्वावच्छेदेन व्याप्तिं परिच्छिनत्तीति चेत् ? स्यादेवम् , यदि प्रमाणानां लध्वर्थपरिच्छेदकता प्रामणिकी स्यात् । न चैवम् , एतस्या अपि नियमविशेषात्मकत्वादयं धूमोऽनेन वह्निना विना नेत्येव कुतो निर्णयः ? कदाचिदनेन

येन पुरुषेण महानसादौ धूमे वह्निसाहित्यरूपव्याप्तिर्ज्ञाता पश्चात् स एव पुरुषः क्वचित् पर्वतादावविच्छन्नमूलां धूमरेखां पश्यन् पक्षधर्मतामवगच्छन् च धूमो वह्निव्याप्य इत्येवं व्याप्तिं स्मरति, ततः पर्वतो वह्निमान् धूमादित्यनुमिनोति । किन्तु वह्निमन्तरेण धूमो नोपपद्यत इति ज्ञानात् पश्चात् जायमानं पर्वतादावपि वह्निज्ञानमर्थापत्तिप्रमाणस्यैव विषयो भवति, प्रमाणान्तरेण प्रमितस्यार्थस्योपपादकार्थान्तरकल्पनस्यार्थापत्तिस्वीकारात् । तथाच कस्यचित् प्रत्यक्षेण शब्देन वा प्रमितो धूमो वह्निं विना न विद्यत इति । एवञ्च वह्निना विना धूमस्य सत्त्वमनुपपन्नं सत् तदन्याथा अनुपपत्त्या तस्य धूमस्य वह्निसाहित्यं कल्प्यते । येन विना यत् अनुपपन्नं तत् तस्योपपादकम् , यथा वह्निना विना धूमसत्त्वमनुपपन्नमिति वह्निरत्रोपपादकम्, वह्निज्ञानमर्थान्तरकल्पनाविधयार्थापत्तिप्रमेति भावः । यदा अनुपलब्धिप्रतिसन्धानं भवति तदा धूमस्य वह्निसाहित्यमुपलब्धवतः पुरुषस्य वह्निज्ञानमर्थापत्तिप्रमाणस्य विषयो भवति, यदा तु अनुपलब्धिप्रतिसन्धानं न भवति तदा धूमस्य वह्निसाहित्यमुपलब्धवतो जनस्य वह्निज्ञानमनुमानप्रमाणस्य विषयो भवतीति विवेकः । ७ ।

प्रागुक्तं भूयोदर्शनं व्याप्तिग्रहे न कारणमिति । किन्तु तर्को यथा क्वचिद् व्यभिचारशंकां निवर्त्तयति तथा भूयोदर्शनमपि क्वचिद् व्यभिचारशंकानिवर्त्तकम् । अतो भूयोदर्शनस्य तर्कवत् व्यभिचारशंकानिवर्त्तकत्वेन व्याप्तिग्रहे उपयोगः । 'व्याप्यारोपेण व्यापकारोपद्वारानिष्टप्रसञ्जनं तर्कः ' (भा॰ चि॰, पृ॰ २७) । (१) व्याप्तिः , (२) तर्काप्रतिहतिः , (३) विपर्ययपर्यवसनम्, (४) अनिष्टत्वम् (५) अननुकूलत्वञ्चेति तर्कस्य पञ्चाङ्गानि । अङ्गवैकल्ये तर्काभासत्वम् । किञ्च आभासत्वे वैशुद्धाभावात् तर्कः प्रमाणसामर्थ्यं न जनयति । विशुद्धतर्कादनन्तरं प्रमाणसामर्थ्यात्तत्त्वनिश्चयो जायते । तदुक्तं पक्षिलस्वामिना - 'तर्को न प्रमाणसंगृहीतो न प्रमाणान्तरं प्रमाणानामनुग्राहकस्तत्त्वज्ञानाय कल्पते । ' (न्या॰ भा॰, पृ॰ ५३) इति ।

उक्तम् उपाधिराहित्यं स्वाभाविकत्वम्, स्वाभाविकः सम्बन्धश्च साध्यसाधनयोर्व्याप्तिरिति । उपाधिज्ञानं स्वव्यभिचारेण साधने साध्यव्यभिचारज्ञापनेन व्याप्तिग्रहं प्रतिबध्नाति । यथा - अग्नीषोमीया हिंसा अधर्मजनिका हिंसात्वाद् ब्रह्महत्यावदित्यत्र निषिद्धत्वमुपाधिः । अत्र साध्यम् अधर्मजनकत्वम् हिंसात्वञ्च साधनम् । यत्र यत्र अधर्मजनकत्वं तत्र सर्वत्र निषिद्धत्वम्, किन्तु यत्र यत्र हिंसात्वं तत्र सर्वत्र नाधर्मजनकत्वम्, यथा अग्नीषोमीयहिंसायां

विनापि भविष्यतीति शंकाया अपि सम्भवात्। अधुना उत्पन्नो वह्निना विनाधुनैवेति न शंकाव्याघातात्। कालान्तरे भविष्यतीति च न शंका, उत्पन्नस्य पुनरनुत्पादादिति चेत्? अयमपि नियमविशेष एवेति। ७।

(अनुमानस्य स्मृतित्वनिराकरणम्)

अतएव यो धूमवान् सोऽग्निमानिति व्याप्तिबुद्धौ पर्वते योऽवगतो वह्निः स एवानुमानस्य विषय इति अनुमानस्य गृहीतग्राहित्वेन स्मृतित्वमेव स्यादिति वचनमात्रात् त्रस्यन्तः केचिदनुमानस्य गृहीतमात्रग्राहित्वम्। तथापि प्रत्युत्पन्नलिङ्ग-ज्ञानात्मककारणजन्यत्वेन तस्यानुभवत्वमेव, न तु स्मृतित्वम्, संस्कारमात्रजस्यैव स्मृतित्वात्। न च गृहीतग्राहित्वान्न प्रमा, अनुभवस्यैव प्रमालक्षणत्वादिति वदन्तोऽपि निरस्ताः, दृष्टान्ते ह्येव भूयःसाहित्यदर्शनस्यैवानुमितिविषयत्वात्। यदि च गृहीत-मात्रविषयत्वमनुमितेस्तदा स्मृतित्वं दुर्वारम्, लिङ्गज्ञानं सदृशादर्शनवत् संस्कार-

---

हिंसात्वमस्ति किन्तु अधर्मजनकत्वं नास्ति। अतो निषिद्धत्वं साध्याधर्मजनकस्य व्यापकं सत् साधनहिंसाया अव्यापकम् इति निषिद्धत्वमुमपाधिः। अतएव साध्यस्य व्यापकत्वे सति साधनस्याव्यापकत्वं हेतोरुपाधित्वलक्षणम्। यथा जवाकुसुमं निकटस्थे स्फटिके स्वधर्मलौ-हित्यमादधाति तथा यः उप समीपवर्त्तिनि स्वसमानाधिकरणे स्वधर्मं व्याप्तिमादधाति बोधयतीति उपाधियुक्ता व्याप्तिर्हेतौ स्वाभाविकेन रूपेण न वर्त्तते। तेन च उपाधिज्ञानमनुमितिकरणस्य व्याप्तिज्ञानस्य प्रतिबन्धको भवति।

प्राभाकरमते अनुभूतिरेव प्रमा, भाट्टमते तु अगृहीतग्राह्यबाधितासन्दिग्धार्थबोधः प्रमेति। वह्न्याद्यनुमाने यावद्धूमं वह्निसद्भावो ज्ञात एवेत्यगृहीतग्राहित्वमनुमानस्य न सम्भवति। एवञ्चेत् केचन एतद्भयादेवोद्वेजिता अनुमानस्य गृहीतग्रादित्वं स्वीकुर्वन्ति। वस्तुततस्तु अनुमानस्य गृहीतग्राहित्वेऽपि अप्रमात्वं नापद्यते। परन्तु प्रत्युत्पन्नलिंगकारणजन्यतया संस्का-रमात्रजन्यत्वाभावात् अनुमानं न स्मृतिः तेन चास्य प्रमात्वमव्याहतम्। स्मृतिरेवाप्रमा भवति। तदुक्तं तन्त्रटीकायम् – 'पूर्वविज्ञानविषयं विज्ञानं स्मृतिरिष्यते। पूर्वज्ञानाद्विना तस्याः प्रामाण्यं नावगम्यते॥' प्राभाकरमते अनुभूतेरन्या स्मृतिः। सा 'पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते॥ न प्रमाणं स्मृतिः पूर्वप्रतिपत्तेरपेक्षणात्॥' (प्र॰ पं॰, पृ॰ १०४) इत्यनेन स्मृतेरप्रमात्वमुक्तम्। अनुमितौ तु केवलसंस्कारजत्वं नास्ति, प्रत्युत लिंगजत्वमप्यस्ति। अतो न तस्याः स्मृतित्वविधया अप्रमात्वं शंकनीयम्। किञ्च शुक्तिकायामिदं रजतमित्यादावनुभवरूपस्यापि रजतज्ञानस्य वलात् संस्कारातिरिक्तकारणाभावात् स्मृतित्वमाश्रित्य तत्तांशे प्रमोषः स्वीकृतः, अत्र त्वनुमितौ अनुभवकारणस्य लिंगस्य सत्त्वात् प्रतीतिसिद्धचनुभवस्यापह्नवेन स्मृतिप्रमोष-स्वीकारेण प्रयोजनं नास्तीति शास्त्रदीपिकाकारस्य भाट्टानुसारि मतमनुसरतो रघुनाथस्य मतं न च तत्तानुल्लेखितयेत्यादिना स्पटीकृतम्। किञ्च महानसादिदृष्टान्तधर्मिष्वेव बहुशो वह्नि-साहित्यमुपलब्धस्य पुरुषस्य अवह्नौ च क्वचिदपि प्रयत्नेनाप्यन्विष्यमाणे धूममदृष्टवतः साध्यधर्मिषु वह्निमत्ताज्ञानं जायते। संस्कारश्चोद्बोधितः स्मृतिं जनयतीत्यविवादम्, स्मृतेश्च

स्योद्बोधकं संस्कारश्चोद्बुद्धः स्मृतिहेतुरित्यापत्तेः । न च तत्तानुल्लेखितया न सा स्मृतिः , इदं रजतमिति रजतस्मृतिवदुपपत्तेरिति दिक् । ८ ।

(अनुमास्वरूपकथनम्)

तदेवं सिद्धे केवलान्वयिनि व्यतिरेकिणोरनुमानाद्भेदे ' त्रिलक्षणेन या सिद्धिर्जायते सानुमा उच्यते' इत्याचार्यवचनमत्युपपन्नमिति । ९ ।

(अनुमानावयवविचारः)

इदं चानुमानं परार्थं साधनसाध्यं साधनन्याय इति समानार्थकम् । तच्च त्र्यवयवम् उदाहरणान्तम् उदाहरणादिकं वा, हेतुवाक्येनैव पक्षधर्मताया अपि सिद्धेः, उपनयवैयर्थ्यात् । निगमनञ्च प्रतिज्ञया गतार्थम् । यदि च तदुभयमुच्यते तदा प्रतिज्ञाहेतू न

प्रमोषः शुक्तिकारजतादिवेदनेषु क्लृप्त एव । संस्कारोद्बोधनद्वारा स्मृतिरूपवह्निज्ञानोत्पत्तौ सत्यां क्लृप्तेनैव धूमाद्वह्निज्ञानोत्पतौ अक्लृप्तलिंगस्य लिंगिज्ञानहेतुत्वं न कल्पनीयम् । कल्पनायां वा शुक्तिकायामपि रजतज्ञानस्यानुभवरूपत्वात्तदुपपत्तये दोषस्यैवानुभवहेतुत्वं कल्पनीयम् । 'अकल्पने त्वत्रापि स्मृतिप्रमोषादप्रामाण्यमेव स्यात् । ' (शा॰ दी॰, पृ १७५ - १७६) इति । तस्मादनुमानस्यागृहीतगाहित्वमवश्यं स्वीकार्यमिति दिक् ।८।

आदर्शपुस्तके ' **त्रिलक्षणेन** या बुद्धिर्जन्यते सानुमेष्यते ' (श्लो॰वा॰,पृ॰ ३४६) इत्युपलभ्यते । पक्षसत्त्वं विपक्षासत्त्वं सपक्षसत्त्वञ्चेति हेतोर्धर्मास्त्रयो विद्यन्ते । असिद्ध्यनैकान्तबाधकरूपहेतुदोषनिराकरणार्थं हेतोः पक्षसपक्षयोः सत्त्वं विपक्षाद् व्यावृत्तिरिति त्रैलक्षण्यमिति **त्रिलक्षणेन** हेतुना या सिद्धिः साध्यवत्तया निश्चयो जायते उत्पद्यते सा बुद्धिरनुमा अनुमितिरुच्यते कथ्यते । एतदनुमितेः करणनुमानमित्युक्तम्, तच्च स्वार्थपरार्थरूपमितीष्यतेऽनुमानवादिभिः । तथाचानुमानं स्वार्थं परार्थञ्चेति भेदेन द्विविधम् । स्वस्मै यत्तत् स्वार्थानुमानं ज्ञानात्मकं स्वार्थानुमितिहेतुश्च । तथाहि – स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र वह्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतादौ धर्मिणि धूमादिकं पश्यन् व्याप्तिं स्मृत्वा च यस्य प्रतिपत्तुः वह्निज्ञानं जायते स एव तेन ज्ञानेन परोक्षमर्थमवगच्छति, नान्य इति स्वार्थानुमानमुच्यते । तथाच रूपत्रययुक्ताल्लिंगात् पर्वतादौ परोक्षविषये यज्ज्ञानं प्रतिपत्तुर्जायते तत् स्वार्थानुमानम् । सन्दिग्धसाध्यवान पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः । निश्चतसाध्यवान् सपक्षः । यथा तत्रैव महानसम् । निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव ह्रदः । (त॰ सं॰, पृ॰ ५१) इति । पक्षे पर्वतादौ लिङ्गस्यास्तित्वमेव निश्चितं तदेकं लिंगस्य लक्षणं (=स्वरूपं) पक्षधर्मताख्यं पक्षसत्त्वं वा । एवं सपक्षे एव सत्त्वं निश्चितमित्यन्वयाख्यं द्वितीयं लक्षणम्, एवञ्च विपक्षे ह्रदादावसत्त्वमेव निश्चितं व्यतिरेकाख्यं तृतीयमिति सद्धेतोस्त्रितयधर्मादनुमितिर्जायते । तदुक्तं बौद्धतर्कभाषायामपि – 'त्रिरूपलिंगाख्यानं परार्थानुमानम् । अन्वयव्यतिरेकपक्षधर्मतासंज्ञकानि त्रीणि रूपाणि येन वचनेन प्रख्याप्यन्ते तद्वचनमुपचारादनुमानशब्देनोच्यते । ' (बौ॰ भा॰, पृ॰ ७४) इति । परस्मै यत्तत् परार्थम् । परार्थानुमानं

वक्तव्यौ । अतए[व] ध्वनिरनित्यः, कृतकत्वात्, यत् कृतकं तदनित्यं यथा घटादीति वार्त्तिककृतः प्रयुञ्जते । भाष्यकृतस्तु 'यत् कर्म तत् फलवद् यथा कृष्यादि, होमोऽपि कर्म, तेनापि फलवता भवितव्यमि'ति निगमनान्तरमेवेति । १०।

(हेत्वाभासनिरूपणम्)

अत्र चासिद्धिरनेकान्तो बाधकश्चेति त्रय एव हेतुदोषाः । तत्रसिद्धिः पञ्चविधा –स्वरूपासिद्धिः सम्बन्धासिद्धिः व्यतिरेकासिद्धिः स्वाश्रयासिद्धिर्व्याप्यत्वासिद्धि-

---

वचनात्मकम्, तच्च वचनमवयवशब्देनोच्यते । त्रिरूपलिंगप्रतिपादकं वचनं परं प्रतिपादयति ज्ञापयतीत्यत आयुर्घृतमितिवदुपचारात् वचनमप्यनुमानशब्देनोच्यते । अवयवश्च मीमांसकमते प्रतिज्ञाहेतूदाहरणानीत्युदाहरणान्तम् उदाहरणोपनयमिगमाश्चेत्युदाहरणादिकमिति त्रिविधः स्वीकृतः । अतो यत्तु स्वयं धूमाद् वह्निमनुमाय परं बोधायितुं त्र्यवयववाक्यं प्रयुज्यते तत् परार्थानुमानम् । परार्थानुमानं साधनसाध्यं साधनन्यायश्चेति शब्देन निरुच्यते ।

तत्र (१) साध्यविशिष्टपक्षबोधकं वाक्यं प्रतिज्ञा । यथा – पर्वतो वह्निमान् । (२) प्रतिज्ञा-तार्थसाधकं हेतुबोधकं पञ्चम्यन्तं पदं (=वाक्यं) हेतुः । यथा – धूमात् । (३) साध्यहेत्वोः व्याप्तिबोधकं दृष्टान्तयुक्तं वाक्यमुदाहरणम् । यथा – यो यो धूमवान् स वह्निमान् यथा महानसम् । (४) यद् वाक्यं पक्षे साध्यव्याप्यहेतुमत्तां बोधयति स उपनयः । यथा – तथा चायम् अर्थात् वह्निव्याप्यधूमवान् अयं पर्वतः । एतादृशं विशिष्टवैशिष्ट्यात्मकमेकं ज्ञानं परा-मर्शशब्देन तार्किकादिभिः परिभाषितम्, तत्तु मीमांसकैः पर्वतवृत्तिधूमप्रत्यक्षं वह्निस्मरणमिति ज्ञानद्वयं नरसिंहाकारकं मन्यते इत्युक्तं प्राक् । (५) यद् वाक्यं हेतुमुल्लिख्य पूर्वप्रति-ज्ञातविषयमुपसंहरति तद् निगमनम् । यथा – तस्मात् (= वह्निव्याप्यधूमात्) तथा (= पर्वतो वह्निमान्) । नैयायिकमते प्रतिज्ञादेः पञ्चावयवेभ्यो न्यूनस्याधिकस्य वावयवस्य प्रयोगो नोपयुज्यते । प्रायेण सर्वे नैयायिका अवयवानां क्रमबद्धतायां नियतसंख्यायाञ्च न्यायसूत्र-कारं समर्थयन्ति । भाट्टमीमांसका नैयायिका इवावयवानां नियतक्रमं नाद्रियन्ते । शालिकनाथे-नाप्युक्तम् – 'तदेवम् (= परार्थानुमानमेव) त्र्यवयवं साधनम् ।' (प्र॰ पं॰, पृ॰ २२०)) इति । येन वाक्येन वचनेन वान्यस्यानुमितिर्जायते – पर्वतो वह्निमानित्यादि – तदेव वाक्यं वचनं वा साधनमुच्यते । शालिकनाथमतेन प्रतिज्ञापदमास्थाय हेतूदाहरणयोः क्रमभङ्गता स्वीकृता (प्र॰ पं॰, पृ॰ २२२-२२३) । तन्मते साध्यनिर्देशार्थं प्रतिज्ञावाक्यं प्रथमं प्रयुज्यते । ततः व्याप्तिप्रतिपा-दकमुदाहरणवाक्यं पक्षधर्मतामूलकं हेतुवाक्यञ्च प्रयोक्तुमलम् ।

व्याप्तिः पक्षधर्मता चेत्येतज्ज्ञानद्वयस्य फलं तावत् निगमनम् । केवलं व्याप्तिमूलकं पक्षधर्मतामूलकञ्च वाक्यं वा कदापि निगमनं न नियन्तुं क्षमम् । व्याप्तिमूलकोदाहरणवाक्यस्य स्मृतिघटकतया पक्षधर्मतामूलकहेतुवाक्यस्यानुभवपरकतया निगमनद्वारेण नूतनज्ञानमुत्पद्यते । जिज्ञासितधर्मविशिष्टस्य धर्मिणः प्रतिपादनार्थं प्रतिज्ञावाक्यं प्रयुज्यते । निगमनवाक्यमपि तथा करोतीति कृत्वा प्रतिज्ञानिगमनवाक्ययोः हेतूपनयवाक्ययोश्च एकार्थप्रतिपादकत्वं संगतमिति

श्चेति । यथा बुद्धो धर्माधर्मवेदी सर्वज्ञत्वादित्याद्या सर्वज्ञत्वस्य क्वचिदप्यप्रसिद्धेः । अग्निरदाहकः शीतत्वादिति द्वितीया, शीतत्वस्य पक्षवृत्तित्वात् । गोशब्दः सास्नादि-

---

द्वयोर्द्वयोरन्यतरं प्रयोक्तुं युज्यते । तदुक्तम् – 'प्रतिज्ञाहेतूदाहरणैरेव धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वतो वह्निव्याप्यधूमवन्महानससदृश इति वाक्यार्थज्ञानादनुमितिजननादुपनयनिगमने व्यर्थे ।' 'यद्वोदाहरणप्रभृतिभिरेव साध्यसिद्धेः प्रतिज्ञाहेत्वोर्न किञ्चित् प्रयोजनमि'ति चोक्तं गागाभट्टेन (भा॰ चि॰, पृ॰ ३१) । किञ्चोक्तं 'तच्च पञ्चतयं केचित्, द्वयमन्ये वयं त्रयम् । उदाहरणपर्यन्तं यद्वोदाहरणादिकमि'ति (शा॰ दी॰, पृ॰ १७८) पार्थसारथिमिश्रैः । बौद्धा उदाहरणोपनयात्मकं द्व्यवयवं वाक्यं स्वीकुर्वन्ति । यथा – यत् सत्तत् क्षणिकं यथा जलधरपटलम्, सन्तश्चामी भावा इति । परन्तु अत्यन्तसाकाङ्क्षस्य वाक्यस्य क्लेशगम्यार्थत्वात्त्र्यवयवं वाक्यमभ्युपगन्तव्यमिति दिक् ।९ – १० ।

अधुना हेत्वाभास आलोच्यते **अत्र चासिद्धि**रित्यादिना । हेत्वाभासशब्दस्य द्विधा व्युत्पत्तिर्भवति । तत्र तावत् हेतुवदाभासन्ते इति व्युत्पत्त्या हेत्वाभासपदं दुष्टहेतुपरम्, हेतोराभासा (= दोषा) इति व्युत्पत्त्या च हेतुदोषपरम् । प्रथमार्थग्रहणे असिद्धोऽनैकान्तिको बाधकश्चेति विशेषणरूपेण व्यवहर्तव्यः, द्वितीयार्थग्रहणे चासिद्धिरनैकान्तः (अनैकान्तिकत्वं) बाधो (बाधकत्वं) चेत्येवं प्रायशो विशेष्यत्वेन व्यवह्रियते । रघुनाथस्तु द्विधैव प्रयोगं कृत्वा **हेतुदोषा** इत्युल्लिख्यापि हेत्वाभासशब्दस्य हेतुदोषः दुष्टहेतुश्चेति द्विधार्थं सूचितवान् । ज्ञाननिष्ठयादृशविषयत्वावच्छिन्नानुमितितत्करणान्यतरप्रतिबन्धकः तादृशप्रमाविषयो हेत्वाभासो दुष्टहेतुरित्यर्थः, तद्वत्त्वम् हेत्वाभासत्वं हेतुनिष्ठदोषः इत्यर्थः । तथाच पर्वतो धूमवान् वह्निमत्त्वादित्यनुमितौ करणस्य धूमाभाववदवृत्तिवह्निरिति व्याप्तिज्ञानस्य प्रतिबन्धको धूमाभाववद्वृत्तिवह्निरिति निश्चयः । तादृशनिश्चयनिष्ठा प्रतिबन्धकता धूमाभाववद्वृतिवह्निविषयकत्वावच्छिन्नेति धूमाभाववद्वृत्तिवह्निरनेकान्तो (= व्यभिचारः) । एवं ह्रदो वह्निमान् इत्यनुमितौ वह्न्यभावान् ह्रदः इति बाधकनिश्चयः प्रतिबन्धकः । तादृशनिश्चयनिष्ठा प्रतिबन्धकता वह्न्यभाववद्ध्रदविषयकत्वावच्छिन्नेति वह्न्यभाववद्ध्रदो बाधकः । नन्वेवं पर्वतो वह्निमान् इत्यनुमितौ वह्न्यभाववान् पर्वत इति बाधकभ्रमः प्रतिबन्धकः । तादृशभ्रमनिष्ठा प्रतिबन्धकता वह्न्यभाववत्पर्वतविषयकत्वावच्छिन्नेति वह्न्यभाववत्पर्वतस्य दोषत्वे सद्धेतोर्धूमस्य दुष्टत्वप्रसङ्गः इति चेत् ? न, पर्वतो वह्निमान् इत्यनुमितौ वह्न्यभाववान् पर्वत इति बाधकभ्रमस्यानुमितिप्रतिबन्धकत्वेऽपि तादृशप्रतिबन्धकता न वह्न्यभाववत्पर्वतत्वावच्छिन्नविषयकत्वावच्छिन्ना, वह्न्यभाववत्पर्वतस्याप्रसिद्धत्वादिति सद्धेतुमात्रे वह्न्यभाववत्पर्वतादेर्दोषत्वं हेतोर्दोषत्वञ्च नास्ति ।

मीमांसासूत्रे शबरभाष्ये च हेत्वाभासालोचनं न दृश्यते । कुमारिलः प्रभाकरश्च विस्पष्टं विवेचनमस्य कृतवन्तौ । 'अग्राह्यता तु शब्दादेः प्रत्यक्षेण विरुध्यते । तेषामश्रावणत्वादि विरुद्धमनुमानतः ॥' (श्लो॰ वा॰, पृ २६०) इत्यादिग्रन्थेन 'प्रतिज्ञादोषाः प्रत्यक्षविरोधादयोऽप्र-

मद्वचनः गोशब्दत्वादिति तृतीया, धर्मिव्यतिरेकेण गोशब्दत्वस्यासत्त्वात् । आकाशं नित्यं निरवयवद्रव्यत्वादिति सौत्रान्तिकमाकाशाभावत्ववादिनं प्रति चतुर्थी । वायुराकाशं मूर्त्तत्वादिति पञ्चमी मूर्त्तत्वस्याकाशव्याप्त्याभावात् । ११ ।

अनैकान्तिकं द्विविधं – सव्यभिचारं सप्रतिसाधनं च । शब्दो नित्योऽमूर्त्तत्वादित्याद्यम् । वायुरप्रत्यक्षो द्रव्यत्वे सत्यरूपत्वात्, वायुः प्रत्यक्षो द्रव्यत्वे सति स्पर्शवत्त्वात् इत्युभयमप्यनिर्णायकं संशयहेतुरगृह्यमाणबलाबलत्वादुभयोः । १२।

सिद्धविशेषणात्वादयश्च वार्त्तिके प्रपञ्चिताः ।' (शा॰ दी॰, पृ॰ १८०) इति । बृहतीव्याख्यायामुक्तम् –'अत्र (= भाष्ये) ज्ञातसम्बन्धशब्देन साधारणासधारणविरुद्धा हेतुदोषा निरस्ताः ।' (बृ॰, पृ॰ ७४) इति । 'हेतोर्दूषणमसिद्धत्वं (स्वरूपासिद्धत्वमेकदेशासिद्धत्वम्) असाधारणत्वं साधारणत्वं बाधितविषयत्वञ्चेति' (प्र॰ पं॰, पृ॰ २२५-२२६) प्राभाकरमते चत्वारो हेत्वाभासाः स्वीक्रियन्ते । 'असिद्धिः अनैकान्तिकत्वम् बाधकत्वञ्चेति त्रयो हेतुदोषाः ।' (शा॰ दी॰, पृ॰ १८०) इत्युक्तं पार्थसारथिमिश्रैः । ते त्रयोऽसिद्धानैकान्तिकबाधकाः' (भा॰ चि॰, पृ॰ ३१) इति गागाभट्ट एतञ्च चिन्नस्वामी प्राहतुः । चिदानन्दपण्डितस्तु नीतितत्त्वाविर्भावे प्रशस्तपाद इवासाधारणनामानमपरं चतुर्थं स्वीकरोति । मानमेयोदयकारश्च चिदानन्दभाषितं प्रपञ्चितम् ।

सर्वे एव मीमांसकाः प्रथममसिद्धिमालोचयन्ति । पार्थसारथिमिश्रः (१) स्वरूपासिद्धिः (२) सम्बन्धासिद्धिः , (३) व्यतिरेकासिद्धिः (४) आश्रयासिद्धिः, (५) व्याप्त्यसिद्धिश्चेति आह (शा॰ दी॰, पृ॰ १८० – १८२) । चिदानन्दपण्डितः असिद्धेः पञ्चभेदं स्वीकृत्य केवलं व्याप्त्यसिद्धिस्थाने भागासिद्धिमभ्युपैति । गागाभट्टः पार्थसारथिरिव रघुनाथभट्ट इव वा पञ्चभेदमसिद्धेः स्वीकरोति (भा॰ चि॰ पृ॰ ३१) । स व्याप्यत्वासिद्धिं पञ्चममाह । केशवमिश्रस्तु असिद्धिं त्रिधा विभज्य व्याप्यत्वासिद्धिं द्विधा विभनक्ति । प्रमाणलक्षणग्रन्थे सर्वज्ञात्ममुनिनासिद्धस्य द्वादशधा विभागः कृतः – (१) स्वरूपासिद्धः, (२) अधिकरणासिद्धः, (३) विशेषणासिद्धः, (४) विशेष्यासिद्धः, (५) भागासिद्धः, (६) आश्रयासिद्धः, (७) आश्रयैकदेशासिद्धः, (८) व्यर्थविशेष्यासिद्धः, (९) व्यर्थविशेषणासिद्धः, (१०) सन्दिग्धासिद्धः, (११) सन्दिग्धविशेषणासिद्धः, (१२) ऐतिह्यासिद्धः (= सन्दिग्धासिद्धः) चेति । भासर्वज्ञेन एतद्द्वादशभेदस्य विवेचनं कृत्वावयवासिद्धः अन्यतरबाधासिद्धश्च हेत्वाभासविधयोल्लिखितौ । गौतमेन असिद्धस्योल्लेखो न कृतः, किन्तु तस्य साध्यसमनामकहेत्वाभासस्य वात्स्यायनभाष्यव्याख्यायां वार्त्तिककृता असिद्धस्य (१) प्रज्ञापनीयधर्मसमानः (= स्वरूपासिद्धः), (२) आश्रयासिद्धः (३) अन्यथासिद्धश्चेति त्रिधा भेदः स्वीकृतः (न्या॰ द॰, पृ॰ ३८६) ।

रघुनाथो गागाभट्टश्च अप्रसिद्धं हेतुं स्वरूपासिद्धं हेत्वाभासमाहतुः । यथा – बुद्धो धर्माधर्मवेदी सर्वज्ञत्वादित्यत्र बुद्धस्य सर्वज्ञत्वहेतुरप्रसिद्धः, बौद्धेभ्योऽन्येषां बुद्धस्य सार्वज्ञानभ्युपगमात् । सम्बन्धासिद्धिर्नाम पक्षे हेतोरवृत्तितारूपसम्बन्धस्याभावः । यथा वह्निरदाहकः

तथा बाधको नाम हेत्वाभासस्तार्किकैर्यो विरुद्ध इत्युच्यते स द्विविधः धर्मस्वरूपबाधः तद्विशेषबाधश्च । शब्दो नित्यः कृतकत्वादित्याद्यः, कृतकत्वमनित्यत्वेन व्याप्तं नित्यत्वस्य स्वरूपमेव बाधते । अङ्कुरश्चेतनकर्तृकः उत्पत्तिमत्त्वादित्यत्र उत्पत्तिमत्वं द्वितीयम् । सर्वत्र यो हेतुर्यादृशेन विशिष्टेन साधनेन दृष्टान्ते धर्मिणि नियतः स तादृशविशिष्टस्य पक्षे साधकः , तदिहोत्पत्तिमत्त्वमङ्कुरे शरीरिणश्चेतनस्यानुपलब्धिविरोधात् साधयितुमशक्तमशीरीरिणं च घटादाविव नियमवलात् स्वयमेव बाधते ॥ १३ ॥

इत्यनुमानपरिच्छेदः ॥

शीतत्वादित्यत्र शीतत्वहेतोः सम्बन्धो वह्नौ न सङ्गच्छते, तत्र स्पष्टत उष्णत्वस्य सत्त्वात् । अतः 'पक्षे व्याप्यत्वाभिमतस्य हेतुतावच्छेदकसम्बन्धेनाभावः सम्बन्धासिद्धिः' इति परिभाषितं गागाभट्टैः (भा॰ चि॰, पृ॰ ३१) । असिद्धेस्तृतीयो भेदो व्यातिरेकासिद्धिः, सा चासाधारणानैकान्त इत्यक्षपादीया मन्यन्ते । हेतुरयं सपक्षे विपक्षे न विद्यते ।अस्याः प्रसिद्धनिदर्शनं – शब्दोऽनित्यः शब्दत्वादित्यत्र शब्दत्वं हेतुः सर्वेभ्योऽनित्येभ्यः सपक्षेभ्यः, नित्येभ्यो विपक्षेभ्योऽपि व्यावृत्तः शब्दरूपपक्षमात्रवृत्तित्वमवगाहते । पक्षाप्रसिद्धिः स्वाश्रयासिद्धिः । यथा – आकाशो नित्यो निरवयवद्रव्यत्वात् इत्यत्र प्रदत्तो हेतुः सौत्रान्तिकं प्रति असिद्धः, यतः सौत्रान्तिका आकाशस्याभावमिच्छन्ति । पक्षैकदेशे हेतोरवृत्तित्वं व्याप्यत्वासिद्धिः । यथा – वायुराकाशश्चानित्यो मूर्त्तत्वादित्यत्र प्रयुक्तं मूर्त्तत्वं नाम वायौ आकाशे च नास्ति । न्यायमते साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिमध्येऽन्तर्गताः । साध्ये साध्यतावच्छेदकस्याभावः साध्याप्रसिद्धिः । एतज्ज्ञाने गृहीते काञ्चनमयवह्निमान् इत्यादौ साध्यतावच्छेदकस्य साध्याप्रसिद्धिः । यथा – काञ्चनमयधूमादित्यादौ । अत्र हेतुतावच्छेदकविशिष्टहेतुज्ञानाभावात् तद्धेतुकव्याप्तिज्ञानादेरभावः फलम् । एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य हेतुतावच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति । 'सोपाधिको हेतुर्व्यप्यात्वासिद्धिरि'ति प्रहुस्तार्किकाः । यथा – पर्वतो धूमवान् वह्नेरित्यत्रार्द्रेन्धनसंयोग उपाधिः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिरिति प्राग् व्याख्या कृता ।११।

रघुनाथमते हेत्वाभासस्य द्वितीयो भेदोऽनैकान्तिकत्वं नाम, दुष्टहेतुश्चानैकान्तिकः । यद्यपि कणभक्षेण स्पष्टतोऽस्य नामोल्लेखो न कृतस्तथापि कन्दलीकृन्मते कणव्रतदर्शने सन्दिग्धपदेन अनैकान्तिको हेत्वाभास इष्यते । सपक्षे विपक्षे चावृत्तित्वे सति पक्षमात्रवृत्तिश्चेद् भवति सन्देहो हेतुरयं साध्येन सहचरित आहोस्वित् साध्याभावेनेति । 'साध्यसन्देहजनकहेतुरनैकान्तिकः । सन्देहजनकत्वं च साध्यतदभावसम्बन्धित्वज्ञानेन सत्प्रतिपक्षितत्वेन चे'ति गागाभट्टः (भा॰ चि॰, पृ॰ ३२) । तथाचानैकान्तिकस्य सव्यभिचारं सप्रतिसाधनञ्चेति द्विधा भागं व्याख्यातवन्तौ पार्थसारथिमिश्रो रघुनाथश्च । व्यभिचारेण सह वर्त्तत इति सव्यभिचारः । गङ्गेशमते सव्यभिचारोऽनैकान्तिकापरनामा साधारणासाधारणानुपसंहारिभेदेन भवति त्रिविधः । वैशेषिकः शङ्करमिश्रो गङ्गेशमतं स्वीकृतवान् । अन्नम्भट्टो विश्वनाथश्चापि तथा कृतवन्तौ ।

केशवमिश्रस्तु साधारणमसाधारणमिति भेदद्वयमभ्युपैति । भाट्टास्तु साधारणमसाधारणमिति भेदद्वयमन्यथा स्वीकुर्वन्ति । तथाच साधारणमसाधारणञ्चापि कुमारिलभट्ट उत्तरकालीनाश्चान्ये मीमांसका न्यायपरम्परामनुसरन्ति । तत्र साधारणं प्रशस्तपादस्य सन्दिग्धेन उद्योतकरस्य चानैकान्तिकेन साम्यमावहति । कुमारिलमते (श्लो॰ वा॰ ८४ - ८५, पृ॰ २६६) सपक्षविपक्षयोर्विद्यमानो हेतुः साधारणोऽनैकान्तिक उच्यते । यथा – शब्दो नित्यः प्रमेयत्वात् । अत्र प्रमेयत्वस्य सपक्षे आकाशादौ विपक्षे च नित्यत्वाभाववति घटादावपि विद्यमानत्वात् संशयं जनयतः साधारणत्वम् । शास्त्रदीपिकाकृता प्रमाणरत्नकारेण भाट्टचिन्तामणिकारेण चास्योदाहरणं दत्तम्-- शब्दो नित्योऽमुर्त्तत्वादित्यत्र अमूर्त्तत्वहेतुः साध्यस्यानिश्चायकतया सन्देहजनको भवति, यतोऽमूर्त्तत्वहेतुः क्रियायामपि वत्तते, क्रिया चानित्या (शा॰ दी॰, पृ॰ १८२, भा॰ चि॰, पृ॰ ३२) । प्रागुक्ता व्यतिरेकासिद्धिः असाधारणानैकान्तिकेनाक्षपादीयानां तुलामारोहति (भा॰ चि॰, पृ॰ ३२) । किञ्च मानमेयोदयकारः केशवमिश्रमतेन सव्यभिचारमनैकान्तिकमाह, तस्य लक्षणमुदाहरणञ्च वार्त्तिककृन्मतेनाह (मान॰, पृ॰ ७७) । रघुनाथेन कृतोऽनैकान्तिकस्य द्वितीयभेदः सत्प्रतिपक्षेणोपमामारोहति । साध्याभावसाधकं हेत्वन्तरं यस्य विद्यते स सत्प्रतिपक्षः साध्याभाववान् पक्ष इति यावत् । यथा – वायुरप्रत्यक्षोऽरूपिद्रव्यत्वात् । तथाच यथा अरूपिद्रव्यत्वमाश्रित्य वायोरप्रत्यक्षः सिध्यते तथा महत्त्वे सत्युद्भूतस्पर्शत्वादिति हेतुमवलम्ब्य वायोः प्रत्यक्षोऽपि साधयितुं शक्यते । अतो वायुः प्रत्यक्षो महत्त्वे सत्युद्भूतस्पर्शत्वादिति प्रतिपक्षः । एवं सति उभयोः हेत्वोः समानवलवत्त्वात् साध्ये सन्देहो विद्यते, निश्चयो न जायते । अतोऽनैकान्तिको हेत्वाभासः सप्रतिसाधनो नाम, साधनम् = हेतुः । प्रशस्तपादस्यानध्यवसितेन उद्योतकरस्य चासाधारेण तुलामवगाहते कुमारिलस्य स एवासाधारणोऽनैकान्तिको यः सपक्षविपक्षाभ्यां व्यावृत्तः पक्षमात्रे वर्त्तते । यथा – पृथिवी नित्या गन्धत्वादित्यत्र गन्धत्वं हेतुः विपक्षेभ्यः सर्वेभ्योऽनित्येभ्यः सपक्षेभ्यो नित्येभ्योऽपि व्यावृत्तः पृथिवीमात्रवृत्तिर्भवति । कुमारिलेनायं संशयहेतुत्वेन मन्यते । अत्रेयं युक्तिः व्याप्तिनिश्चयस्य द्वेऽंगे (१) सपक्षेणान्वयः (२) विपक्षेणानन्वयः (=व्यतिरेकः) । साधारणहेत्वाभासे सपक्षेण साकमन्वयो वर्त्तते विपक्षेण त्वनन्वयो न वर्त्तते । असाधारणे तु विपक्षेण सहास्ति अन्वयो, नच सपक्षेणान्वयो वर्त्तते इति विवेकः । एवञ्च पृथिवी रसवती गन्धत्वादित्यत्र गन्धत्वस्य साध्येन एकार्थसमवायोऽस्ति, सम्बन्धस्तु प्रथमं न ज्ञायते, यतः पृथिवीव्यतिरिक्तेऽन्यत्र कस्मिंश्चिद् गन्धो नोपलभ्यते । नव्यतार्किकैरनुपसंहारी नाम तृतीयोऽनैकान्तिकस्य भेदः स्वीकृतः । स च केवलान्वयिपक्षकः । यथा सर्वमभिधेयं प्रमेयत्वात् । व्यतिरेकव्याप्तिज्ञानसामग्री अत्र नास्ति । वस्तुतस्तु अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी नाम हेत्वाभासः ।१२ ।

बाधो नाम तृतीयो हेतुदोषो भाट्टैरभ्युपेतः । बाधको नाम हेत्वाभासश्चायं तार्किकादिभिर्विरुद्धशब्देनोच्यते । गौतमेन विरोधी हेतुर्विरुद्धः परिभाष्यते । यो हेतुः साध्यनिश्चयाय उद्दिष्टसाध्यस्य साधको न भवत्ति, अपितु विरोधी स विरुद्धो हेत्वाभासः इत्याह जयन्तभट्टः । स पुनरपि प्राह – यो हेतुः' सपक्षे न तिष्ठति विपक्षे च तिष्ठति, स्वसाध्यस्य विपरीतमर्थञ्च साधयति स विरुद्ध इति । गङ्गेशमते साध्यस्य व्यापकाभावस्य

प्रतियोगी भवति चेत् हेतुः स भवेत् विरुद्धो नाम हेत्वाभासः । यथा – जलाशयो वह्निमान् जलत्वात् । अत्र जलत्वं हेतुः विरुणद्धि साध्यम् । एवमभिलक्ष्य केशवमिश्रः – साध्यविपर्ययव्याप्तस्तु हेतुर्विरुद्धः (त॰ भा॰, पृ॰ ४५-४६) इति, अन्नम्भट्टश्च – 'साध्याभावव्याप्तो हेतुर्विरुद्धः' (त॰ सं॰, पृ॰ ५५) इत्याहतुः । गागाभट्टैरुक्तञ्च – 'बाधकस्तु साध्याभावसाधकः' (भा॰ चि॰, पृ॰ ३२) इति । यथा – शब्दो नित्यः कृतकत्वादित्यत्र नित्यत्वं साध्यं कृतकत्वञ्च हेतुः । कृतकत्वं साध्याभावस्यानित्यत्वस्य साधको भवतीति । गागाभट्टस्य मतेनास्यैकविधत्वं प्रकाशितम् । दोषोऽयं प्रतिज्ञार्थस्य बाधकत्वादेकविध एव । केषाञ्चिन्मते (१) धर्मस्वरूपबाधः, (२) धर्मविशेषबाधः, (३) उभयस्वरूपबाधः (४) उभयविशेषणबाधश्चेति चतुर्विधः । धर्मधर्म्युभयेषां स्वरूपविशेषाभ्यां षड्विधत्वम् । तथाचोक्तम् – 'षोढा विरुद्धतामाहुश्चतुर्द्धा वैकधापि च । श्रुत्यर्थोक्तस्य बाधायां प्रतिज्ञार्थस्य हेतुता ॥' (श्लो॰ वा॰, पृ॰ २६८-२६९) इति । पार्थसारथिमिश्रोऽवान्तरभेदस्यानुपयोगात् धर्मस्वरूपमेकमेव बाधकत्वमुक्त्वा – 'यद्यवश्यमवान्तरभेदो वक्तव्यस्तर्हि द्वैविध्यमेव वक्तव्यम् – धर्मस्वरूपबाधनं तद्विशेषबाधनं चेति ।' (शा॰ दी॰, पृ॰१८६) इति । इदमेव द्वैविध्यमङ्गीकृत्य रघुनाथेन द्विविधो बाधकभेदः स्वीकृतः । एवमेव चिदानन्दपण्डितः नारायणभट्टश्च मन्येते ।१३ ।

अथैवं हेत्वाभसनिरूपणं प्राचीननवीनानां मीमांसकानां मतसन्दर्शनेन प्रपञ्चितम् । स्वार्थपरार्थभेदेन अनुमानस्य द्वैविध्यं पूर्वमालोचितम् । भाष्यकारस्य च द्वैविध्यमनुमानस्येष्टम् । तदुक्तम् – 'तत्तु द्विविधम् – प्रत्यक्षतोदृष्टसम्बन्धं सामान्यतोदृष्टसम्बन्धञ्च ।' (मी॰ भा॰, पृ॰ ११) इति । प्रमेयद्वैविध्यमंगीकृत्यानुमानस्य द्वैविध्यमिति प्रभाकरः (बृ॰ पृ॰ ७५) । (१) यत्र यथापूर्वं प्रत्यक्षभूतयोरन्यतरस्य दर्शनेनान्यतरस्यानुमानम् तत् प्रत्यक्षतोदृष्टसम्बन्धम् । यथा – धूमेन वह्निरिति । तदुक्तं भाष्ये – 'धूमाकृतिदर्शनादग्न्याकृतिविज्ञानम्' (मी॰ भा॰, पृ॰ ११) इति, प्रभाकराचार्यैरेतद् विशेषाद्विशेषावगतिर्मन्यते (बृ॰, पृ॰ ७५) । तथाच विशेषात् धूमाकृतिकात् ज्ञातवह्निसम्बन्धव्याप्तिर्वह्न्याकृतिको विशेषोऽवगम्यते । (२) यत्राप्रत्यक्षे हेतुहेतुमतोः सम्बन्धे केनचिद्दर्शेन हेतोः सामान्यादप्रत्यक्षो हेतुमान् गम्यते तत् सामान्यतोदृष्टसम्बन्धम् । इदञ्च सामान्यात् सामान्यावगतिमाहुः प्राभाकराः (बृ॰, पृ॰ ७५) । यथा – देवदत्तस्य सामान्यादेशान्तरप्राप्तिमात्रादादित्ये तद्धेतुमात्रमनुमीयते । एवञ्च वलाकया जलानुमानम् । वलकासामान्येन जलसामान्यस्यानुमानम् । तथाच – यावानस्य देशो वलाकयाऽजहद्वृत्तित्वेन प्रसिद्धो भवति तावन्तं देशमन्तर्भाव्य वृक्षादिकं विषयं पक्षीकृत्य वलाकावत्त्वेन जलमनुमीयत इति दिक् ।

इति साहान्तविश्वरूपेण कृतायां पञ्चिकानाम्न्यां विवृत्यामनुमानपरिच्छेदः ॥

(शब्दपरिच्छेदः)

(शब्दप्रमाणनिरूपणम्)

विज्ञाताच्छब्दात् पदार्थबोधद्वारेण यद्वाक्यार्थज्ञानं तच्छाब्दमिति वृत्तिकारानुयायिनः । आचार्यमते तु शाब्दज्ञानकरणं शब्दः । तच्च –

विन्देम देवतां वाचां नमोवाकं प्रशास्महे ।
मीमांसकमते शब्दं प्रमाणमत्र तन्महे ॥

'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमि'ति (मी॰ भा॰, पृ॰ १२) शबरस्वामिनः । अत्रेदमाशंक्यते किं शब्दाद्विज्ञानमर्थविषयकज्ञानं शब्दविज्ञानमुत शब्दे विज्ञानं शब्दविज्ञानमिति पञ्चमीसमासग्रहणमाहोस्वित् सप्तमीसमासग्रहणमिति ? तथाच – प्रेरणं नाम शासनम् यतश्च शासनमवगम्यते तच्छास्त्रम् । शासनाच्छास्त्रमिति लौकिकव्युत्पत्तेः । शासनञ्च चोदनात्मकम्, चोदनञ्च प्रवृत्तिनिवृत्तिमूलकम् । तदुक्तं वार्त्तिके – 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्यते तच्छास्त्रमभिधीयते ॥' (श्लो॰ वा॰, पृ॰ २८८) इति । न च शब्दग्रहाद्विज्ञानाच्छासनावगमः, किन्तु कार्यावगमः, कार्यावगमाद्धि प्रेरणावगमः । अतः शब्दग्रहात् विज्ञानादर्थे विज्ञानं शास्त्रमिति वाच्यम् । तस्मात् शब्दे विज्ञानादिति सप्तमीसमासो नोपपद्यते । शब्दाद् यद् अर्थे विज्ञानमुत्पद्यते तत् शब्दविज्ञानम्, तस्मात् असन्निकृष्टेऽर्थे प्रेरणायां यद्विज्ञानं तच्छास्त्रमिति पञ्चमीसमासाश्रयणेन लक्षणोपपत्तिः । शास्त्रं हि शासनात्, तच्चार्थविषये एव विज्ञाने विज्ञानशब्दे पञ्चमीसमासग्रहणेनोपपद्यते न शब्दस्वरूपविषये । अतः पञ्चमीसमासोऽयं युज्यते । सप्तमीसमासेऽपि कार्यज्ञानेन व्यवधानेनापि शब्दग्रहज्ञानस्य प्रेरणज्ञाननिमित्ततया शास्त्रलक्षणं सिध्यतीति प्राभाकराः (बृ॰, पृ॰ ८१-८२) । तेषां मते वैदिकवाक्यस्य शब्दप्रमाणगम्यता लौकिकवाक्यस्य तु अनुमानगम्यता वैशेषिकवद् भवतीति । भाट्टमते तु लौकिकवैदिकयोरुभयोरपि शब्दप्रमाणस्य विषयत्वमङ्गीक्रियते । अतः पार्थसारथिमिश्रैरेवं व्याख्यातं भाष्यवचनम् – 'विज्ञाताच्छब्दात् पदार्थाभिधानद्वारेण यद्वाक्यार्थविज्ञानं तच्छाब्दं नाम प्रमाणम् ' (शा॰ दी॰, पृ॰ २०३) इति । प्रमाणशब्दो भाववाच्ये ल्युटा निष्पन्नम्, अतः प्रमाणम् = प्रमा अनुभवो वा । अतः प्रवर्त्तकं वाक्यं शास्त्रमित्युक्ते प्रवर्त्तकविशेषणरहितं वाक्यं शाब्दी प्रमा इत्यर्थ आयाति । विज्ञाताच्छब्दादित्यादि उक्त्वा एतन्मतं **वृत्तिकारानुयायिनामिति** रघुनाथो व्याचष्टे । जैमिनेर्बादरायनस्य च सूत्राणामुपरि बोधायनस्य उपवर्षस्य भवादासस्य च नाम्ना युक्ता विवृतिरूपा वृत्तिः नाम ग्रन्थत्रयं स्यात् – (१) बोधायनवृत्तिः, (२) उपवर्षवृत्तिः (३) भवदासवृत्तिश्चेति । विशिष्टाद्वैतवादिना रामानुचार्येणोद्घोषितं तस्य श्रीभाष्यं बोधायनवृत्तिमाश्रित्य रचितम् , भेदाभेदवादिनो भास्कराचार्यस्य भाष्यमुपवर्षवृत्तिमाश्रित्य रचितमिति वेदान्तदेशिकस्य मतम् । वेदान्तदेशिकोनोक्तम् – 'उपवर्ष इति बोधायनस्य नाम स्यात्' (तत्त्वटीका) इति । मीमांसाभाष्यकृता शबरस्वामिना 'भगवान् उपवर्षः' आहोस्वित् 'इति वृत्तिकारः ' इत्यनेन स्मर्यते स्म उपवर्षः । पार्थसारथिस्तु

'प्रमाणञ्चापि शब्दो वा तज्ज्ञानं वा निरूप्यते ।
पदार्थस्तन्मतिर्वा स्याद्वाक्याधिगमोऽपि वा ॥' (श्लो॰ वा॰, पृ॰ ३७) इति ।
कारणता चैषां समुच्चयेनैव महावाक्यार्थबोधेऽवान्तरवाक्यार्थधियोऽपि हेतुः स्यात् । यदाहुः –

'वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ।' इति । १ ।

वृत्तिकारशब्देन भवदासं मन्यते (द्र॰ श्लो॰ वा॰ उपरि तस्य टीका, पृ॰ ११, १७) । तथाच विज्ञाताच्छब्दात् = शब्दज्ञानसापेक्षादात्ममनःसन्निकर्षात् पदार्थबोधद्वारेण असन्निकृष्टार्थविषयकं यत् वाक्यार्थज्ञानं सा शाब्दी प्रमा इत्युच्यते । प्राभाकरमते पदान्येव वाक्यम्, पदार्थ एव वाक्यार्थः तत्र पदान्येव प्रमाणम् अर्थान्तरान्वितस्वार्थे पदानां व्युत्पत्तेरिति स्वीक्रियते (त॰ र॰, पृ॰ २१) । **आचार्यस्य** कुमारिलभट्टस्य **मते तु शाब्दज्ञानकरणं शब्दः** । एतत्प्रमाणत्वेन श्लोकवार्त्तिकमुदाहरति **प्रमाणञ्चापीति** । तथाच – शब्दज्ञानजन्यमसन्निकृष्टपदार्थविषयकं यथार्थज्ञानं शाब्दप्रमा, तत्करणीभूतशब्दः प्रमाणम् । पदार्थज्ञानजन्यमसन्निकृष्टवाक्यार्थविषयकं यथार्थज्ञानं वाक्यार्थरूपशाब्दप्रमा तत्करणीभूतपदार्थज्ञानं प्रमाणमित्यर्थः । एवञ्च वाक्यश्रवणानन्तरं पदोपस्थितपदार्थानां संसर्गविषयिणी प्रमा प्रत्यक्षादिविलक्षणा जायते, तत्करणं शब्दस्तज्ज्ञानं वा प्रमाणान्तरम् । अनुपदमेतस्य विजृम्भणं भविष्यति वैशेषिकस्य शब्दसम्बन्धिमतस्य निराकरणेन । आदर्शपुस्तके 'प्रमाणञ्चापि' इत्यत्र **'प्रमाणं त्वपि'** इत्युपलभ्यते ।

नैयायिकानां मते पूर्वपूर्ववर्णानामनुभवजनितसंस्कारसध्रीचिनान्त्यवर्णानुभवो भवति, तेनैवान्त्यवर्णानुभवरूपोद्बोधकेन सकलवर्णविषयकस्मृतिर्जायते, तेन स्मृत्यात्मकपदज्ञानेनार्थधीसहकारेण एकपदार्थेऽपरपदार्थान्वयबोधरूपः शाब्दबोधो जायते, स चान्वयः संसमर्गरूपः आकांक्षया भासत इति । तदुक्तम् – 'शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते ।' (व्यु॰, पृ॰ १) इति । पदानुपस्थितस्यार्थस्य शाब्दबोधे भासनं न भवति, पदशक्त्या अनुपस्थापितस्यार्थस्य शाब्दविषयतायां प्रत्यक्षादिप्रमाणान्तरोपस्थापितस्यार्थस्य शाब्दबोधे विषयत्वं स्यात् । अत एकपदार्थेऽपरपदार्थस्य संसर्गेऽपि पदशक्तिरंगीकर्त्तव्येत्यतो**ऽन्विताभिधानवादिनः** कार्यान्विताभिधानवादिनः प्राभाकरा वदन्ति । तेषां मते पदानां शक्तिरितरान्वितस्वार्थे, नतु स्वातन्त्र्येण पृथक्पृथगर्थे शक्तिः सम्भवति । तथाहि – गामानयेत्यादौ गोपदस्य शक्तिः कर्मत्वान्वितगवि गोत्वे वा । एवमम्पदस्य शक्तिर्गवान्वितकर्मत्वे । आङ्पूर्वीकनीधातोः शक्तिः कर्मतान्वितानयने । हिपदस्य शक्तिरानयनान्वितकार्यत्वे । एवमन्यत्रापि बोद्धव्यम् । एवञ्चान्विते शक्तिस्वीकारादन्वयस्य संसर्गरूपस्य पदोपस्थापिततया पदानुपस्थितस्यार्थस्य शाब्दबोधे भानं न सम्भवतीति अन्विताभिधानवादिनो मतम् **अन्वितप्रतिपत्तिवादिनो नैयायिका** नाद्रियन्ते । अन्वितप्रतिपत्तिवादस्येदमाकूतम् – पदानामभिधातृश-

यच्च पदार्थः पदविज्ञातैर्वाक्यार्थः प्रतिपद्यत इति तदेकदेशकीर्त्तनमात्रम्। पदार्थोपस्थापकं पदं वा पदोपस्थापिताः पदार्था वा करणमित्यत्र विनिगमकाभावात् आनन्तर्यात् पदार्थास्तथेति चेत् ? प्राथम्यात् पदान्येव तथेति स्यात्। स्याच्च सर्वत्र चरमकारणानामेव करणत्वम्, न च पदान्यथासिद्धानि परिगणितमध्येषु निवेशाभावात्। २।

क्तिस्तथा तात्पर्यशक्तिरिति द्विविधा शक्तिरस्ति। तत्राभिधात्री शक्तिर्नान्वितविषया, किन्तु अन्वयव्यतिरेकाभ्यां विविक्तस्वार्थविषयैव, तात्पर्यशक्तिस्तु अन्वितार्थं गमयति। तथाच पदानि अन्वयव्यतिरेकावगतनिष्कृष्टस्वार्थविषयानि तात्पर्यशक्त्यान्वितार्थबोधपर्यन्तं व्यापारं कुर्वन्ति अन्वितप्रतिपत्तिं जनयन्तीति अन्वितार्थे वाक्यस्य प्रतिपत्तिर्ज्ञानमिति व्युत्पतिः, न तु पदानामन्वितार्थे शक्तिरिति ध्येयम्। अन्विते शक्तिस्वीकारे प्रतियोगिनामानन्त्येन अनन्तप्रतियोग्यन्विते शक्तिग्रहो न सम्भवति। सम्भवेऽपि गौरवं पदस्य वाक्यस्थानीयत्वं च स्यात्। इतरान्वितस्वार्थस्य वाक्यार्थरूपतया तत्र शक्तिस्वीकारे पदस्यैव साक्षद् वाक्यार्थबोधकतया वाक्यस्थानीयत्वं स्यात्। अपि चैकस्य पदस्य स्वार्थबोधकत्वे पदान्तरस्य तदर्थान्वितस्वार्थबोधकत्वं व्यर्थं स्यात् , पुनरुक्तिरपि प्रसज्येत। गोपदेन गोत्वार्थस्य बोधने पुनरम्पदेन गोत्वान्वितकर्मत्वबोधनात् गोत्वार्थस्य पुनः भानं भवेदिति पुनरुक्तिः स्यात्। तेन तदपेक्षया लाघवात् पदानां शक्तिः स्वार्थे संसर्गस्य त्वाकांक्षयैव भाने तत्र शक्तिस्वीकाराभावे लाघवमेव। पदानुपस्थाप्यस्वार्थस्य शाब्दबोधे भानाङ्गीकारे प्रत्यक्षाद्युपस्थितस्यार्थस्य शाब्दबोधे भानापत्तिर्न भवति। संसर्गस्तु पदोपस्थितपदार्थयोरेवाकाङ्क्षया भासते, न तु प्रमाणान्तरोपस्थितार्थस्य संसर्गतया भासते। एवं प्राप्ते प्राभाकरैरुच्यते – 'मैवम्। आकांक्षादित्रयस्योपलक्षणत्वात्। आकांक्षितं सन्निहितं योग्यं यदर्थान्तरं तदन्विते शक्तिग्रहणात्।' (त॰ र॰, प॰ ३०) इति। तदुक्तम् – 'यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते। तेन तेनान्वितः स्वार्थः पदैः समधिगम्यते॥' (शब्दशक्तिप्रकाशिकायामुद्धृतम्, पृ॰ १८४) इति। प्राभाकराणां मते पदार्थस्तावत् वाक्यार्थस्थानीय इत्युक्तम्। कार्यरूपो वाक्यार्थः इति वैयाकरणभाट्टप्राभाकराश्च सन्तिष्ठन्ते। कार्यम् = क्रिया। अन्विताभिधानवादिनः प्राभाकराः केचिद्वेदान्तिनश्चाशङ्कन्ते – न चेत् पदानाम् अन्वितार्थे शक्तिः स्वीक्रियते तर्हि वाक्यात् कथं गवान्वितकर्मत्वान्वितानयनान्वितकार्यत्वस्य बोधः सम्भवेत्। यो ह्यर्थः पदस्य शक्त्या न ज्ञायते तादृशोऽर्थः कथं वाक्ये शाब्दबोधविषयो भवेत्। न हि शब्दातिरिक्तप्रमाणेभ्योऽर्थः शाब्दबोधविषयो भवति। अतोऽन्वितार्थे एव पदानां शक्तिः स्वीकर्त्तव्या। आवापोद्वापयोरन्वितगोचरत्वात् गामानयेत्युक्ते गोपदमानयेत्यन्वितस्वार्थस्य बोधकम्, एवमानयेति पदमपि। तथाचैतन्मते पदानां (न तु पदार्थानां) कार्यान्वितस्येतरान्वितस्य वा स्वार्थस्य प्रत्यायकत्वं (= वाचकत्वम्) अङ्गीक्रियते। प्राभाकरमते स्मारिका अनुभाविका नाम पदस्य द्वे शक्ती स्वीकृते स्तः। गवादिपदस्य स्मारिका शक्तिर्गवादावेव वर्त्तते। स्मारिकया गवादिपदात् केवलं गवादिरूपार्थस्य स्मृतिर्जायते। अयं न शाब्दबोधो वक्तुं शक्यते। अनुभाविकया चैकपदार्थेऽपरपदार्थस्यान्वयबोधरूपः शाब्दबोधो जायते। 'ततश्चान्विते शक्तिग्रहादन्विताभिधायित्वं पदानां सिद्धम्।' (त॰ र॰, पृ॰ २९)। प्राभाकर-

(वैशेषिकमतनिराकरणम्)

वैशेषिकाः शब्दमनुमान एवान्तर्भावयन्ति । तत्तु न युक्तम् ,पदानां पदार्थानुभावकानामेवाकाङ्क्षादिज्ञानसहकारेण विशिष्टानुभावकताया अपि सम्भवे परामर्शस्य

मीमांसकमते पदस्य कार्यान्वितस्वार्थेऽनुभाविका शक्तिः, अन्येषाञ्च वेदान्तिनां मते इतरपदार्थान्वितस्वार्थे सा स्वीक्रियत इति विवेकः । तदुक्तम् – 'सकलपदान्तरपूर्तावितरपदार्थैः समन्वितं स्वार्थम् । सर्वपदानि वदन्तीत्यन्येषामन्विताभिधानमतम् ॥' (मान०, पृ० ९७) इति । पदानि वाक्यं पदार्थञ्च वाक्यार्थं स्वीकृत्य 'संहत्यार्थमभिदधति पदानि वाक्यमेकार्थः पदसमूहो वाक्यमिति वाक्यविदां मीमांसकानां (न्या० म०, पृ० (१) ३६६) मतं यदन्विताभिधानवादिनः समुद्घोषयन्ति तदपि न संगच्छते । पदानि स्मारिकया स्वं स्वमर्थं बोधयित्वानिवृत्तव्यापाराण्यपि संसर्गबोधरूपं वाक्यार्थं जनयतीति न रोचतेऽभिहितान्वयवादिभ्यः । पदानामभिधाशक्त्या ज्ञाता येऽर्थास्तेऽभिहिताः,तेषामभिहितानां पदार्थानां शक्त्या वा लक्षणया वा योऽन्वयबोधः सोऽभिहितान्वयबोधः । अन्वयबोधोऽयं वाक्याद् लभ्यते, वाक्यान्न पदार्थो ज्ञायते – पदार्थस्तु पदानामर्थः । स चेद् वाक्यर्थः स्यात् तर्हि वाक्यस्य ज्ञापकत्वेन अप्रामाण्यं स्यात् । अतः पदात् अज्ञातो यः पदार्थान्वयः स एव वाक्यस्यार्थः इति वाक्यस्य प्रामाण्यं सिध्यति । एतादृशाभिहितार्थानामन्वयो येनाभ्युपगम्यते सोऽभिहितान्वयवादी कथ्यते । स च भाट्टः कश्चिद् वेदान्तवादीति । भाट्टमते – 'न च पदार्थाद्वाक्यार्थोवगतिरसम्बन्धात् ' (मी० भा०, पृ० ११२) भाष्यं प्रमाणाय कल्पते । आचार्यैरप्युक्तम् – 'पदार्थानेव वाक्यार्थं य सामस्त्येन मन्यते । गौरश्वः पुरुषो हस्तीत्यत्राप्यस्य प्रसज्यते ॥' (श्लो० वा०, पृ० ६१७) इत्यतोऽर्थान्तरान्तिरूपो विशेषो वाक्यार्थः न पदार्थः । आनुपूर्वीविशिष्टवर्णसमूहः पदम् । आनुपूर्वी च शक्तिविशिष्टा, अतः 'शक्तं पदमिति तु युक्तम्' (भा० चि०, पृ० ५५) न तु विभक्त्यन्तं पदमिति वैयाकरणमतं संगतम् । पदसमूहश्चाकाङ्क्षादिसध्रीचिना वाक्याय कल्पते । वाक्यात्मकः शब्दो वाक्यार्थज्ञानरूपं संसर्गज्ञानम् (= अन्वयबोधः) प्रमा सर्वैरास्तिकदार्शनिकैरुच्यते । एवं चेत् एकार्थकपदसमूहो वाक्यमुच्यते । शब्दपदयोरत्र पर्यायार्थत्वम् । तेन च पदार्थः पदार्थज्ञानं वाक्यार्थज्ञानञ्च स्थानविशेषे शाब्दप्रमा भवति । पदार्थं प्रति पदस्य, पदार्थज्ञानं प्रति पदपदार्थयोः, वाक्यार्थज्ञानं प्रति पदपदार्थवाक्यार्थानाञ्च **समुच्चयेनेव** कारणताङ्गीक्रियते तेषामेकार्थत्वात् । 'एकार्थत्वं चानेकमुख्यविशेष्यराहित्यम्' (भा० चि०, पृ० ४८) । यथा पश्य मृगो धावतीत्यादौ आख्यातार्थो भिन्नोऽपि दर्शनरूपाख्यातार्थेऽन्याख्यातार्थः प्रकारीभूय एकवाक्यत्वं प्रतिपाद्यते । तदुक्तं **वाक्यानामिति** । अतएव वाक्यार्थबोधरूपे शाब्दबोधे पदज्ञानं करणं शक्तिज्ञानं सहकारि वाक्यार्थबोधश्च फलम् । १ – २ ।

वैशेषिकाः शब्दस्य प्रामाण्यस्वीकारेऽपि नानुमानातिरिक्तप्रमाणतया शब्दं स्वीकुर्वते । तथाहि – पदसमूहात्मकं वाक्यं श्रुत्वा श्रोता प्रथमतः पदानि बुध्यते, अर्थात् श्रोतुः पदज्ञानं प्रथमं जायते इत्यत्र सर्वेषामविवादः । पदज्ञाने जाते पूर्वं शक्तिज्ञानसम्भवे तेन शक्तिज्ञानेन पदानामर्थान् स्मरति अभिव्यञ्जयति वा श्रोता । ततश्च पदार्थानां संसर्गज्ञानरूपशाब्दबोधो जायते । अयं शाब्दबोधः पृथक् प्रमातया **पदज्ञानञ्च** प्रमाणतया नैयायिकैर्भाट्टमीमांसकैश्च

कल्पकाभावात् गृहीतशक्तिकं च पदपदार्थानामनुभावकमेव, पदार्थगोचरसंस्कारस्य पदार्थज्ञानकारणत्वे मानाभावात् । शक्तिगोचरसंस्कारस्त्वपेक्षितोऽपि न समानविषयक इति न पदार्थस्मृतिं जनयति । अतएव न पदार्थबुद्धौ तत्ता भासते । तदाहुः –

'पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते ।' (श्लो॰ वा॰, पृ॰ ३०६) इति । ३ ।

स्वीक्रियते । प्राभाकरमीमांसकैस्तु वैदिकवाक्यस्य शाब्दत्वं स्वीकृत्यापि लौकिकवाक्यस्यानुमानगम्यत्वं वैशेषिकरीत्या प्रपिपद्यते । वैशेषिकैस्तूभयविध एवान्वयबोधोऽनुमीयते । उक्तञ्च पार्थसारथिमिश्रैः – 'इदं च शाब्दम् अस्येदं कारणं कार्यं सम्बन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकम् इत्यनुमानलक्षणमभिधाय 'एतेन शाब्दं व्याख्यातम्' (वै॰ सू॰ ९/२/१, ३ पृ॰ ४८५, ४९६) इति वदन्तः काश्यपीयाः, 'प्रत्यक्षमनुमानं च द्वे एव प्रमाणे' इति ब्रुवाणाः सौगाताश्चानुमानादभिन्नमिति मन्यन्ते ।' (शा॰ दी॰, पृ॰ २०५) इति । ज्ञानप्रामाण्यस्य वैशेषिकमते उत्पत्तौ ज्ञप्तौ च परतस्त्वाद्वेदवाक्येभ्यो लोकानामर्थज्ञानं भवति । तस्यार्थज्ञानस्य प्रामाण्यमाप्तोक्तत्वेनानुमीयते । तद् यथा – 'अग्निमीळे' इत्यादिवाक्यात् उत्पद्यमानमर्थज्ञानं प्रमा तादृशपदार्थसंसर्गप्रमाज्ञानाश्रयेश्वरोक्तिजन्यत्वात् यद् यद् वाक्यार्थज्ञानं तादृशसंसर्गप्रमावदाप्तपुरुषोच्चारितपदजन्यं तत्तत्प्रमारूपं भवतीति तादृशवेदवाक्यजन्यज्ञानस्य यथाभूतसंसर्गज्ञानवत् ईश्वरोक्तिजन्यत्वेन तज्ज्ञानजनकस्य वेदवाक्यस्यापि ईश्वरोक्तत्वेन प्रामाण्यं सिध्यति । मीमांसकैः प्रामाण्यस्य स्वतस्त्वं स्वीक्रियते, तेन तन्मतेऽत्रैतादृशानुमानेनालम् । वैशेषिका लौकिकवाक्यानामप्यनुमानेन गतार्थत्वमाहुः । तथाहि – अस्तित्वं गवीयं गौरस्तितावान् वा गौरस्वीत्याद्याकाङ्क्षादिमत्पदकदम्बकत्वादिति चेत् ? **तत्तु न युक्तं** समीचीनमित्यर्थः । यतः शब्दः सद्य एव साकाङ्क्षायोग्यतासत्तिधीसामग्रीमात्रेण नानुमितौ हेतुर्भवति । अनुमितौ तु व्याप्तिज्ञानादेर्हेतुता वर्त्तते । पदानां पदार्थानुभावकानामाकाङ्क्षादिधीसध्रीचिना विशिष्टानुभावकता सम्भवति ; अतस्तादृशपदोपस्थाप्यस्यैवार्थस्य संसर्गावगाहितया नियन्त्रितार्थविषयको बोधो भवति । अतोऽस्ति गौरस्तितावान् वा गवीयं गामानय इत्यादिसाकाङ्क्षशब्देभ्यः स्वस्ववृत्त्या पदार्थानामुपस्थित्युत्तरं गवादावस्तितादेरन्वयावगाही शाब्दत्वाख्यवैजात्यवद्रूपविलक्षणो बोधो जायते । शब्दोपस्थाप्यस्यार्थस्य संसर्गमर्यादया लक्षणया वा वाक्यार्थबोधविषयस्यानुमितित्वे यदि पदपक्षकानुमितिर्भवेत् – इमानि पदानि स्वार्थसंसर्गवन्ति इत्याकारिका स्वीक्रियते – तर्हि तत्र कस्तावत् हेतुः ? यद्युच्येत आकाङ्क्षायोग्यतासन्निधिमत्पदकदम्बवत्त्वादिति तर्हि उच्यते आकाङ्क्षा पदेऽस्ति परन्तु योग्यता न पदे । अर्थस्य बाधाभावरूपान्वयप्रयोजकधर्मवत्त्वं योग्यतेति योग्यतायाः पदार्थवृत्तित्वात्, अविलम्बेन पदोपस्थाप्यार्थानामुपस्थितिरूपाया आसत्तेः (= सन्निधेः) नियमात् अर्थवृत्तित्वात् तादृशहेतुता न सम्भवति । यदि च पदार्थपक्षिका अनुमितिरुच्येत एते पदार्था मिथःसंसर्गवन्तः आकाङ्क्षादियुक्तपदोपस्थाप्यत्वादिति तर्हि तत्रापि योग्यतासत्त्योः पदवृत्तित्वाभावेन तादृशहेतुत्वस्य न सम्भवः । एवञ्च यदि शाब्दबोधमात्र-

ननु स्मारकं यद्यनुभावकं तर्हि पदार्थधीः प्रथमा स्यादित्याशङ्क्योक्तमभ्यधिकाभावादिति । योऽर्थः पूर्वं गृहीत स एव तज्जन्यबोधे भासते नाधिक इत्यनुवाद एवायं, गृहीतमात्रविषयकसंस्कारजन्यत्वात् । ४ ।

(बौद्धमतनिराकरणम्)

बौद्धास्तु पदार्थबोधमपि पदान्यनुमानविधया जनयन्ति । तथाहि – पदानि पदार्थबोधकानि वृद्धैस्तत्र प्रयुज्यमानत्वात्, यन्नैवं तन्नैवं यथा ध्वनिरिति चेत् ?

स्यानुमितित्वेन भानं भवेत् तदा गां शाब्दयामि गवीयं वास्तित्वं शाब्दयामि इत्यनुभवस्यानुपपत्तिर्भवेत् । अथ नव्यवैशेषिकानां – 'गौरस्तितावान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वात् घटवत्, अस्तिपदसमभिव्याहृतगौःपदस्मारितत्वाद्वा चक्षुर्वदि'ति (श॰ प्र॰, पृ॰ १३) अनुमाने गौः पक्षः, अस्तितावत्त्वं साध्यम्, स्वधर्मिकेत्यादिपदस्मारितत्वपर्यन्तं हेतुः । अनेनानुमानेन गवादौ अस्तित्वादेरनुमितिर्भवतीति किम् अन्वयबोधनामकातिरिक्तानुभवस्वीकारेण ? अत्रेयमाशङ्का परिह्रियते – आकाङ्क्षा नामान्वयबोधानुकूलानुपूर्वी पर्यवसिता, नान्यविधा अकाङ्क्षा सम्भवति । अन्यविधाया आकाङ्क्षायाः स्वीकारे कदाचित्तादृशी आकाङ्क्षा पक्षे गवादौ सम्भवति, परन्तु नान्यविधाकाङ्क्षा प्रमाणसिद्धा । एवञ्च तादृश्या आकाङ्क्षायाः शब्दधर्मत्वात् गवादौ पदार्थरूपपक्षेऽसत्त्वात् हेतुतावच्छेदकविशिष्टस्य हेतोः पक्षेऽसत्त्वात् स्वरूपासिद्धिरेव । अतो न तादृशाकाङ्क्षावत्त्वहेतोरन्वयानुमितिर्भवति । इत्येवं दोषे प्रदत्ते नव्यवैशेषिका उक्तानुमितौ अस्तिपदेत्यादिस्मारितत्वाद्वेति हेत्वन्तरं कथयन्ति । अनुमानमिदं विशेषव्याप्तिमूलकम् । एतद्विशेषव्याप्तौ दृष्टान्तसम्भवान्न सामान्यव्याप्त्यपेक्षया जघन्यत्वमिति ध्येयम् । अत्रापि गौःपदस्मारितत्वमेव हेत्वन्तरं परिचायकम् । परन्तु आकाङ्क्षाया अभावे गौः घटः पटः अस्ति इत्यादिपदेभ्यो न शाब्दबोधो भवति । यत्पदव्यतिरेकेण यत्पदस्यान्वयानुभावकत्वं नास्ति तयोः पदयोः पदानां वा शाब्दबोधे हेतुत्वमावश्यकम् । तेन घटं पश्येत्यादिपदेषु आकाङ्क्षावत्त्वात् शाब्दबोधो भवति । किञ्च पदजन्या पदार्थस्मृतिः स्वरूपसती एवान्वयबोधे उपयुज्यते, न तु ज्ञातासती प्रमाणाभावात् । वाक्यार्थबोधस्यानुमितित्वे सत्येव साकाङ्क्षादिपदत्वादिलिङ्गकत्वं कल्प्यम्, तत्तु असिद्धं प्रमाणाभावात् । अस्तित्वेन गामनुमिनोमीत्यादेरनुभवस्य तत्रासत्त्वात्, प्रत्युत गौरस्ति इत्यादिवाक्यात् अस्तित्वेन गौः श्रुतः न त्वनुभूतः इत्यनुभवो वाच्यः । एवंच गौरस्ति इत्याकाङ्क्षायोग्यतासत्तियुक्तशब्दैर्न अस्तितावान् गौरित्याकारकं लौकिकिप्रत्यक्षं न वा अस्तित्वं गवीयमित्याकारकमौपनायिकप्रत्यक्षं भवति तत्रौपनायिके प्रत्यक्षे आकाङ्क्षादीनामनुपयोगात् । अन्वयव्यतिरेकाभ्यामाकाङ्क्षादिमत्तया शब्दस्य ज्ञानं हेतुर्भवति,न तु पदार्थानामुपस्थितिमात्रम्, अस्तित्वेन गां जानामीत्येवंव्यपदेशसाक्षिकत्वरूपविशिष्टबुद्धेरानुभविकत्वात् । विशिष्टबुद्धेरानुभविकत्वानङ्गीकारे पर्वतो वह्निमानित्यनुमितिस्थलेऽपि वह्निं जानामि पर्वतं जानामीत्येवं प्रत्यक्षत्वमापद्येत ।

न,प्रथमश्रुतपदानां तादृशानुमानाभावात्, गृहीतसंकेतानां तथानुमाने तु अलमनुमानेन, संकेतग्रहस्य सम्बन्धज्ञानत्वेन स्मृतिहेतुतायां क्लृप्तत्वेन तत एव तदुत्पत्तेः । तज्जन्यतावच्छेदकं च गृहीतविषयकज्ञानत्वं न तु संस्कारजन्यज्ञानत्वं स्मृतित्वं वा हस्तिपकदर्शनजहस्तिज्ञानस्यापि तज्जन्यत्वादिति दिक् । ५ ।

एवं शब्दातिरिक्तस्य मनःसहकारिणोऽभावात् नापि ज्ञानमिदं मानसम् । आचार्यैरप्युक्तम् – 'विषयोऽन्यादृशस्तावत् दृश्यते लिङ्गशब्दयोः' (श्लो॰ वा॰, पृ॰ २९८) इति । अनधिकविषयतातुल्यता स्मृतौ वर्त्तते, तादृशान्वयबोधे तु संस्कारजन्यविज्ञातात् पदात् पदार्थबोधद्वारेण प्रत्युपन्नकारणकत्वमस्ति । अतो वाक्यार्थबोधो न स्मृतिः । तद्रघुनाथः स्ववचो द्रढयति – **पदमभ्यधिकेत्यादिना** । वैशेषिकमतनिराकरणेन बौद्धमतमपि निराकृतमिति । अधुना शब्दानुमानयोर्भेदः प्रदर्श्यते – पदवाक्यात्मकभेदेन शब्दो द्विविधः । तत्र वाक्यमनवगतसम्बन्धमेव वाक्यार्थं बोधयितुं शक्यते, नवश्लोकश्रवणे सति पदसंस्कृतधियां तदर्थावगत्युपलब्धेः । अतः सम्बन्धाधिगममूलकवृत्तिनानुमानेन तस्य न साम्यसम्भावना । पदस्य तु सम्बन्धाधिगमसापेक्षत्वे सत्यपि सामग्रीभेदात् विषयभेदाच्चानुमानाद् भेदः । तथाचानुमितौ व्याप्तिज्ञानपक्षधर्मतादिः सामग्री भवति, शाब्दबोधे तु पदज्ञानमासत्तिर्योग्यताकाङ्क्षा (तात्पर्यज्ञानं) चेति सामग्री । शाब्दबोधे स्वरूपसती आकाङ्क्षा भासते, अनुमितौ तु ज्ञातासती । शाब्दे पदवन्मात्रं पदस्यार्थः, अनुमितौ तु वाक्यार्थो विषयः । तद् यथा – पर्वतो वह्निमान् वह्निः पर्वते वेत्यनुमितिज्ञानस्य प्रतिपत्तेः, तत्र धर्मविशिष्टो धर्मी साध्यः । शाब्दे तु तथा न भवति । धर्मिणं विनापि शाब्दबोधो जायते, धर्मिव्यतिरेकेण केवलधर्मस्यानुमितिस्तु न जायते । यथा घटो नान्यः इति श्रवणानन्तरं घटप्रतियोगिकभेदवान् इति निर्धर्मिकः शाब्दबोधो भवति । अनुमितिस्तु केवलं वह्निमान् इत्येतादृशी नैवोत्पद्यते । परन्तु पर्वतो बह्निमान् इत्येवं जायत इत्यनुमितिशाब्दबोधयोर्महदन्तरम् । तेन चानुमानशब्दप्रमाणयोः सदैव पृथक्त्वम् ,न त्वनुमाने शब्दस्यान्तर्भावः । ३–४ ।

प्रागुक्तं वैशेषिकमतनिराकरणेन बौद्धमतं निराकृतमिति । तथापि बौद्धमतस्य विशेषमुल्लिस्य रघुनाथेन निराक्रियते **नेत्यादिग्रन्थेनेति** । तथाच अयम्भावः – अभिहितान्वयवादे पदैः स्वशक्तिवशात्पदार्था अभिधीयन्ते न तु स्मार्यन्ते । स्मार्यस्मारकभावसम्बन्धातिरिक्तसम्बन्धकल्पने गौरवादेकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीत्यतः स्मारकत्वमेव सम्बन्धः । यतो **हस्तिपकादौ** हस्त्यादिसंयोगादिना ज्ञातत्वेन स्मारकत्वं दृश्यते । अतोऽगृहीतग्राहित्वाभावान्नानुभाविकमिति वक्तुं न शक्यते । सम्बन्धाभावात् स्मारकमपि न भवितुं शक्यते । परन्तु शक्त्याऽगृहीतग्राहकमिति स्मारकसदृशमिति भाव्यम् । किञ्च पदार्थोपस्थितौ तत्तांशस्यानुलेखात्, तत्तांशोल्लेखाभावेन तत्तांशरूपस्मृतिप्रमोषकल्पने महद् गौरवम् । तस्मात् पदजन्यस्मृत्यनुभवविलक्षणज्ञानस्य विषयीभूता पदार्था अभिहिताः । पदाभिहिताश्च पदार्था आकाङ्क्षायोग्यतासन्निधिविशिष्टा वाक्यतात्पर्यानुपपत्त्या विशिष्टरूपं स्वान्वयमनुभावयन्तीति **अभिहिता-**

(पदवृत्तिनिरूपणम्)

पदानां क्रिया च त्रिविधा – अभिधा लक्षणा गौणी च । मुख्यार्थप्रतिपत्तिहेतुः पदव्यापारोऽभिधा । सा च पदज्ञानं पदगोचरः संस्कार एवेति । लक्षणा स्वशक्योपस्थितिः स्वज्ञाप्योपस्थितिर्वा, वाक्येऽपि लक्षणास्वीकारात् । न च स्वार्थस्यैव वृत्तिरिति वाच्यम् ।

'न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेषु पदानि नः ।' (श्लो॰ वा॰, पृ॰ ६४१) इति वार्तिकविरोधात् लक्ष्यार्थोपस्थितेः पदाजन्यत्वे लक्ष्यस्य शाब्दबोधविषयत्वानुप-

---

न्वयवादिनः । अभिहितान्वयस्येदमाकूतम् – विभक्तियुक्ताभ्यां पदाभ्यां पदयोः स्वार्थानुभवौ जन्येते, तादृशानुभवविषयत्वमेव पदार्थस्याभिहितत्वमुच्यते । पश्चात्तार्दृशानुभवाभ्यामेव विभक्तियुक्तपदार्थयोरन्वयापरपर्यायसंसर्गानुभवो जन्यते, न तु पदेन, न वा पदसङ्घातात्मकवाक्येन । तथाच पदाभिहितयोरर्थयोरन्वयबोधो भवति । अन्येषां भाट्टानां मते – अनन्वितावस्थोऽभिहितः पदार्थोऽन्वितावस्थां लक्षयति । तथाच – पदैः पदार्था एवाभिधीयन्ते, पश्चात् अर्थान्तरान्वितया तु लक्ष्यन्ते । अन्ये च भाट्टा नैतन्मतं सहन्ते । मुख्यार्थबाधे मुख्यार्थयोगे वाक्यार्थे वाक्यतात्पर्यानुपपत्त्या लक्षणा कुमारिलमते सम्मतेति ते सन्तिष्ठन्ते । अतएव पदजन्यस्मृत्यनुभवविलक्षणज्ञानविषयीभूताः पदार्थाः अभिहिताः । तादृशाश्चाकाङ्क्षाद्यनुसारेण स्वान्वयमनुभावयन्तीति वाक्यार्थो लक्ष्य इति येषां भाट्टानां मतं तन्नादरणीयम् । 'वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थितमिति (अद्वैतसिद्ध्यामुद्धृतस्य, पृ॰ ७०२) कुमारिलभट्टस्य वचनस्यायमाशयः – 'पदानां स्वार्थमात्रमभिदधतामेकप्रयोजनवत्पदार्थपरतयैकवाक्यत्वं सिध्यति ।' इति । ५ ।

'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' (मी॰ सू॰ १/१/२५, पृ॰ ३८) इति जैमिनिवचनाज् ज्ञायते – पदार्थज्ञानं वाक्यार्थबोधे हेतुरुच्यते पदार्थप्रतिपादकानि पदानि च विशिष्टक्रियां प्रकाशयितुमाकाङ्क्षादिसहितेनोच्चारितानि भवन्तीति । **क्रिया** नाम वाक्यार्थबोधौपयिकः सम्बन्धः । एतादृशः सम्बन्धस्तु वृत्तिशब्देनोच्यते प्रमाणरत्नेऽत्र च क्रियाशब्देनोक्तः । सर्वैः शब्दैः श्रूयमाणोऽपि सदा सर्वेषां न तदर्थप्रतिपत्तिर्नवा सद्यः, किन्तु कदाचित् शब्दैः केषाञ्चित् स्वल्पचिरेण अर्थप्रतिपत्तिर्जन्यते । तादृशार्थप्रतिपत्त्या कल्प्यतेऽर्थप्रतिपत्तिसम्पादिनी पदपदार्थसम्बन्धविशेषज्ञानजनितपदार्थस्वार्थोपस्थितिरेव । तस्य सम्बन्धविशेषस्य सामान्यतो विशेषतश्च क्रियात्वं (= वृत्तित्वम्) इत्युच्यते । अतः क्रियापदेनात्र वाक्यार्थबोधौपयिकः पदपदार्थसम्बन्धविशेषोऽभिधीयते । तादृशसम्बन्धविशेषं विना न पदात् पदार्थोपस्थितिर्भवति । अतो वाक्यार्थबोधे पदपदार्थसम्बन्धविशेषयरूपक्रियाया उपयोगित्वमस्त्येव । तदर्थं **क्रियापदं** रघुनाथैः प्रयुक्तम् । अर्थे इत्यनुक्तौ क्रियात्वं वाक्यार्थबोधानुकूलज्ञानविषयसम्बन्धत्वम्, तच्च अभिधादाविव आकाङ्क्षादिज्ञानविषये तत्तत्पदान्यवहितोत्तरत्वरूपसम्बन्धादावप्यस्ति । अतो ग्रन्थे अनुक्तावपि वाक्यार्थबोधापत्तिस्तादृशस्थले वारणार्थम् **अर्थे**

पत्तेश्च । गङ्गायामित्यादौ तीरस्य सप्तम्यर्थानुपपत्तिश्च प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् प्रत्ययानाम् । न च प्रकृत्यर्थपदं प्रकृतितात्पर्यविषयमात्रपरमिति वाच्यम् । तथा सति धूमे रूपमित्यतो धूमे रूपमिव वह्नौ रूपमित्यादि विनैव लक्षणां बोधः स्यात् । परम्परया वह्नौ तात्पर्यसत्त्वात् स्याच्च धूमोऽस्तीति वाक्यादग्निरस्तीति धीरिति । ६ ।

लक्षणा निरूढा साम्प्रतिकी चेति द्विधा । वाक्यार्थेऽपि च लक्षणावश्यं वाच्या । अन्यथा वृत्तिरहिते तत्र शाब्दबोधविषयता न स्यात् । किञ्च घटशक्तस्य

इति पदमूहनीयम् । तथाच अव्यवहितोत्तरत्वादेरर्थप्रतियोगिकत्वाभावात् न वाक्यार्थबोधापत्तिः । पचतीत्यादौ योग्यताज्ञानविषये पाकादिप्रतियोगिकानुकुलत्वादौ क्रियात्ववारणार्थं **पद**शब्दस्योपादानम् । तथाच तादृशानुकूलत्वादेः पदानुयोगिकत्वाभावात् न क्रियात्वापत्तिः । पदानामिति षष्ठ्यर्थः अनुयोगिकत्वं पक्षे प्रतियोगिकत्वम् । अर्थे इत्यत्र सप्तम्यर्थः प्रतियोगिकत्वं पक्षे अनुयोगिकत्वम् । तथाच अर्थप्रतियोगिकः पदानुयोगिकः अथवा अर्थानुयोगिकः पदप्रतियोगिकः वाक्यार्थबोधस्यौपयिकसम्बन्धः अभिधालक्षणागौणीत्रयमिति वाक्यार्थबोधः । चकारः समुच्चयः, तच्च धीविशेषविषयत्वं त्रित्वं पर्यवसितम् । एवञ्च पदपदार्थसम्बन्धविशेषज्ञानजनितपदार्थसमूहोपस्थितौ पदपदार्थसम्बन्धविशेषस्य कुत्रचित् अर्थप्रतियोगिकपदानुयोगिकत्वं कुत्रचिच्च पदप्रतियोगिकार्थानुयोगिकत्वमस्ति ।

शक्तं पदमित्युक्तम् । अतः शक्तिमत्त्वं पदस्य मुख्यार्थः । शक्तिः न्यायमते ईश्वरेच्छा इच्छामात्रं वा, वैयाकरणानां मते बोधकत्वमेव । मीमांसकमते तु सा पदार्थान्तरम् । अस्या एव संकेत इति व्यवह्रियते । मुख्यार्थस्य प्रतिपत्तेः = ज्ञानस्य हेतुर्यः पदव्यापारः **साऽभिधाभिधी**-यते । सा च **पदज्ञान**मित्यादि स्वरूपकथनम् । अयमेव अभिधाज्ञानस्योपयोगो यत् पूर्वमभिधाज्ञानाभावे पदज्ञानादिरूपस्मृतिसामग्रीसत्त्वेऽपि पदार्थस्मरणानुत्पत्तिः भवति । तेनाभिधाज्ञानस्य पदज्ञानस्यैव पदार्थस्मृतिहेतुत्वम् । वाक्यार्थबोधं प्रति अनुकूलः पदपदार्थयोर्मुख्यसम्बन्धोऽमिधा । पदज्ञानस्य गोशब्दे गोशक्तपोदज्ञानत्वेन हेतुः । गोशब्दः सास्नामत्प्राणिनि शक्तः शक्तिविशिष्टः । शक्तिग्रहोपायो मीमांसकैर्नैयायिकवदुच्यते – 'शक्तिग्रहो व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥' इति कारिकाया भाट्टचिन्तामणावुपलभ्यत्वात् । अपिच मीमांसकाः शक्तिं पदार्थज्ञाननिरूपितामाहुः न तु पदार्थनिरूपिताम् । निरूपकतासम्बन्धेन शक्तिः पदज्ञाने वर्त्तते, किन्तु येन प्रकारेण पदार्थज्ञाननिरूपितशक्तौ स्वीक्रियमाणायां पदार्थो वाच्यो भवति तेन प्रकारेण पदज्ञाने शक्तिस्वीकारे पदमेव वाचकं स्यात् – न तु पदज्ञानम् । अतोऽतीतानागतपदस्य ज्ञानात् वाक्यार्थबोधोत्पत्तावपि पदज्ञानस्य कारणत्वमभ्युगम्यते – न तु पदमात्रस्य । ६ ।

मुख्यार्थबाधे मुख्यार्थयुक्तायुक्तान्यतरभिन्नार्थो रूढ्या प्रयोजनाद्वा यया क्रियया बोध्यते सा लक्षणाभिधीयते । केचित् सादृश्यभिन्नशक्यसम्बन्धेनाशक्योपस्थितिं लक्षणामाहुः । तत्तु गागाभट्टैर्निरस्तम् । स्वशक्यसम्बन्धोपस्थितिर्लक्षणेति रघुनाथस्याशयः । प्राभाकरमतेऽपि मुख्यार्थस्य वाक्यार्थे सम्बनधानुपपत्त्या ययान्वय उपपद्यते सा क्रिया लक्षणोच्यते (प्र॰ पं॰,पृ॰ ३९८ – ३९९) । यथा – छत्रिणो गच्छन्ति इत्यत्र छत्रिशब्देम छत्र्यच्छत्रिसमुदायो लक्ष्यते, छत्रिशब्द-

पदस्याशक्यत्वाविशेषात् पटान्वयबोधकत्वमपि स्यात् । यदि च शक्यप्रतियोगिकमेव बोधयतीति शक्यप्रतियोगिकत्वमेव नियामकमुच्यते, तदायातं लक्षणया, शक्यसम्बन्धस्य लक्षणात्वात् । अपिचास्त्येव शक्येन सह वाक्यार्थस्य सम्बन्धः शाब्दबोधनियामकश्च स इति । लक्षणायाः कोऽंशो नास्ति ? लक्षणा ज्ञातैवोपयुज्यते वृत्तित्वादिति चेत् ? न, शाब्दबोधानुकूलपदपदार्थसम्बन्धस्यैव वृत्तित्वादिति दिक् । ७ ।

स्यार्थश्च न परित्यक्तः । गंगायां घोषः इत्यत्र प्रवाहरूपो मुख्यार्थः परित्यज्यते । मीमांसकैः लक्षणाया वीजमन्वयानुपपत्तिर्मन्यते, न तु नैयायिकवत् तात्पर्यानुपपत्तिः वेदे तदसम्भवात् । 'यष्टीः प्रवेशय इत्यादौ तु प्रवेशनपदस्य भोजनप्रयोजनकप्रवेशनपरत्वग्रहादन्वयानुपपत्तिरेव' वर्त्तते (भा॰ चि॰, पृ॰ ५८) । मीमांसकैः वाक्ये शक्तिः स्वीक्रियते । तदुक्तम् – 'वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैव हि लक्ष्यते ।' (तन्त्ररहस्ये उद्धृतम्, पृ॰ २८) । तेषां मते गम्भीरायां नद्यां घोषः इति वाक्यार्थस्य गम्भीराभिन्ननदी नद्यास्तीरेण सम्बध्यते इत्यतो ज्ञायते वाक्ये एव लक्षणा स्यादिति । वार्त्तिककृद्वचनस्यान्यथार्थोऽपि निष्कर्ष्यते । गंगापदस्य भगीरथरथखाताविच्छिन्नजलप्रवाहरूपवाच्यार्थस्य वाक्यार्थेऽन्वयः उपपद्यते, अतो नास्ति लक्षणाया प्राप्तावकाशः । लक्षणायाः पदनिष्ठत्वं स्वाश्रयसम्बन्धिवाचकत्वसम्बन्धेन इत्याह गागाभट्टः (भा॰ चि॰, पृ॰ ५७) । तन्मते अजहत्स्वार्थजहत्स्वार्थभेदेन लक्षणाया द्वैविध्यं स्वीकृतम् । स्वशक्यार्थेन सहान्वयबोधस्य प्रयोजिका अजहत्स्वार्था नाम लक्षणा । यथा – यष्टीः प्रवेशय इत्यत्र यष्ट्या सह यष्टीधारिणां पुरुषाणां प्रवेशो बोध्यते । आलंकारिका इमामुपादानलक्षणामाहुः । स्वशक्यार्थराहित्येन अन्वयबोधस्य प्रयोजिका लक्षणा जहत्स्वार्था । यथा – गंगायां घोषः । अत्र लक्षितलक्षणान्तर्भूयते । यथा – द्विरेफपदेन भ्रमरपदं लक्ष्यते । जहदजहत्स्वार्था नामान्या लक्षणापि वेदान्तिभिः स्वीक्रियते । यथा – तत्त्वमसिवाक्यं परोक्षापरोक्षत्वादिविशिष्टतत्त्वमपरोक्षत्वादिविशिष्टत्वं परित्यज्य अखण्डचैतन्यमात्रं बोधयति लक्षणया । रघुनाथस्तु **निरूढा साम्प्रतिकी**ति भेदद्वयं लक्षणाया अङ्गीकरोति । यस्य शब्दस्य यस्मिन् अर्थे नास्ति शक्तिः तथापि लक्षणया तस्य शब्दस्य तस्मिन् अर्थे प्रयोगोऽनादिकालात् भवति सा क्रिया निरूढा लक्षणा । यथा – नीलो घटः इत्यादौ नीलादिशब्दो गुण्यर्थे प्रयुज्यते – यद्यपि नीलादे- र्गुणवाचकतारूपोऽर्थः सिद्ध एव । मादृशामिच्छामूलिका लक्षणा साम्प्रतिकी । यथा – घटत्वावच्छिन्नेऽर्थे पटशब्दस्य प्रयोगश्चेत् सा साम्प्रतिकी । इयमेव लक्षणा आधुनिकी कथ्यते । तथाहि – 'सादितातपर्यमूलकतद्धर्मावच्छिन्नविषयकशाब्दबोधजनिका लक्षणा तद्धर्मावच्छिन्ने आधुनिकी ।' (श॰ प्र॰ टी॰, पृ॰ १५५) इति । ७ – ८ ।

एके = आलंकारिकादयः । तेषां मते सारोपाध्यवसनाभ्याम् अष्टप्रकारा अपि लक्षणाः शुद्धा गौणी चेति भेदेन षोडश प्रकाराः । सादृश्यसम्बन्धस्य प्रयोजकश्चेयं गौणी भवति लक्षणा गौर्वाहिकः मुखचन्द्रः इत्यादौ सादृश्यमुपचारं वावलम्ब्य गौणी लक्षणांगीक्रियते । यद्यपि सरस्वतीकण्ठाभरणे लक्षणातो भिन्ना गौणी स्वीकृता तथापि ड॰ रविशंकरेण – न हि सम्बन्धमात्रकृते भेदे वृत्त्यन्तरकल्पनगौरवं सह्यमिति नास्ति गौण्या वृत्त्यन्तरत्वम् । (व्य॰ वि॰, पृ॰ ४७) इत्युक्तम् । एवं 'सादृश्यरूपशब्दसम्बन्धो गौणी । तेन लक्षणान्तर्गता सेति नैयायिकाः ।' (भा॰ चि॰, पृ॰ ५८) इति । मीमांसकैस्तु गौणी नाम स्वतन्त्रा क्रिया स्वीक्रियते ।

मुख्यस्य च पदेन सह शक्यज्ञानविषयतावच्छेदकत्वमेव सम्बन्धः । नन्वीश्चरेच्छा बोधकबोध्योपहिता, मानाभावात् घटपदस्य घटज्ञानजनकताया उभयस्वीकृतत्वात् । न च घटपदस्य घटं करोतीत्यादौ कपालस्य जनकत्वात् कपाले शक्त्यापत्तिः । साक्षाज्जनकताया एव शक्तित्वादन्यथा तवाप्यप्रतीकारात् । घटपदस्य

विपक्षिमतं निराकर्तुमाह – तन्नेत्यादि । सादृश्यं यदि सम्बन्ध एव तर्हि सम्बन्धमात्रं बोधयितुं षष्ठी एवोपपद्यते न तु प्रथमादिर्विभक्तिः । तेन अग्निर्माणकः इति प्रयोगम् अकृत्वा **अग्नेर्माणवकः** (= अग्निसम्बन्धविशिष्ठो माणवकः) इति प्रयोगः स्यात् । यद्वा अग्निर्माणवकः इति प्रथमान्तप्रयोगादपि **अग्नेर्माणवकः** (अग्निसम्बन्धविशिष्टो माणवकः इत्यर्थः) इति **प्रतीतिः** आपद्येत । किन्तु एतन्न भवति । अतएव **सादृश्यज्ञानमपि क्रियान्तरं** (= वृत्त्यन्तरम्) एव स्वीकर्त्तव्यम् । कुमारिलभट्टमते – लक्ष्यमाणगुणयोगनिमित्तिका क्रिया गौणी । यथा – अग्निर्माणवक इत्यत्र अग्निपदलक्षिताग्निगुणतेजोदाहकप्रकाशकत्वादिसम्बन्धनिमित्ता अन्यत्र क्रिया (= वृत्तिः) भवति । किन्तु अग्निनिष्ठदाहकत्वादयो माणवके न सम्भवन्ति । अतः प्रसिद्धार्थत्यागेनाप्रसिद्धगुणवाचकत्वं यदि गौण्या लक्षणमुच्येत तदा अग्निपदेन प्रसिद्धार्थाग्नित्वत्यागेन माणवकनिष्ठदाहकत्वादि शक्त्योच्यते सामानाधिकरण्यञ्च मत्वर्थीयलक्षणयोपपद्यत इति, परन्तु प्रसिद्धार्थत्यागस्य तात्पर्यग्रहाधीनतया वैदिकवाक्ये तदसम्भवात् तादृशं गौणीलक्षणं न संगतमिति ध्येयम् । आरोपितार्थवाचकत्वं गौण्या लक्षणमिति केचिदाहुः । यथा – अग्निर्माणवक इति प्रयोक्ता अग्नित्वादिकं माणवके आरोप्य वाक्यं प्रयुङ्क्ते बोद्धा च तथैव बुध्यते । आरोपश्चात्राहार्यः । आलंकारिकैर्वासनाविशेषजन्यत्वोत्प्रेक्षित आहार्य इत्युच्यते । तस्मात् शुक्तिकारजते न गौणता, तदारोपस्य कारणदोषजन्यत्वेन आहार्यत्वविरहात् । एतदपि न संगतम्, आरोपकर्तृपुरुषविरहेण अपौरुषेये वेदवाक्ये तदसम्भवात् । अतएव स्वशक्यसम्बन्धिगुणसजातीयगुणवदुपस्थितिनिमित्तिका क्रिया गौणीति लक्षणं करणीयम् । एतादृशगौणीस्वीकारे शक्यार्थत्यागविरहे न वेदाप्रामाण्यापत्तिः । तेन 'यजमानः प्रस्तरः' इत्यादौ यजमानप्रस्तरयोर्यागनिमित्तत्वरूपगुणयोगेन यजमानपदं प्रस्तरे गौणम् । प्रकृते अग्निर्माणवकः इत्यादौ लक्षणमिदं संगच्छते । तथाहि – स्वम् अग्निपदम् तच्छक्यसम्बन्धिगुणो भवति तेजोदाहकप्रकाशकत्वादिकं तत्सजातीयगुणमाणवकनिष्ठत्वं यया क्रिययोपस्थाप्यते सा न लक्षणा अपितु तद्विलक्षणा भवेत् । सेयं **गौणी** कथ्यते । एवंचेत् मीमांसकमते क्रियाभेदेन अर्थस्त्रिविधः (१) वाच्यो मुख्यो वाभिधया बोध्यः, (२) लक्ष्यः लक्षणया बोध्यः (३) गौणश्च गुण्या क्रियया (= वृत्त्या); पदापरपर्यायशब्दश्च वाचको लक्षको [गुणो] गौणकस्तथा । तत्र वाचको शब्दः प्रथमतः शक्यतावच्छेदकतया चतुर्विधः – (१) यौगिकः, (२) रूढः, (३) योगरूढ (४) यौगिकरूढश्च । शास्त्रकल्पितावयवार्थनिरूपिता शक्तिर्योगस्तन्निरूपको यौगिकः । कृदन्ततद्धितान्तसमासभेदेनायं पुनस्त्रिविधः । यथा – पाचकः दाशरथिः चित्रगुश्चेति । पाचक इत्यत्र 'पच्' इत्येकः प्रकृतिरूपोऽवयवः, 'ण्वुल्' इत्यपरः प्रत्ययरूपोऽवयवः, उभयावयवार्थः पाककर्तावगम्यते । १ । शास्त्रकल्पितावयवार्थज्ञानाभावे समुदायार्थनिरूपितशक्तिः रूढिस्तन्निरूपकः रूढः । अयमपि पुनः नैमित्तिक-पारिभाषिक-औपाधिकभेदेन त्रिविधः । यथा-गोघटादिः,चैत्र-पक्षतादिः पश्वादिश्च । गोशब्देन प्रकृतिप्रत्ययसमुदायरूपेण रूढ्या अवयवसंस्थानविशिष्टप्राणिरूपोऽर्थो बुध्यते । २ ।

घटबोधकत्वेनेच्छैव शक्तिरिति चेत् ? ममापि घटपदस्य घटबोधकतैव शक्तिः, न कपालबोधकतेति । ८ ।

लक्षणाविशेष एव गौणी, यत्र सादृश्यं सम्बन्ध इत्येके । तन्न, सादृश्यस्य सम्बन्धत्वे अग्नेर्माणवक इति प्रतीत्यापत्तेः । तस्मात् मुख्यार्थसादृश्यज्ञानमपि क्रियान्तरमेव । तच्च सादृश्यं मुख्यार्थोपस्थित्या द्वारीभूतया लक्ष्यम् । तदाहुः –

'अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते ।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥'

(तं॰ वा॰ १/४/२२, पृ॰ ३१८) इति । ९ ।

शास्त्रकल्पितावयवार्थविशिष्टविशेष्यभूतार्थनिरूपिता शक्तिः योगरूढिस्तन्निरूपको योगरूढः । यथा – पंकजादिः । पंकात् जायते इति व्युत्पत्त्या पंकजनिकर्तृरूपावयवार्थान्वितावयवसंस्थानविशिष्टपद्मरूपोऽर्थः पंकजशब्दाद् बुध्यते । ३ । शास्त्रकल्पितावयवार्थसमुदायार्थयोः स्वतन्त्रशक्तिः यौगिकरूढिः तन्निरूपको यौगिकरूढः । यथा उद्भिदादिः । उत् ऊर्ध्वं भिनत्ति इति व्युत्पत्त्या उद्भेदनकर्त्ता तरुगुल्मवृक्षादिः 'उद्भिदा यजेत पशुकाम' इति श्रुतौ उद्भिन्नामकयागो चावगम्यते । योगरूढे एकार्थप्रत्यायकत्वमत्र यौगिकरूढे तु भिन्नार्थप्रत्यायकत्वमित्युभयोर्भेदः । ४ । मीमांसकैः शब्दार्थयोर्वाच्यवाचकापरपर्याय**प्रत्याय्यप्रत्यायक**भावनामकः सम्बन्धः स्वीक्रियते । तेषां मते सम्बन्धोऽयं स्वाभाविकोऽपौरुषेयो नित्य इति यावत् । वर्णानां नित्यत्वादर्थानां प्रवाहरूपेण च नित्यत्वात् क्रमव्यक्तवर्णसमूहरूपशब्दस्यार्थस्य च सम्बन्धो नित्य एव भवेत् । तदुक्तं जैमिनिमुनिना – 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः' (मी॰ सू॰ १/१/५, पृ॰ ८) इति । अर्थः प्रत्याय्यः (= वाच्यः) शब्दश्च प्रत्यायकः (= वाचकः) इत्यन्यत्र विस्तरः । ९ ।

तच्च शब्दः प्रमाणमित्यादिना शब्दप्रमाणस्य भेदमातनोति ।

भाट्टमते शब्दप्रमाणं पौरुषेयापौरुषेयभेदेन द्विविधमंगीकृतम् । प्राभाकरास्तु अपौरुषेयवैदिकवाक्यस्यैव प्रामाण्यमभ्युपेतं न तु पौरुषेयस्य लौकिकवाक्यस्य तत्रासत्यताधिक्यात् सदैव व्यभिचारसम्भवात् । तन्मते – अवश्यमेवास्ति कश्चिद्वक्ता लौकिकवाक्यस्य । वक्तुः प्रामाण्ये तद्वाक्यस्यापि प्रामाण्यमवतिष्ठते । अतः प्रथममनुमानेन संसर्गबोधो जायते, ततः शब्दविधिना संसर्गबोधो भवितुमर्हति । अतो लौकिकवाक्यमनुवादवाक्याय कल्पते, न तु प्रमाणं भवितुं शक्यते । वैशेषिकास्तु अनुमानेनैव वैदिकवाक्यस्य गतार्थतामाहुः, न च तदर्थं शब्दो नाम पृथक् प्रमाणमंगीकर्त्तव्यमिति । तथाहि – 'अग्निमीळे' इत्यादिपदानि स्मारितार्थसंसर्गज्ञानपूर्वकानि आकांक्षादिमत्त्वे सति तत्स्मारकत्वात् । तत्र वेदपदानामुच्चारणात् पूर्वमीश्वरस्यैव तेषां पदार्थानां संसर्गज्ञानं विद्यते । तादृशसंसर्गज्ञानपूर्वकमीश्वरेण वेदपदानि उच्चार्यन्ते । तत्रापि गामानय इत्यादिपदकदम्बवत् आप्तोक्तवाक्योदाहरणेन व्याप्तिज्ञानं लोकानां भवति । ततश्च लोका

(शब्दप्रमाणस्य भेदः)

तच्छब्दः प्रमाणं प्रथमतो द्विविधम् । पौरुषेयमपौरुषेयं च । पौरुषेयं निर्दोषप्रणीतं घटमानयेत्यादिकम् । अपौरुषेयं वेदवाक्यम् । तच्च पुनर्द्विविधं सिद्धार्थं विधायकञ्च । विधायकञ्च द्विविधम् उपदेशकमतिदेशकं च । इदमनेनेत्थं कुर्यादित्युपदेशः । इदमनेन तद्वत् कुर्यादित्यतिदेशः, यथा देवदत्तः शाल्यन्नेन सघृतपायसेन भोजयितव्यः तद्वदेव यज्ञदत्तो भोजयितव्यः । इति पौरुषेयम् । १० ।

आचार्यमुखात् पदानि श्रुत्वा अर्थसंसर्गज्ञानरूपशाब्दबोधमनुमितत्वेन कुर्वन्ति । यद्यपि वेदपदानामर्थसंसर्गज्ञानमीश्वरेणानुमित्या न क्रियते ईश्वरस्य सर्वज्ञत्वात् सर्वपदार्थानां तत्प्रत्यक्षत्वात् तथापि ईश्वरोक्तवेदपदानि श्रुत्वा लोकानां पदपक्षिका वार्थपक्षिका वा पूर्वोक्तरीत्या संसर्गज्ञानानुमितिर्भवतीति वेदोक्तपदेष्वपि लोकानामर्थसंसर्गानुमितिर्भवतीति न कश्चिद् दोषः । एवमन्यत् प्राग् दर्शितमेव । मीमांसकास्तु निरन्वयविनाशोऽर्थात् प्रलयं न स्वीकुर्वन्ति । तथाच तन्मते सृष्टिसंहारौ न स्वीकृतौ । प्रलयानन्तरं सृष्ट्यादौ वेदकर्तृत्वरूपेण ईश्वरोऽपि नांगीक्रियते । प्रामाण्यस्य च स्वतस्त्वादपि तादृशः सर्वज्ञ ईश्वरो नेष्टः । वेदवाक्यम् अपौरुषेयं न पुरुषेण प्रणीतमिति भाट्टप्राभाकरयोर्मतम् । भाट्टास्तु वैदिकवाक्यवत् लौकिकिवाक्यस्यापि शब्दप्रमाणगम्यता स्वीक्रियते । भाट्टा आक्षिपन्ति यदि लौकिकशब्दस्य प्रामाण्यं न स्यात् तदा कथं वैदिकशब्दस्य प्रामाण्यं सिध्येदिति । 'य एव लौकिकाः शब्दाः त एव वैदिकाः' (मी॰ भा॰, पृ॰ ८५) इति भाष्यवचनमपि लौकिकवाक्यस्य प्रामाण्याय प्रभवति । शब्दः प्रमाणं **पौरुषेयमपौरुषेयञ्चेति** भेदेन द्विधा विभक्तः । तत्र **पौरुषेयं** पुरुषेण निर्दोषेण आप्तेन प्रणीतं कृतमुच्चारितमिति निर्दोषप्रणीतं पौरुषेयमुक्तम् । पदार्थतत्त्वस्य यथार्थज्ञानं कारुण्यमिन्द्रियपटुता तत्त्वज्ञापनेच्छा चेति चतुष्टयगुणवान् पुरुषो निर्दोषवत्तया विवक्षितः । पदार्थज्ञानसत्त्वेऽप्यसत्यां तत्प्रख्यापनेच्छायां तु निर्दोषो न भवति । सत्यामपि तत्त्वप्रख्यापनेच्छायां यदि वक्तुः कारुण्यं न स्यात् तदा स वक्तुं न यतते । यत्नवान् न चेत् स आप्ताय न विविच्यते । यत्नवानपि इन्द्रियापटुतया उपदेष्टुं न शक्नोति चेत् स निदाषो न भवति । अतो यः पदार्थजातं प्रत्यक्षेणानुमानेन वा तद्वर्त्तितत्प्रकारतया ज्ञात्वा कारुण्यादन्यस्मै ज्ञापयितुमिच्छुरिन्द्रियपटुतानिबन्धनं यथाज्ञातं पदार्थमुपनिबध्नाति उपदिशति वा स निर्दोषः पुरुषः । तादृशपुरुषेण प्रणीतं वाक्यं पौरुषेयं लौकिकमिति यावत् शब्दः प्रमाणम् । उक्तञ्च पार्थसारथिमिश्रैः – 'उभयमप्यनाप्तप्रणीतत्वदोषविरहात् स्वतश्च शब्दस्यादुष्टत्वात् प्रमाणम् ।' (शा॰ दी॰, पृ॰ २०४) इति । १० ।

तच्च शब्दः प्रमाणं सिद्धार्थविधायकाभ्यां द्विधा विभज्य विधायकस्य द्वैविध्यमाह **विधायकञ्चेत्यादिना** । एवञ्च पौरुषेयापरपर्यायलौकिकवाक्यस्य सोदाहरणं भेदमुक्त्वा अपौरुषस्य वेदवाक्यस्य व्याख्यानमारभते **प्रयाजादिनेत्यादिना** । प्रयाजो नाम प्रधानो यागः । एवं 'समित् , तनूनपात्, इट्, बर्हिः, स्वाहाकार इति पञ्चानां प्रयाजानां नामानि । देवता अपि ता एव चतुर्णाम् । पञ्चमस्य परं तेषु तेषु कर्मसु यक्ष्यमाणाः प्रधानदेवताः स्विष्टकृदाज्यभागप्रयाजानुयाजदेवता एव ।' (य॰ प्र॰, पृ॰ २५) । मन्त्रब्राह्मणभेदेन वेदवाक्यं द्विविधम् । मन्त्रं संहितां ब्राह्मणञ्च साधारणतो विधिमाह । ब्राह्मणभागे विधिर्नामधेयो निषेधोऽर्थवादश्चेति

प्रयाजादिना प्रकारेण दर्शपौर्णमासाभ्यां स्वर्गं कुर्यादित्याद्यम् । सौर्येण ब्रह्मवर्चसं कुर्यात् यथाग्नेयेन । इत्यपौरूषेयम् । ११ ।

तच्चेदं विधायकं शब्दान्तरादिभिः सहितं भावनाया भेदं श्रुतिलिङ्गादिषट्कसहितं शेषत्वं श्रुत्यर्थादिषट्कसहितं तु क्रमं बोधयति । वचननामधेयचोदनादिलिंगैश्चान्यत्र विहितस्य पदार्थविशिष्टस्य प्रकारकस्य तत्प्रतिपाददकस्य च शास्त्रस्य विध्यन्तरापरपर्यायस्यान्येन सम्बन्धमतिदेशाख्यं क्वचिच्च बाधं विकारं वा बोधयतीति । १२ ।

श्रुतिचतुष्टयं दृश्यते । प्रमाणान्तरेण अनधिगतार्थविषयस्य ज्ञापकत्वं विधेर्लक्षणम् । विधिश्चतुर्विधः - उत्पत्तिविधिर्विनयोगविधिरधिकारविधिः प्रयोगविधिश्च । तत्र कर्मादेः प्राथमिकप्राप्तिर्यतः स उत्पत्तिविधिः कर्मोत्पत्तिर्विधिर्वेति । तत्र प्राथमिकपदेन कर्मस्वरूपेतरस्य व्यावृत्तिः । यथा - ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यत्र यागस्य फलेन सह सम्बन्धो बोध्यते, अतो न तस्योत्पत्तिविधित्वं किन्तु अधिकारविधित्वम् । उदाहरणम् - अग्निहोत्रं जुहोतीति । अत्र विधौ कर्मणः करणत्वेनान्वयः, अग्निहोत्रं होमेनेष्टं भावयेदिति । अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः । अङ्गानां द्रव्यदेवतादिलक्षणानां प्रधानैर्मुख्यैर्वाक्यान्तरविहितैः सह सम्बन्धस्याङ्गस्य शेषत्वलक्षणस्य बोधको विधिरित्यर्थः । यथा दध्ना जुहोति । अग्निहोत्रं जुहोतीत्यनेन वाक्यान्तरेण विहितो होमः प्रधानम् । दधि द्रव्यमप्रधानमंगमिति यावत् । तयोरङ्गांगिभावरूपं सम्बन्धं दध्ना जुहोतीत्ययं विधिर्बोधयति । विधेरस्य नामान्तरं गुणविधिरिति । कर्मजन्यफलस्वाम्यबोधको विधिरधिकारविधिः । अयं फलविधिरपि कथ्यते । कर्मजन्यफलस्वाम्यं = कर्मजन्यफलभोक्तृत्वम् । यथा - यजेत स्वर्गकामः । अत्र यः स्वर्गं कामयते स तत्साधनत्वेन यागं भावयेत् । प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । प्राशुशब्दः शीघ्रवाची । तस्य भावः शैघ्रम् । प्रधानविधेरितिकर्त्तव्यताकांक्षायां यावत् क्रियाजनकमङ्गत्वेन तत्र सम्बद्धं तावत् क्रियाबोधकैस्तैरङ्गविधिभिः सह प्रधानविधेरेकवाक्यतया सर्वेषां वाक्यानां मिलित्वा यो महावाक्यार्थस्तादृशमहाक्वाक्यार्थावगतो यो विधिः स प्रयोगविधिः । अयमेव सगुणकर्मोत्पत्तिविधिरित्युच्यते, द्रव्यदेवतादिगुणविशिष्टकर्मविधायकवाक्यत्वात् । यथा - सोमेन यजेत । अत्र सोमलताविशिष्टो यागो विधीयते । विशिष्टविधावपि विशेषणस्यार्थाद्विधिः ।

विनियोगविधिरपि अपूर्ववधिर्नियमविधिः परिसङ्ख्याविधिश्चेति त्रिविधः । तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सोऽपूर्वविधिः । यथा - दर्शपूर्णमासप्रकरणे व्रीहीन् प्रोक्षति । एतद्विध्यभावे दर्शपूर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । एतद्विधिसत्त्वे तत्सम्बन्धिव्रीहिषु प्रोक्षणं प्राप्नोत्येवेत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः । यो विधिः पक्षे प्राप्तमर्थं नियमयति स नियमविधिः । यथा - तत्रैव व्रीहीनवहन्ति । एतद्विध्यभावे दर्शपूर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्याय अवहननवत् कदाचित् नखविदलनमपि प्राप्नुयादिति तस्मिन् पक्षेऽवहननस्य प्राप्त्यभावात् कार्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् । सत्यस्मिन् विधौ अवहनेनैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्त्तत इति नियमविधिरयम् । द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलको विधिः परिसंख्याविधिः । यथा - चयनप्रकरणे 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यश्वरशनाग्रहणांगत्वेन मन्त्रविधिः । एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रो

अपोरुषेयं च किञ्चित् प्रत्यक्षमेव, यथा – मन्त्रः । किञ्चदनुमेयमपि, यथा – लिङ्गादिकल्प्यं विनियोजकम्, अर्थादिकल्प्यं च क्रमबोधकं, विशिष्टविधिकल्प्यं विशेषणविधानम् ऊहशास्त्रं तथा विनश्वरकर्मविधायकानुमितमपूर्वं कृत्वेत्यादि

रशनाग्रहणप्रकाशनसामर्थ्यरूपाल्लिंगादश्वरशनाग्रहण इव गर्दभरशनाग्रहणेऽपि नियमेन प्राप्नुयात् । एवञ्च – पञ्च पञ्चनखा न भक्ष्याः । इदं हि वाक्यं न पञ्चनखभक्षणपरं, तस्य रागतः प्राप्तेः, नापि नियमपरं पञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्तेः पक्षेऽप्राप्त्यभावात् । अत अपञ्चनखभक्षणनिवृत्तिपरमिति परिसंख्याविधित्वमस्य सङ्गच्छते । यद्यपि नियमविधावपि अप्राप्तांशस्यावहननस्य परिपूरणे कृते नखविदलनादेरितरस्य निवृत्तिर्भवति इति नियमविधौ परिसंख्याया अन्तर्भाव आपाततो बुध्यते तथापि नियमविधौ प्रथममप्राप्तांशपरिपूरणस्य नियमस्य सिद्धौ पश्चादितरनिवृत्तिर्भवति इत्यत इतरनिवृत्तौ नियमविधेर्न तात्पर्यमितरनिवृत्तिस्तु परिशेषेण सिध्यति । अतः इतरनिवृत्तिर्न तत्फलम् । एवं परिसंख्याविधौ इतरनिवृत्तेरर्थादपरप्रवृत्तिर्यद्यपि सिध्यति तेन च परिसंख्याविधेर्नियमविधौ अन्तर्भाव आपाततो बुध्यते तथापि परिसंख्याविधेरितरनिवृत्तेरेव तात्पर्यादितरप्रवृत्तौ पश्चात् अनुविधायिना तात्पर्याभावात् अर्थात् सिद्धत्वेन न परिसंख्याविधेर्नियमविध्यन्तर्भावः कथयितुं शक्यते । अतो विनियोगविधिस्त्तिविध एव । तदुक्तं भट्टपादैः – 'विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति कीर्त्यते ॥' (तं॰ वा॰ १/२/४२, पृ॰ ५९/७-९) इति । यस्य यदर्थत्वं प्रमाणान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोऽपूर्वविधिः । पक्षेऽप्राप्तस्य तु यो विधिः स नियमविधिः । उभयस्य युगपत् प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्याविधिः । ११ ।

विनियोगविधेः सहकारिभूतानि श्रुतिः लिंगं वाक्यं प्रकरणं स्थानं (क्रमं वा) समाख्या चेति षट् प्रमाणानि सन्ति । 'अभिधातुं पदेऽन्यस्मिन्नपेक्षरवा श्रुतिः । सर्वत्रावगता शक्तिर्लिङ्गमित्यभिधीयते ॥ संहृतार्थं ब्रुवद्वृन्दं पदानां वाक्यमुच्यते । प्रधानवाच्यस्याङ्गोक्त्याकाङ्क्षा प्रकरणं मतम् ॥ स्थानं समानदेशत्वं समाख्या यौगिकं वचः । इति श्रुत्यादिलक्ष्मोक्तं मीमांसापारदर्शिभिः ॥' इति तेषां संग्रहश्लोकाः । श्रुतिर्नाम मन्त्रः । मन्त्रः साक्षात् अर्थं बोधयति, अतो **मन्त्रं** प्रत्यक्षस्योदाहरणायोल्लिखयति । लिङ्गञ्च श्रुत्यर्थं कल्पयित्वा **विनियोजकं** (=विनियोगनिरूपकं) भवति (१३) । वाक्यन्तु लिङगं कल्पयित्वा कल्पितलिङ्गेन श्रुतिं कल्पयति । श्रुत्यादेर्यथाक्रममुदाहरणम् (१) व्रीहीनवहन्ति । (२) वर्हिर्देवसदनं दामि । (३) यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति इत्यत्र द्वितीयादिविभक्तिश्रवणाभावेन केवलं पर्णता जुह्वोः समभिव्याहारमात्रेण वाक्येन पर्णतायाः जुह्वङ्गं कार्यम् । तथाच साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणं समभिव्याहारः । तच्च वाक्यम् । (४) प्रयाजादिषु समिधो यजतीत्यत्र इष्टविशेषस्यानिर्देशात् समिध्यागेन किं भावयेदित्यस्त्युपकार्याकाङ्क्षा । दर्शपौर्णमासवाक्येऽपि दर्शपौर्णमासाभ्यां स्वर्गं भावयेत् । कथमित्यस्ति उपकाराकाङ्क्षा । अत उभयाकाङ्क्षारूपप्रकरणेन प्रयाजादीनां दर्शपौर्णमासाङ्गत्वं बोध्यते । (५) ऐन्द्राग्नम् एकादशकपालं निर्वपेत् वैश्वानरं द्वादशकपालं निर्वपेदित्येवं

वाक्यञ्च । न चापूर्वमवकल्प्यं सविकल्पकविज्ञानैः शब्दपूर्वं प्रतीयते । लब्धप्रयोजने तस्मिन् परं नागमिकं हि न इति न्यायेन शास्त्रकल्पनाया एव लघुत्वात् 'शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते' इति । १३ ।

(अपूर्वशास्त्रकथनम्)

साकाङ्क्षा च विनश्वरविधायि शास्त्रं, साधनत्वं हि फलोपधानावास्था, न चाशुविनाशिनस्तत्स्वरूपं फलोपहितमिति । यावत् केनाप्यात्मना स्थायित्वं नावगमयति तावत् प्रमाणमेव नेति द्वारमिति लौकिकं वाक्यमिवापूर्वशास्त्रमध्याहृत्यैव प्रमाणतामश्नुत इति । ।१४ ।

क्रमविहितेष्टिषु 'इन्द्राग्नी रोचना दिवः' 'वैश्वानरोऽजीजनत्' इत्यादीनां याज्यानुवाक्यामन्त्राणां यथाविनियोगः स यथासंख्यपाठात् स्थानाद् भवति । (६) होतुः चमसभक्षणाङ्गत्वं होतृचमस इति वैदिकसमाख्यया सिध्यति । चम्यते भक्ष्यते सोमोऽस्मिन् इत्यस्य व्युपत्तिः । अध्वर्युकर्माङ्गत्वम् अध्वर्यवमिति लौकिकसमाख्यया सिद्धं भवति ।

उपदेशकातिदेशकाभ्यां पौरुषेयविधायकवाक्यवत् अपौरुषेयविधायकवाक्यमपि द्विविधम् । तत्र **आद्यम्** = उपदेशकम् यथा – प्रयाजावधातादिप्रकरेण दर्शपूर्णमासाभ्यां स्वर्गं कुर्यादिति । अतिदेशकं यथा – सौर्येण ब्रह्मवर्चसं कुर्यात् यथाग्नेयेन इति । कुर्यात् = भावयेत् । यस्मिन् विधायकवाक्ये 'इत्थं कुर्यात्' (= अनेन प्रकारेण कुर्वीत) इत्यनेन प्रत्यक्षभावेन इतिकर्त्तव्यताया निर्देशो भवति तद् विधायकमुपदेशकं, यत्र तु 'तद्वत् कुर्यात्' (=अमुना प्रकारेण कुर्वीत) इत्यनेन इतिकर्त्तव्यताया निर्देशो भवति तत् अतिदेशकमुच्यते । तदुक्तम् – 'प्राकृतात् कर्मणो यस्मात्तत्समानेषु कर्मसु । धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्थितिः ॥' इति । विधिवाक्यस्य विभिन्नांशेषु क्रियापदस्यैव प्रान्धान्यम् । क्रियापदस्यांशद्वयं – धातुः प्रत्ययश्च । प्रत्ययेऽप्यंशद्वयम् – आख्यातो लिङादिश्च । आख्यातो दशलकारेषु वर्त्तते लिङादिस्तु तत्तल्लकारे एव । आख्यातलिङादिभ्यां **भावनैव** कथ्यते । भावना व्यापारविशेषः । प्रयोजकव्यापारत्वादेव णिजन्तेन भावि इति धातोर्युचि टापि च भावनेति निष्पद्यते । तदुक्तम् – 'भावना नाम भवितुर्भावनानुकूलो भावयितुर्व्यापारविशेषः' (अ॰, पृ॰ १०-११) इति । भवितुरुपद्यमानस्य कस्यचित् वस्तुनो यत् भवनमुत्पत्तिस्तादृशोत्पत्त्यनुकूलो भावयितुर्भावकस्य (=उत्पादयितुरुत्पादकस्येति यावत्) प्रयोजकस्य यो व्यापारविशेषः सा भावना कथ्यते उच्यते इत्यर्थः । द्रव्यं गुणः कर्मान्यदपि सर्वं वस्तुशब्देन गृह्यते । यथा लौकिके वाक्ये ग्रामं गच्छति रामः इत्यत्र भवितुरुत्पद्यमानस्य ग्रामसंयोगरूपस्य वस्तुनो योत्पत्तिस्तदनुकूलस्तदुत्पादकस्य गमनकर्त्तूरामस्य यो व्यापारः पादप्रक्षेपादिरूपः स भावनोच्यते । एवं वैदिके 'यजेत स्वर्गकामः' इत्यत्र भवितुरुत्पद्यमानस्य देवतोद्देशेन कृतस्य द्रव्यत्यागरूपयागस्य तज्जन्यस्वर्गस्य वा वस्तुनो योत्पत्तिस्तदनुकूल उत्पादकस्य यजनकर्त्तुर्यो व्यापारविशेषः प्रयत्नरूपः सामग्रीसम्पादनऋत्विग्वरणादिरूपो वा स भावनेत्युच्यते । अस्या भावनाया भेदो द्विविधः – शाब्दी आर्थी चेति । तत्र शाब्दी भावना पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः । यथा लोके – स्वामी भृत्यं ग्रामं गमयतीत्यत्र भवितुरुत्पद्यमानस्य भृत्यनिष्ठपादप्रक्षेपादिव्यापाररूपस्य वस्तुनो योत्पत्तिस्तदनुकूलस्तदुत्पादस्य स्वामिनो यः प्रेरणारूपो व्यापारः स शाब्दी भावना । एवं वेदे

(वर्णस्वरूपविचारः)

वर्णश्च सर्वो नित्यः स एवायमिति प्रत्यभिज्ञानात् , अनित्यत्वे मानाभावात् । हट्टादावुत्पन्नः कोलाहल इति प्रत्ययस्यागृहीतभेदव्यक्त्यात्मनो ज्ञातत्वेनोत्पाद एव विशेषः । ध्वनिरप्येवमेव नित्यःस्यादेवेत्येके । अथवा साम्नास्तु बीतेति साम्न उपादेयताश्रुतिविरोधात् नैवमिव ॥ १५ ।

इति प्रमाणरत्ने शब्दपरिच्छेदः ॥

– यजेतेत्यत्र भवितुरुत्पद्यमानस्य यजनकर्त्तृनिष्ठस्य सामग्रीसम्पादनादिव्यापाररूपस्य वस्तुनो योत्पत्तिस्तदनुकूलो भावयितुस्तदुत्पादकस्य यजेत स्वर्गकाम इत्यस्य शब्दस्य यो व्यापारविशेषः प्रेरणारूपः सा शाब्दी भावना । आर्थी भावना प्रयोजनेच्छाजनितक्रियाविषयव्यापारः इति । प्रयोजनस्य स्वगादिरूपफलस्य येच्छा रागविशेषः तेन रागविशेषेण जनितो यो यागादिक्रिया-विषयः पुरुषस्य व्यापारविशेषः सा आर्थी भावना । अस्या दृष्टान्तः प्रागुक्तः । भावनाया अंश-त्रयमपेक्षते साध्यं साधनमितिकर्त्तव्यतां च, (१) किं भावयेत् (२) केन भावयेत् (३) कथं भावयेदिति । तत्र आर्थीभावनायां स्वर्गादिफलं यागेन अग्न्याधानावहननप्रयाजादीतिकर्त्तव्यता-त्वरूपेन भावयेदिति । एवञ्च शाब्दीभावनायां साध्याकाङ्क्षायां प्रागुक्तांशत्रयोपेता आर्थीभावना साध्यत्वेन, साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेन इतिकर्त्तव्यताकाङ्क्षायाञ्च अर्थवादज्ञा-प्यप्राशस्त्यमितिकर्त्तव्यतात्वेनान्वेतीति ।

श्रुतिलिङ्गादि इत्यादिशब्देन वाक्यप्रकरणस्थानसमाख्येति सर्वे एकीकृत्य षट्संख्या बोध्याः । **शेषत्वम्** = अङ्गत्वम् । **श्रुत्यर्थादि** इत्यत्र आदिपदेन पाठ-स्थान-मुख्यप्रवृत्तयो गृह्यन्ते । इदं षट्कं क्रमनियामकं प्रमाणम् । नियामकम् नियमस्य (= व्यवस्थाया) जनकः इत्यर्थः । पार्थसारथिमिश्रैर्विस्मयस्तेने – 'शब्दान्तरादिभिः श्रुतिलिङ्गा-दिभिः श्रुत्यर्थादिभिश्च विचित्रोऽयमुपदेशो भेदविनियोगक्रमानवबोधयति ।' पुनरप्युक्तम् – 'वचननामधेयचोदनालिङ्गैश्चातिदेशोऽन्यत्र विहितस्य नानापदार्थविशिष्टस्य प्रकारस्य तत्प्रतिपादकस्य वा शास्त्रस्य विध्यन्तरापरनामधेयस्यान्येन सम्बन्धं विकारं बाधं वा बोधयतीति (शा॰ दी॰, पृ॰ २०४) । १४ ।

प्रतीतपदार्थको लोके ध्वनिः शब्द उच्यते । ध्वनिरूपः शब्दो वाचकोऽवाचकश्चेति भेदेन द्विविधः । वाचकशब्दस्य सांकेतिकः एककः (unit) वर्ण इत्युच्यते । सोऽयं वर्णोऽभिव्यक्तेः स्वातन्त्र्यपारतन्त्र्यापेक्षेण स्वरव्यञ्जनाभ्यां द्विविधा । पुष्पाणां यथाग्रन्थितं मालाव्यपदेशवत् वर्णानां नियमतः अकारादिक्रमेण ग्रन्थनात् वर्णमाला इत्युच्यते । वर्णोऽयं मीमांसकानां मते नित्यः । वर्णानि आनुपूर्वीभावेन संहत्य पदाय, पदानि च तथैव आकाङ्क्षादिमत्तया वाक्यं सम्पादयन्ति । वर्णात्मकेषु पदेषु (= शब्देषु) सर्वत्र 'स एवायं गकारः तदेवेदं पदम्' इति **प्रत्यभिज्ञा** जायते । तथाच अदृष्टादिकारणवशात्तदुद्बोधे सति प्रथमाभिव्यक्तिरेव प्रत्यभिज्ञारूपा भवति । यथा गाढान्धकारे क्षणिकविद्युत्सम्पातेन चिरपरिचितेऽपि वस्तुनि प्रथमतः स एवायमिति प्रत्यभिज्ञा जायते । अतो वर्णा नित्याः । वर्णानां नित्यत्वात् अर्थस्य प्रवाहरूपेण च नित्यत्वान् सम्बन्धस्यानदितया अपौरुषेयमित्यन्यत्र विस्तरः । १५ ।

इति साहान्तविश्वरूपेण कृतायां पञ्चिकानाम्न्यां विवृत्यां शब्दपरिच्छेदः ॥

(उपमानपरिच्छेदः)

(उपमाननिरूपणम्)

स्मर्यमाणे दृश्यमानसादृश्यज्ञानमुपमानम् । यथा – नगरदृष्टगोः पुरुषस्य वनसाक्षात्कृतगवयसादृश्यस्यानेन सदृशी नगरगा गौरिति धीः । १ ।

उपमां नयमार्गात्तु ब्रूते भाट्टोऽन्यथा यथा ।
प्राचीननव्यदृष्ट्यास्मिन् तथा वच्मि गुरोर्मतम् ॥

न्यायमीमांसादिदर्शने उपमानं स्वतन्त्रप्रमाणतया स्वीक्रियते । परन्तु न्यायमीमांसकयोरुपमानविषयकालोचने वैलक्षण्यं दरीदृश्यते । तत्र 'उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति । यथा गवयदर्शनं गोस्मरणस्ये'ति (मी॰ भा॰, पृ॰ १२) भाष्यग्रन्थ उपवर्षसम्मत एव भाष्यकारेण लिखितत्वात् टीकाकारादिभिर्भाष्यत्वेनैवोच्यते । यत् सादृश्यमसन्निकृष्टार्थे ज्ञानं जनयति तत् उपमानमुपमितिरित्यर्थः । यथा गवयप्रत्यक्षज्ञानं सादृश्यविशिष्टगवयसाक्षात्कारात्मकं ज्ञानं गोस्मरणस्य जनकं भवति । अत एतन्मते सादृश्यं करणं (= प्रमाणं) स्मरणञ्च कर्म (= प्रमेयं object) । तेन च करणं भवति गवयदर्शनं, परिणामि ज्ञानञ्च गोः स्मरणम् । परन्तु – 'सदृशादुपजायेत या मतिः सदृशान्तरे । ध्यानादिस्मृतितुल्यत्वात् सा प्रमाणं कथं भवेत् ॥' (श्लो॰ वा॰, पृ॰ ३०८) इत्यनेन जरन्मीमांसकमतं कुमारिलेनाक्षिपता दूषितम् । गुरुमतेऽपि भाष्यग्रन्थस्य व्याख्यापि कृता । गोस्मरणस्य पुरुषस्यारण्यादौ प्रत्यक्षगवयस्य स्मर्यमाणे गवि अनेन सदृशी मदीया नगरगा गौरिति सादृश्यज्ञानमुत्पद्यते, सा उपमितिः । तदुक्तं शालिकाचार्यैः – 'दृष्टगोः पुरुषस्य तत्सदृशं गवयं पश्यतो यद्गोविषयकं गवयगतसादृश्यज्ञानं तदुपमानम् ।' (प्र॰ पं॰, पृ॰ २६७) इति । रामानुजेनाप्युक्तम् – 'सदृशदर्शनात्तत्सदृशवस्त्वन्तरगतसादृश्यज्ञानमुपमानम् ' (त॰ र॰, पृ॰१२) इति । भाट्टा अप्याहुः – प्रत्यक्षेण पूर्वदृष्टायां गवि स्मर्यमाणायां च वने गवयदर्शनादेतत्सदृशी गौरिति यज्ज्ञानं तदुपमितिः । **स्मर्यमाणे** गवानुयोगिनि, **दृश्यमानस्य** गवयादिप्रतियोगिनः सादृश्यज्ञानं नाम उपमानमुपमितिरित्युच्यते । यदा पूर्वं दृष्टवस्तुनः सदृशं वस्त्वन्तरं पश्यन् कश्चित् परुषो बुध्यते स्मृतवस्तु प्रत्यक्षवस्तुना सदृशमिति तदा तस्येदृशं सदृशज्ञानमुपमितिरित्युच्यते । प्रत्यक्षगवयनिरूपितसादृश्यप्रकारकगोविशेष्यकप्रमा उपमितिः । तथाच मीमांसकमते गवयप्रत्यक्षं करणमुपमानं नाम, एतत्सदृशी मदीया गौरित्युपमितिः,गोसदृशो गवयः इत्यतिदेशवाक्यम् । व्यापारस्वीकर्त्तृणां मते अतिदेशवाक्यार्थज्ञानं व्यापारः, अन्येषां मते कारणमात्रम् । अतः पार्थसारथिमिश्रैरुक्तम् – 'पूर्वदृष्टे स्मर्यमाणार्थे दृश्यमाणार्थसादृश्यज्ञानमुपमानम् – यासावस्माभिर्नगरे दृष्टा गौः सानेन गवयेन सदृशी'ति (शा॰ दी॰, पृ॰ २०८) । चक्षुःसन्निकर्षातिवर्तिन्यां गवि जायमानत्वात् नेदं प्रत्यक्षम्, व्याप्तिज्ञानादेरभावान्नापि अनुमानम्, पदज्ञानाद्यभावात् नापि च शाब्दम् । इदं नगरस्थपूर्वानुभवानुसारेण जायमानत्वात् अधिकाग्रहणात् न प्रत्यभिज्ञानम्, प्रत्यभिज्ञानं हि पूर्वानुभवातिरिक्तैतत्कालीनसत्तां गृह्णाति । पूर्वमेतादृशानुभवाभावात् न स्मृतिः । न्यायसूत्रकृता गौतमेनोक्तम् – 'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्' (न्या॰ द॰ १/१/६, पृ॰ १६८) इति । तथाच यः पदार्थः पूर्वं सम्यग् ज्ञातः स प्रसिद्धः पदार्थः, यो हि पूर्वमज्ञातः सोऽप्रसिद्धः सन् साध्यः साधनीयो भवति । कस्मिंश्चित् पदार्थे कस्यचित् प्रसिद्धपदार्थस्य

(मतान्तरनिराकरणम्)

न च गौर्गवयसदृशी गवयनिष्ठसादृश्यप्रतियोगित्वात्, यत् यत् सादृश्यप्रतियोगि तत्तत् सदृशं यथा गवययोरन्यतरेणान्यतर इत्यनुमानादेवेयमिति वाच्यम्, अगृहीतव्याप्तेरपि ज्ञायमानत्वाद् गवि सादृश्यप्रतियोगित्वस्य लिङ्गस्योपमानादन्येनाज्ञातत्वाच्च ॥ २ ।

इति प्रमाणरत्ने उपमानपरिच्छेदः ॥

सादृश्यप्रत्यक्षेण कस्यापि साध्यसिद्धेर्यत् कारणम् अर्थात् येन तदतीन्द्रियसाध्यपदार्थस्य यथार्थानुभवो जायते तदुपमानप्रमाणमुच्यते । प्रत्यक्षदृष्टगोत्वस्य गोसदृशो गवय इति श्रुतातिदेशवाक्यस्य च वने गवयदर्शनादयं स गवय इति गोसादृश्यविशिष्टगवयज्ञानं तदुपमानमिति गौतमीयाः । तथाच न्यायमते अतिदेशवाक्यार्थस्मरणपूर्वकं ग्रामीणस्य गोसदृशपिण्डदर्शने सति गवयत्वज्ञानाद् गवयत्वविशिष्टो गवयपदवाच्यः इति गवयरूपसंज्ञाया गवयत्वविशिष्टसंज्ञिना प्राणिविशेषेण सह शक्तेर्निश्चय उपमानस्य फलमुपमितिर्नाम । गोसादृश्यज्ञानमुपमानं प्रमाणं, व्यापारस्त्वतिदेशवाक्यार्थस्मृतिः । यदि एवम्भूतं ज्ञानमुपमानमङ्गीक्रियते तर्हि तत् प्रत्यक्षेणानुमानेन शब्देन वापि प्राप्तुं शक्यते । गोसदृशो गवय इत्यत्राप्तोपदेशेनैव गवयरूपार्थप्रतीतेरतिदेशवाक्यार्थस्मरणसहितेन्द्रियजन्यत्वात् सविकल्पकप्रत्यक्षमेव **प्रमाणम्** । **संज्ञासंज्ञि**-सम्बन्धज्ञानं गवयो गवयपदवाच्यो गोसादृश्यवत्त्वादित्यनुमितिरित्यनुमितेः **करण**मनुमानमित्युपमानस्यानुमानेऽन्तर्भावः । यद्वा आप्तोपदेशविधया शब्दप्रमाणे उप**मानमन्त**र्भावयितुं शक्यत्वान्न प्रमाणान्तमिति निरस्तं न्यायमतं कुमारिलभट्टेन (श्लो॰ वा॰, पृ॰ ३०८) । अतएव अनेन सदृशी मदीया नगरगा गौरित्येवं व्यवहर्तव्यम्, न तु अयं मदीयेन गवा **सदृशः इत्येत**दनुमानेन व्यवस्थापयति **न च गौ**रिति । सादृश्ये अनुयोगिप्रतियोगिनी इति **सम्बन्धिद्व**यमवश्यमपेक्षते । यस्य सादृश्यरूपः सम्बन्धः स प्रतियोगी यस्मिन् च तादृशः सम्बन्धो विद्यते सोऽनुयोगी दृष्टगवयस्य सादृश्यं स्मर्यमाणे गवि विद्यते इत्यतो गवयप्रतियोगिकगवानुयोगिकं सादृश्यम् । तदुक्तम् **गवयनिष्ठसादृश्यप्रतियोगिकत्वा**दिति हेतोः गौर्गवयसदृशी इति अकृत्वा अनेन सदृशी गौरिति प्रयोक्तव्यमिति । १ – २ ।

इति साहान्तविश्वरूपेण कृतायां पञ्चिकानाम्न्यां विवृत्यामुपमानपरिच्छेदः ॥

(अर्थापत्तिपरिच्छेदः)

(अथापत्तेर्लक्षणम्)

प्रमितार्थस्योपपत्तये ययार्थान्तरकल्पना सार्थापत्तिः । यथा जीवतो देवदत्तस्य गृहासत्त्वज्ञानाद्बहिःसत्त्वकल्पना । १ ।

बाध्यते न्यायविद्भिर्यन्मीमांसकैस्तु साध्यते ।
अर्थापत्तिप्रमाणं तद्ग्रन्थेऽधुना प्रतन्यते ॥

मीमांसकमते पञ्चमप्रमाणस्यार्थापत्तेर्लक्षणमाह – **प्रमितार्थस्ये**त्यादिना । अर्थः= विषयः, आपत्तिः = कल्पना । कल्पनाशब्दोऽत्र प्रमितिपरः । अर्थापत्तिशब्दो द्विधा व्युत्पाद्यते । तद् यथा – (१) अर्थस्य बहिःसत्त्वादिरूपस्य आपत्तिः = कल्पनं प्रसङ्ग इति यावदिति षष्ठीतत्पुरुषसमासेन व्युत्पन्नः प्रमाणफलप्रतिपादकः, (२) अर्थस्य = बहिःसत्त्वादिरूपस्य आपत्तिः = कल्पनं, प्रसङ्ग इत्यर्थः यस्मात् जीवित्वविशिष्टगृहासत्त्वादिरूपादिति बहुव्रीहिसमासनिष्पन्नश्च प्रमाणपरः । वात्स्यायनोऽप्याचष्टे – 'अर्थादापत्तिरर्थापत्तिः । आपत्तिः प्राप्तिः प्रसङ्गः' (न्या॰ भा॰ २/२/१, पृ॰ ५७३) इति । तथाच अभिहितार्थात् अर्थान्तरप्राप्तिरर्थापत्तिः । यथा – असत्सु मेघेषु कदाचित् वृष्टिर्न भवति इत्यतो नार्थापत्तिरप्रमाणमिति वाच्यम्, प्रतिबन्धकरहितस्य तादृशस्याङ्गीकारात् इत्येवमुपकल्पितं पूर्वपक्षिमतरूपेण गौतमीयैः । शबरस्वामिनोक्तम् – 'अर्थापत्तिरपि दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते – इत्यर्थकल्पना । यथा जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पना' (मी॰ भा॰, पृ॰ १२) इति । भट्टपादैरप्युक्तम् – 'प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत् । अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता ॥' (श्लो॰ वा॰, पृ॰ ३२०) इति । भाष्याशयं व्याख्यातुं पार्थसारथिमिश्रैरुक्तम् – 'प्रमितस्यार्थस्यार्थान्तरेण विनानुपपत्तिमालोच्य तदुपपत्तये यार्थान्तरकल्पना सार्थापत्तिः' (शा॰ दी॰, पृ॰ २१४) इति । न च अङ्गुल्यग्रे करिशतमित्यर्थस्य 'दश दाडिमानि षडपूपाः कुण्डमाजिनं पपलपिण्डः । अधोरुकमेतत् कुमार्याः स्फैयकृतस्य पिता प्रतिशीनः' (म॰ भा॰ १/१/७, पृ॰ (१) १०५) वेत्यादेरनुगतिरर्थान्तरं कल्पयितुं (= प्रमापयितुं) शक्यत इत्युक्तं **प्रमिते**ति । प्रमाणावगतेऽर्थे अनुपपद्यमाने तदुपपानाय यत् अर्थान्तरं कल्पयति (= प्रमापयति) सार्थापत्तिर्नाम प्रमाणम् । तथाच उपपादकं बहिर्विद्यमानत्वादिकम् उपपाद्यञ्चात्र जीवित्वविशिष्टगृहाविद्यमानत्वादिकम् । 'येन विना यदनुपपन्नं तत्तत्रोपपाद्यम्, यस्याभावे यस्यानुपपत्तिस्तत्तत्रोपपादकम् ।' यथा बहिर्विद्यमानत्वेन विना जीवतो गृहाविद्यमानत्वमनुपपन्नमिति तादृशगृहाविद्यमानत्वमुपपाद्यम् । यथा वा बहिर्विद्यमानत्वस्याभावे तादृशगृहाविद्यमानत्वस्यानुपपत्तिरिति बहिर्विद्यमानत्वमुपपादकम् । अतो धर्मराजाध्वरीन्द्रेण प्रमारूपार्थापत्तेर्लक्षणप्रसङ्गे उक्तम् – 'उपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । तत्रोपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलमिति (वे॰ प॰, पृ॰ १३६) । प्राभाकरैरपि यथोक्तार्थापत्तिरङ्गीकृता । तदुक्तं

(अर्थापत्तेः प्रमाणान्तरत्वसाधनम्)

न चेदमनुमानं, देवदत्तनिष्ठस्य जीवित्वे सति गृहासत्त्वस्य लिङ्गस्य बहिःसत्त्वनिश्चयं विनाशक्यनिश्चयत्वात् । तथाहि – जीवतो देवदत्तस्य सत्त्वासत्त्वे विरुद्धेऽवच्छेदभेदं विना ग्रहीतुमशक्ये इति बहिरवच्छेदेन सत्त्वमर्थापत्त्या गृहेऽसत्त्वं चानुपलब्ध्या निश्चेयम्, व्यवस्थां विना प्रमाणयोरेकस्मिन् विरुद्धार्थनिश्चायकतानुपपत्तेः । २ ।

(अर्थापत्तेर्वीजम्)

जीवनग्राहकेन हि प्रमाणेन देवदत्तस्य सत्त्वं प्रमापितं गृहेऽपि पक्षे प्राप्तमनुलब्ध्या तु असत्त्वमित्यनयोर्वलावलानवधारणात् प्रमाणत्वेनावधृताभ्यां सन्देह एव

शालिकाचार्यैः–'विना कल्पनयार्थेन दृष्टेनानुपपन्नताम् । नयतादृष्टमर्थं या सार्थापत्तिस्तु कल्पना ॥' (प्र॰ पं॰, पृ॰ २७२) । यथा जीवन् देवदत्तो गृहे नास्ति इत्यत्र गृहाभावे दृष्टे श्रुते वा तस्य बहिर्भावः कल्प्यते । अतो बहिर्भावकल्पना अर्थापत्तिः प्रमा, कल्प्यमानोऽर्थः प्रमेयम् । यद्वा प्रमितिः प्रमाणमिति व्युत्पत्त्या कल्पना प्रमाणम्, तत्पश्चाद्भावि विशिष्टज्ञानं प्रमारूपफलमिति । अतोऽर्थापत्तिर्न प्रत्यक्षेऽन्तर्भावयितुं शक्यते, प्रत्यक्षे हि विषयेन्द्रियसन्निकर्षोऽपेक्षितः, देवदत्तस्य बहिर्भावग्रहणे त्विन्द्रियसन्निकर्षो नास्ति । **न चेदमनुमानमिति** । नैयायिका अर्थापत्तेरनुमानानतिरिक्तत्वं नेच्छन्ति । सर्वत्र सामग्रीभेदेन प्रमेयाधिक्येन च प्रमाणान्तरत्वमभ्युपगम्यते, अत्र तु द्वयमपि नावलोक्यते । यच्च बहिर्भावलक्षणं प्रमेयं तदनुमानेनावगम्यते । यथा हि – देवदत्तो बहिरस्ति गृहेऽविद्यमानत्वे सति जीवित्वात् इत्यनुमानाकारः यो जीवंस्तत्र नास्ति स ततोऽन्यत्रास्ति यथाहमिति व्यतिरेकव्याप्त्या देवदत्तस्य बहिर्भावोऽनुमीयते । किञ्च इदं कार्यतः कारणानुमानं, न प्रमाणान्तरमिति । मीमांसकैस्तु अर्थपत्तेः पृथक् प्रामाण्यं स्वीक्रियत इत्युक्तम् । तेषां मते अर्थापत्तिरनुमाने समावेष्टुं न शक्यते । यतः अनुमाने हेतोर्व्याप्तिः सपक्षभूतदृष्टान्ते प्रथमत एव गृह्यते अर्थापत्तौ तु सा तदैव गृह्यते । अर्थापत्तौ पक्षधर्मता नापेक्ष्यते अनुमाने तु सापेक्ष्यते । तदुक्तं प्रभाकरमिश्रैः –'ज्ञातसम्बन्धस्येत्यनुमानलक्षणम् अज्ञातश्चात्र सम्बन्धः तस्मात् प्रमाणान्तरमि'ति (बृ॰, पृ॰ ८५) । गागाभट्टोऽपि अर्थापत्तिं पृथक् प्रमाणतयाङ्गीकरोति प्रत्यक्षादावन्तर्भावं च खण्डयति । एवञ्च अर्थापत्तिः शब्देऽन्तर्भावयितुं न शक्यते । शब्दस्याप्तवचनरूपतयात्रार्थापत्तौ तु जीविनो देवदत्तस्य बहिर्भावो नाप्तोपदेशेन लब्धः । उपमाने सादृश्यज्ञानमनिर्वार्यमत्र त्वर्थापत्तौ किमपि सादृश्यज्ञानं नापेक्ष्यते । तस्मात् अर्थापत्तिः स्वतन्त्रप्रमाणमिति स्वीकर्त्तव्यम् । 'वस्तुतस्तु नानुमिनोमि नोपमिनोमि न शाब्दयामि, किं त्वर्थापयामीत्यनुभवादेव मानान्तरत्वं युक्तम्' इत्युक्तं गागाभट्टैः (भा॰ चि॰, पृ॰ ४६) । एवञ्चार्थापत्तेः प्रमाणान्तरत्वं प्रसाधितम् । १ – २ ।

आर्थापत्तेर्वीजं सन्देहः । तत् प्रतिपादयति – **जीवनग्राहकेन हि प्रमाणे**नेत्यादिना । ज्योतिषाद्यागमेन देवदत्तस्य शतवर्षजीवित्वं ज्ञातम् अनुपलब्ध्या च तस्य गृहेऽसत्त्वमवगम्यते ।

जायते । स च बहिःसत्त्वकल्पनया द्वयोर्व्यवस्थया निराक्रियते । ततश्च देवदत्तो बहिः सन् गृहेऽसन् इति निश्चिनोतीति सोऽयं प्रमाणयोर्विरोधी ज्ञायमानो बहिःसत्त्वनिश्चयस्यार्थापत्त्याख्यस्य कारणम् । तदाहुराचार्याः –

'विद्यमानत्वसंसृष्टगृहाभावधियानया ।

गृहादुत्कालितश्चैत्रो बहिरेवावतिष्ठते ॥' (श्लो • वा• , पृ• ३२३) इति । ३ ।

(अर्थापत्तेर्भेदः)

सा चार्थापत्तिर्दृष्टश्रुतार्थापत्तिभेदेन द्विधा । तत्राद्या तावदुदाहृता । श्रुतार्थापत्तिस्तु प्रमाणमेव प्रमेयम् । यथा द्वारमित्यादि ह्यपरिपूर्णेषु लौकिकवाक्येषु वाक्यार्थप्रतिपत्तये संव्रियतामिति श्रुतशब्दैकदेशत्वेन कल्प्यते तथा वेदेऽपि 'विश्वजिता यजेत' इत्यत्र

एवं शब्दानुपलब्धिप्रमाणयोर्विरोधो भवति, जायते च सन्देहः 'पूर्वं जीवन् देवदत्तो गृह एव दृष्टः,इदानीं स गृहे नास्तीत्यतो जीवति न वे'ति । तथाच पूर्वं जीवनं गृहसम्बद्धमेव प्रमितम्, सम्प्रति तत्सम्बन्धेऽपगते बहिर्देशसम्बन्धे चाकल्पिते जीवने सन्देहो जायते । अतः प्रमाणद्वयोर्विरोधात् भवति सन्देहः, सन्देहनिरसनार्थं प्रमाणान्तरं कल्प्यते । अतः सन्देहोऽर्थापत्तेर्वीजम् । अर्थापत्त्या च सन्देहो निरस्यते । तदुक्तम् – 'तत्सन्देहव्युदासाय कल्पना या प्रवर्त्तते । सन्देहापादकादर्थादर्थापत्तिरसौ स्मृता ॥ यत्कल्पनां विना योऽर्थः प्रतीतोऽप्येति संशयम् । तेन तत्कल्पनामेके त्वर्थापत्तिं प्रचक्षते ॥' (प्र• प•, पृ• २७५) इति शालिकाचार्यैः ।

